प्रकरणाष्टकम्

Advaita Grantha Ratna Manjusha-Ratna 19—

SHRI SHANKARABHAGAVATPADA'S

PRAKARANASHTAKAM

With the commentaries of

Shri Vidyaranyaswami, Shri Anandagiriacharya

and

Other ancient scholiasts

Edited with notes etc.

by

Panditaraja, Shastraratnakara etc.

S. Subrahmanyasastri M.A.

Director

Mahesh Research Institute of Indian Philosophy,

under directions from

Shri Swami Maheshanandagiri Maharaj
Mahamandaleshwar
Pontiff of Shri Dakshinamurti Peetha

Mahesh Research Institute

Mount Abu Varanasi

अद्वैतग्रन्थरत्नमञ्जूषायाः १९ रत्नम्—

श्रीशङ्करभगवत्पादाचार्यविरचिता

प्रकरणाष्टकम्

श्रीमद्विद्यारण्यश्रीमदानन्दगिर्यादि—
प्राचीनाचार्यविरचितटीकादिभिः
समलङ्कृतम्

श्रीदक्षिणामूर्तिपीठाधीश्वरमहामण्डलेश्वर—
श्रीमन्महेशानन्दगिरिमहाराजानां

निर्देशेन
पण्डितराजशास्त्ररत्नाकरादिपदभाजा
श्री एस. सुब्रह्मण्यशास्त्रिणा
महेश-अनुसन्धान-संस्थान-निदेशकेन
संशोध्य भूमिकापाठभेदटिप्पण्यादिभिः
सम्पादितम्

महेश-अनुसन्धान-संस्थानम्

माउण्ट आबू वाराणसी

Published by—

MAHESH RESEARCH INSTITUTE

Shri Shankar Matha
Mount Abu (Raj.)

Shri Dakshinamurti Matha
D. 49/9 Mishra Pokhara
Varanasi.
Ph. No. : 350654

Copies and information may be had of—

MAHESH RESEARCH INSTITUTE
Shri Dakshinamurti Matha
D, 49/9 Mishra Pokhara
Varanasi-10

भगवत्पादाब्द : १२०९
वैक्रमाब्द : २०५४
ख्रैष्टाब्द : १९९७

All Rights reserved by the publisher

Second Edition

Price 120.00

Printed by

TARA PRINTING WORKS
Rathyatra, Gurubagh Road, Varanasi
Ph. No. 320291

प्रकरणानि	:	टीकाकृतः
अपरोक्षानुभूतिः	१	विद्यारण्यः
आत्मबोधः	२	पद्मपादः
त्रिपुरी	३	आनन्दगिरिः
मनीषापञ्चकम्	४	सदाशिवेन्द्रयोगी, बालगोपालेन्द्रमुनिश्च
आत्मज्ञानोपदेशविधिः	५	आनन्दगिरिः
उपदेशपञ्चरत्नम्	६	सदाशिवः, बालकृष्णानन्दसरस्वती च
स्वरूपनिरूपणम्	७	आनन्दगिरिः
वाक्यवृत्तिः	८	आनन्दगिरिः

निर्देशिका

शुभाशीः
Preface
उपोद्घातः
अपरोक्षानुभूतिः
आत्मबोधः
त्रिपुरी
मनीषापञ्चकम्
आत्मज्ञानोपदेशविधिः
उपदेशपञ्चरत्नम्
स्वरूपनिरूपणम्
वाक्यवृत्तिः
उपदेशपञ्चरत्नकारिकासहितप्रकरणाष्टकश्लोकानुक्रमणिका
संस्थानस्य प्रकाशितग्रन्थपत्रिका

श्रीदक्षिणामूर्त्तिर्विजयतेतमाम्

श्रीमत्परमहंसपरिव्राजकाचार्य-पदवाक्यप्रमाणपारावारपारीण-शमदमोपरतितितिक्षासमाधानश्रद्धाचरणनिष्ठ-ब्रह्मविद्वरिष्ठ-यतिचक्रवर्तित्वाद्यनाद्यनवच्छिन्नगुरुपरम्पराप्राप्तब्रह्मात्मैक्यज्ञानवैभवानुभवप्रद्योतितान्तः-करण-वेदान्तमार्गप्रवर्तक-श्रीकाशीक्षेत्रस्थितश्रीकेवलाद्वैतव्याख्यानसिंहासन-दक्षिणामूर्तिपीठाधीश्वर-शङ्करधर्मस्थापनाचार्य-श्रीशङ्करभगवत्पादारविन्दोपासक-तोटकाचार्यानन्दगिरि-परम्पराप्राप्त-महामण्डलेश्वरस्थानवैभव-सर्वतन्त्रस्वतन्त्र-अनन्तश्रीविभूषित-नृसिंहगिरिस्वामि-करकमल-सञ्जात-श्रीदक्षिणामूर्ति-निरञ्जनपीठाचार्य-**महेशानन्दगिरि**महामण्डलेश्वरस्वामिभिः
क्रियन्ते नारायणस्मृतयः

वेदान्तमञ्जूषायाः एकोनविंशं रत्नं प्रकाश्यत इति ज्ञात्वा हर्षिता वयम् । घोरेऽस्मिन् कलौ शङ्करभगवत्पूज्यपाद-प्रदर्शितं मार्गं विहाय नान्यमुपायं शान्तिकरमुत्पश्यामः । मुमुक्षूणां कृते तु पूर्वमपि नासीद् ब्रह्मज्ञानादृते किमप्युपायान्तरम् । वैदिककर्मणा तु आपेक्षिकी शान्तिरासीदपि । अधुना तु द्रव्यादेरनुपलभ्यता, वर्णाश्रमादिसाङ्कर्यादधिकारिणोऽप्यनुपलभ्यता जरीजागर्ति । तस्माद्भाष्यकारप्रदर्शितं विधुराधिकरणमनुसृत्य पुरुषमात्रसम्बन्धिभिर्जपोपवासदेवताराधनादिभिरन्तःकरणस्यापि संशुद्धिः सम्भवति । तदनुकूलस्तोत्रदेवमन्दिरादीनामपि सौलभ्यं कृतं शङ्करभगवत्पूज्यपादैः, तदनुसारिभिश्च दशनामसम्प्रदायाचार्यैस्तत्र तत्र तदा तदा । एवं बहिरङ्गं संसाध्य निर्गतनिखिलकल्मषान्तःकरणैस्तु बाह्याभ्यन्तरिकालिङ्गसलिङ्गपारिव्राज्यं गृहीत्वा सभाष्यं सवार्तिकं प्रस्थानत्रयं श्रोतव्यम् । संशयविप्रतिपत्तिनिवारणाय प्रकरणग्रन्थानां लघुचन्द्रिकापर्यन्तानां विचारणं विधेयम् । कृते चित्तैकाग्र्येण श्रवण-मनने पर्याप्ते ब्रह्मवेदने । प्रारब्धदोषतो नानुभूयते जीवन्मुक्तिश्चेज्जीवन्मुक्ति-मिच्छता प्रबलदोषनिवृत्त्यै संयमाभ्यासादिकमेकान्तसेवनादिकं च कार्यम् । अल्पदोषनिवृत्त्यै तु वेदान्तपाठनं शिष्यबोधायेति ।

किन्तु ग्रन्थानामभावे कथं पठनं पाठनं वा सिद्ध्येदिति भृशं चिन्तयन्तः खिन्ना वयं भगवन्तं भूतभावनं शङ्करं प्रार्थितवन्तः । भिक्षुभिरस्माभिर्द्रव्यानर्हैर्न तादृशी चिन्ता कार्येति दक्षिणामूर्तिना **विष्णुदासमेहता**ख्यः कश्चिच्छ्रेष्ठिप्रवरः प्रेरितः । तन्मुखात् सर्वप्रकाशनं स्वकीयद्रव्येण करिष्यामीति प्रतिज्ञां श्रुत्वा निश्चिन्ता अभूम । पारिव्राज्यधर्ममनुसरद्भिर्नैकत्र स्थातव्यमस्माभिः । सम्पादनं तु नैवं भवेदिति कृत्वा पण्डितराजादि-बिरुदान्विता एकत्रिंशतिविक्रमशताब्दे वेदान्तज्ञाने मार्तण्डवदुद्भासिताः शास्त्रिप्रवराः **श्रीसुब्रह्मण्यशास्त्रिणो**ऽस्य सम्पादने संयोजिताः । अल्पीयसैव कालेन महता श्रमेण सत्यपि वार्धक्ये श्रीशङ्करानुरागमात्रेण कृतसङ्कल्पाः एकोनविंशं रत्नं प्रकटयन्तीति प्रमोदान्वितास्सञ्जाता वयमपि । प्रार्थये शङ्करं यच्छास्त्रिसुब्रह्मण्यमहोदयाः जीवन्मुक्तिसुखं सम्प्राप्नुयुरिति ।

विशेषोऽयमत्र ग्रन्थरत्ने श्रीमच्छङ्करभगवत्पादविरचितप्रकरणेषु प्रधानभूतान्यष्टप्रकरणानि जीवन्मुक्ततुल्यैः श्रीपद्मपादाचार्य-विद्यारण्य-आनन्दगिरि-सदाशिवेन्द्रसरस्वती-बालकृष्णानन्दसरस्वत्याख्यैः पण्डिततल्लजैः लिखितानि गद्यपद्य-मयानि व्याख्यानानि संयोजितानि। एतेष्वेकमपि प्रकरणं सव्याख्यं सम्यगधीतं चेच्छ्रवणमनननिदिध्यासनानां महदुपकरिष्यति। पण्डितानामपि शास्त्रानुक्तविषया विवेचिताः ।

ग्रन्थस्यास्य पाठकाः श्रीशङ्करभगवत्पादप्रसादानुगृहीता ब्रह्मलोकं गत्वा क्रममुक्तिभाजना भवेयुः । एषां समेषां ग्रन्थानां आङ्ग्लहिन्दीभाषानुवादोऽपि प्रकाशयिष्यते सत्वरमेव । तेनासंस्कृतज्ञा अपि श्रवणमननादिसिद्धिं कृत्वा प्राप्स्यन्ति शान्तिं ज्ञानं च ।

ग्रन्थप्रकाशने **शारदानन्द**शास्त्रिमहोदया अस्मदन्तेवासिनो बहुश्रमं कृतवन्तः । तत्सर्वं 'भक्तिं मयि परां कृत्वा मामेवैष्यती'ति शास्त्रेण ब्रह्मानुभूतेरुपायत्वेन तैरनुष्ठितोऽपि पाठकानधमर्णीकरोति ।

उमारमणं रमारमणं च प्रार्थये यत्समेषां बुद्धौ स्फुरतु ब्रह्मात्मैक्यम् । येषां गृहे च शाङ्करवचनरूपा ग्रन्थाः स्थिता मन्ये तेषां गृहाद् भूतग्रहपिशाचगदाकालमृत्युशान्त्यभावादीनि च निर्गच्छेयुरिति ।

वैक्रमाब्दे पञ्चत्रिंशदुत्तरद्विसहस्रतमे व्यासपूर्णिमायाम् ।

Preface

This small volume, containing eight importatnt Vedāntaprakarṇas of Śri Śaṅkaracārya, along with their commentaries, is an off shoot of the twelve prakaraṇs (prakaraṇadvādaśī) issued by Mahesh Research Institute, as its 19th gem of the Advaitagrantha-ratna-mañjūṣā. It may be mentioned that Ātmabodhaṭīkā is stated to be from the pen of Śrī Padmapādācārya. a learned disciple of Śrī Śaṅkarācārya. The same commentary is printed and published in Calcutta as a work of Śrī Madhusūdanasaraswatī. The commentary of Śrī Ānandagiri the celebrated commentator of all Bhāṣyas of Śrī Śaṅkara, and also of Padārthatattvanirṇaya, Nyāyatattvadīpāvalī etc. is published for I. Vākyavṛtti II.Atmajñānopadeśavidhi III.Tripurī and IV.Swarūpanirūpaṇa. For Manīṣāpañcaka Śrī Bālagopālendramuni's commentary is published along with that of Sadāsivendrasarawatī. The Upadeśapañcaka contains Sadāsiva's and Bālakṛṣṇānandasaraswati comments. Aparokṣānubhūti has Śrī Vidyāranya's commentary.

Śrī Śaṅkarācārya's aim in writing prakaranas, apart from the Bhāṣyas, is to educate in Vedāntic knowledge, persons less proficient in various śāstras. What the Brahmasūtrabhāṣya, and the other commentaries have arrived at, after long labyrinth, is elaborately elucideted in the prakaraṇa, through simple examples. Moreover the threefold Upāsanās of Pratīka, Ahaṅgraha and Karmāngavabaddha, though condueivc to Mokṣa by steps are not direc!aly connected with Brahman realization. and hence the great Bhāṣyakāra omits them in prakaraṇs, and the four Sādhanas of Viveka, Vairagya, the six qualities of Śama, Dama etc. and desire to Mokṣa. These Sādhanas directly help the adept in realising the self. The unreality of the universe is another important factor essential for understanding Advaita which is also dealt with here.

The real nature of Jīva as distinct from the five sheaths (koṣas), and the real nature of Brahman which is asaṅga, not at all connedetd with any matter or quality, are examined, and the oneness of Jīva with Brahman is confirmed in these prakaraṇas.

These eight prakarṇas are bound in one volume and made avāilable, by the Sansthān to those interested in Advaita.

Editor
S. S. Śāstrī

श्रीशङ्करभगवत्पादाचार्यविरचिता

अपरोक्षानुभूतिः

श्रीमद्विद्यारण्यस्वामिविरचितदीपिकोपेता

ॐ

तत्सत्परमात्मने नमः

श्रीमच्छङ्करभगवत्पादाचार्यविरचिता

अपरोक्षानुभूतिः

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥

श्रीमद्विद्यारण्यस्वामिविरचिता दीपिका

स्वप्रकाशश्च हेतुर्यः परमात्मा चिदात्मकः ।
अपरोक्षानुभूत्याख्यः सोऽहमस्मि परं सुखम् ॥ १ ॥
ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः ।
औपाधिकः स्वचिन्मात्रः सोऽपरोक्षानुभूतिकः ॥ २ ॥
तदेवमनुसन्धाय निर्विघ्नां स्वेष्टदेवताम् ।
अपरोक्षानुभूत्याख्यामाचार्योक्ति प्रकाशये ॥ ३ ॥
यद्यपीयं स्वतः स्पष्टा तथापि स्वात्मसिद्धये ।
यत्नोऽयं सोऽपि संक्षेपात्क्रियतेऽनर्थनाशनः ॥ ४ ॥
क्वाहमुल्काकरः क्वायं सूर्यस्तेजोनिधिः किल ।
तथापि भक्तिमान्कः किं न कुर्यात्स्वहिताप्तये ॥ ५ ॥

तत्राचार्याः स्वेष्टपरदेवताऽनुसन्धानलक्षणं मंगलं निर्विघ्नग्रन्थसमाप्तये स्वमनसि कृत्वा शिष्यशिक्षायै ग्रन्थादौ निबध्नन्ति—**श्रीहरिमिति**। अहं तं नमामीत्यन्वयः। अत्रेयं प्रक्रिया—पदार्थो द्विविधः—आत्माऽनात्मा चेति। तत्रात्मा द्विविधः—ईश्वरो जीवश्चेति। एतावपि द्विविधौ शुद्धाऽशुद्धभेदात्। तत्राऽशुद्धौ मायाऽविद्योपाधित्वेन भेदव्यवहारहेतू, शुद्धौ त्वभेदव्यवहारहेतू। तथाऽनात्मापि त्रिविधः कारणसूक्ष्मस्थूलभेदात्। एतदेव शरीरत्रयमिति व्यवह्रियते। एवं चिज्जडरूपवैलक्षण्यात्तमःप्रकाशयोरिव विभक्तयोरुभयोरात्मानात्मनोरविवेक एव बन्धकारणम्। तयोर्विवेकस्तु मोक्षकारणमिति दिक्। तत्र तावदहंशब्देन देहत्रयविशिष्टत्वेनाशुद्धो जीवः अस्यैऽवाकृष्टत्वात् तं नमामि, तं मायातत्कार्यहन्तृत्वेऽपि तदाश्रयभूतत्वेन सर्वकारणं वेदान्तप्रसिद्धमीश्वरम्। एतस्यैव सर्वोत्कृष्टत्वात् नमामि नमस्करोमि स्वात्मत्वेनानुसन्दधामीत्यर्थः। तस्यैव सर्वोत्कृष्टत्वेनानुसन्धानयोग्यत्वमाह—**श्रीहरिमिति**। श्रियं दधानमित्यर्थः। यद्वा—स्वाश्रयतया श्रियते स्वीक्रियते प्रलयसुषुप्त्यादौ सर्वभूतैरिति श्रीर्जीवत्वोपाधिभूताऽविद्या तां हरत्यात्मज्ञानप्रदानेन नाशयतीति श्रीहरिस्तम्। यद्वा—स एव सर्वाधिष्ठानतया श्रीरित्युच्यते। श्रीरेव हरिस्तम्। ननु किमनेनाऽविद्यातत्कार्यहरणेनेत्याशङ्क्य परमपुरुषार्थप्राप्तिर्भवतीति सूचयितुं तस्य परमानन्दरूपतामाह—**परमानन्दमिति**। परमोऽविनाशित्वनिरतिशयत्वाभ्या-

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं च भवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥

मुत्कृष्ट आनन्दः सुखविशेषस्तद्रूपमित्यर्थः । तर्हि वैषयिकसुखवज्जडः स्यादित्यत आह—**उपदेष्टारमिति** । आचार्यद्वारात्मसुखोपदेशकं चिद्रूपमित्यर्थः । ननु केवलानन्दस्य कथमुपदेष्टृत्वमित्यत आह—**ईश्वरमिति** । ईष्टेऽसावीश्वरः विचित्रशक्तित्वात्सर्वसमर्थस्तं नमामीत्यन्वयः । एवमपि परिच्छन्नत्वात् घटादिवदनात्मत्वं स्यादित्यत आह—**व्यापकमिति** । स्वसत्ताप्रकाशाभ्यां नामरूपे व्याप्नोति स व्यापकस्तं परिच्छेदकस्य देशकालादेर्मायिकत्वादनन्तमित्यर्थः । ननु व्याप्यव्यापकभावेनानन्तत्वमसिद्धमित्यत आह—**सर्वलोकानां कारणमिति** । अभिन्ननिमित्तोपादानमित्यर्थः । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आत्मनात्मानमभिसंविवेशे'त्यादिश्रुतेः ॥ १ ॥

इदानीं प्रेक्षावत्प्रवृत्तयेऽनुबन्धचतुष्टयं दर्शयन् स्वचिकीर्षितं प्रतिजानीते—**अपरोक्षेति** । वै इत्यव्ययेन विद्वदनुभवं प्रमाणयति । तथाचायमर्थः—विद्वदनुभवप्रसिद्धा या तत्त्वमस्यादिमहावाक्यश्रवणजा प्रत्यगभिन्नब्रह्मविषया अपरोक्षानुभूतिः=अक्षाणामिन्द्रियाणां परमतीतं न भवतीत्यपरोक्षमिन्द्रियाधिष्ठानतत्प्रकाशत्वाभ्यां नित्यप्रत्यक्षस्वप्रकाशात्मतत्त्वं तस्यानुभूतिर्वृत्त्यारूढाखण्डता। यद्वा—अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्याऽपरपर्यायो ब्रह्मसाक्षात्कारः । तत्साधनग्रन्थोऽप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्यते । झटित्यवलोकनमात्रेणैवोत्तमाधिकारिणां ब्रह्मात्मसाक्षात्कारकारणं ग्रन्थविशेष इत्यर्थः । अनेन नित्यापरोक्षब्रह्मात्मतत्त्वविषयो यो दर्शितः स प्रोच्यते=प्रकर्षेण तत्तदाशङ्कानिराकरणपूर्वकं सिद्धान्तरहस्यप्रदर्शनरूपेणोच्यते, कथ्यत इत्यर्थः । अस्माभिः पूर्वाचार्यैरित्यर्थादध्याहारः । ननु प्रायः 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते' इति न्यायान्नारम्भणीयो ग्रन्थ इत्याशङ्क्य प्रयोजनमाह—**मोक्षसिद्धय इति** । मोक्षो नाम स्वाविद्याकल्पितानात्मदेहाद्यात्मत्वाभिमानरूपबन्धनिवृत्तिद्वारा स्वस्वरूपावस्थानं तस्य सिद्धिः प्राप्तिस्तदर्थम् । अनेन सर्वानर्थनिवृत्तिद्वारा परमानन्दावाप्तिरूपं प्रयोजनं दर्शितम् । किंलक्षणाऽपरोक्षाऽनुभूतिः ? सद्भिः=साधुभिर्नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नैर्मुमुक्षुभिरित्यर्थः । एवशब्दान्नान्यैः कर्मोपासनाधिकारिभिरितिभावः । मुहुर्मुहुर्नैरन्तर्यदीर्घकालाभ्यासप्रयत्नेन स्नानभिक्षादावप्यनादरं कृत्वेत्यर्थः । वीक्षणीया गुरुमुखादवगत्य विचारणीया । अनेन मुमुक्षुरधिकारी दर्शितः । एतेनैवार्थात् पूर्वकाण्डोत्तरकाण्डयोः साध्यसाधनभावः सम्बन्धश्च दर्शितो भवतीति बोद्धव्यम् ॥ २ ॥

ननु कार्यस्य कारणाधीनत्वात् पूर्वोक्तसाधनचतुष्टयस्य किं कारणमित्याशङ्क्याह—**स्ववर्णेति** । अत्र स्वशब्देन मुख्यगौणमिथ्याभेदेन त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेष्वात्मसु मध्ये मिथ्यात्मायोग्यत्वाद् गृह्यते । तस्य देहादेर्ब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमप्रयुक्तेन धर्मेण ब्रह्मार्पणकृतकर्मानुष्ठानजन्येनाऽपूर्वेण पूर्वमीमांसाप्रसिद्धेन भाविफलाधारभूतेन पुण्यादिशब्दवाच्येनेत्यर्थः । तथा तपसा कृच्छ्रचान्द्रायणादिना प्रायश्चित्तेनेत्यर्थः । पुनः हरितोषणाद्भगवत्प्रीतिकरात्सर्वभूतदयालक्षणात् कर्मविशेषात् । एतैस्त्रिभिः साधनैः वैराग्यादिचतुष्टयरूपं साधनं मोक्षसाधको धर्मविशेषः पुंसां प्रभवेत् ।

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ४ ॥

नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् ।
एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५ ॥

सदैव वासनात्यागः शमोऽयमिति शब्दितः ।
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥

सम्भावनायां लिङ् । यद्वैवमन्वयः--स्ववर्णाश्रमधर्मरूपेण तपसा कृत्वा यद्धरितोषणं तस्मादिति । यद्यपि साधनचतुष्टयस्य विवेकादिक्रमेण हेतुहेतुमद्भावस्तथापि वैराग्यस्यासाधारणकारणतां द्योतयितुमादौ ग्रहणं कृतमिति बोद्धव्यम् ॥ ३ ॥

कीदृशं तद्वैराग्यादिचतुष्टयमित्याकाङ्क्षायां तत्स्वयमेव व्याचष्टे–'ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुता' इत्यन्तेन श्लोकषट्कात्मकेन ग्रन्थेन । तत्रादौ वैराग्यस्य लक्षणमाह—**ब्रह्मादिस्थावरान्तेष्विति** । ब्रह्मादिस्थावरान्तेषु सत्यलोकादिमर्त्यलोकान्तेषु साधनेषु अनु–कर्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः । वैराग्यं–इच्छाराहित्यम् । तत्र दृष्टान्तमाह—**यथैवेति** । यथैव काकविष्ठायां वैराग्यं गर्दभादिविष्ठायामपि कदाचित् कस्यचित् ज्वरशान्त्यर्थं ग्रहणेच्छा भवति अतः काकविष्ठाया ग्रहणम् । उपलक्षणमेतत् वान्त्यादीनाम् विषयेष्विच्छानुदये वैराग्यस्य हेतुगर्भितं विशेषणमाह—**तदिति** । हि यस्मात्तद्वैराग्यं निर्मलं रागादिमलरहितम् ॥ ४ ॥

इदानीं वैराग्यकारणं विवेकं लक्षयति—**नित्यमिति** । वै प्रसिद्धं सः वस्तुनः पदार्थस्य विवेको विवेचनविशेषो ज्ञेयः । सः क इत्यत आह—**एवमिति** । य एवंप्रकारेण सम्यक् संशयादिशून्यो निश्चयः । एवं कथमित्यत आह—**नित्यमिति** । हीति विद्वदनुभवप्रसिद्धमात्मस्वरूपं नित्यमविनाशि अबाध्यं सत्यमित्यर्थः । 'अविनाशी वा अरेऽयमात्मा' इति श्रुतेः । दृश्यमनात्मस्वरूपं तद्विपरीतगं तदात्मस्वरूपं तस्माद्विपरीतत्वेन गच्छति प्राप्नोति व्यवहारभूमिमिति तथाविधं विनाशि बाध्यमित्यर्थः । अत्रेदमनुमानमपि सूचितं भवति—'आत्मस्वरूपं नित्यं द्रष्टृत्वात् यन्न नित्यं तन्न द्रष्टृ, यथा घटादीति; केवलव्यतिरेकी हेतुः । तथाऽनात्मस्वरूपमनित्यं दृश्यत्वात्, यन्नानित्यं तन्न दृश्यं, यथात्मस्वरूपमित्ययमपि केवलव्यतिरेकी हेतुः' ॥ ५ ॥

तदेवं वैराग्यकारणं विवेकं व्याख्याय वैराग्यकार्यं शमादिषट्कं लक्षयति—**सदैवेत्यादित्रिभिः** श्लोकैः । सदैव सर्वस्मिन्नपि काले वासनात्यागः पूर्वसंस्कारापेक्षाऽयं शम इति शब्दितः । अन्तःकरणनिग्रहः शमशब्दार्थः । बाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिद्धप्रवृत्तितिरस्कारो दम इति–शब्देनाभिधीयते कथ्यते ॥ ६ ॥

विषयेभ्य इति । हीति प्रसिद्धेभ्यो बन्धकेभ्यः शब्दादिभ्यो या परावृत्तिर्निवृत्तिरनित्यत्वादिदोषदर्शनेन ग्रहणानिच्छा सोपरतिरुच्यत इत्यर्थः । कीदृशी सेत्यत आह–**परमेति** । परम् उत्कृष्ट-

निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ।
चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम् ॥ ८ ॥

संसारबन्धनिर्मुक्तिः कथं मे स्यात्कदा विधे ।
इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥

उक्तसाधनयुक्तेन विचारः पुरुषेण हि ।
कर्त्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥

नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः ।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥ ११ ॥

मात्मज्ञानं यस्याः सकाशाज्जायते सा परमा, आत्मज्ञानसाधनभूतेत्यर्थः। अनया सर्वकर्मसंन्यासो लक्ष्यते। किञ्च सहनमिति सर्वदुःखानां सर्वदुःखसाधनानां शीतोष्णादिद्वन्द्वानां यत्सहनं प्रतीकारानिच्छा सा शुभा सुखरूपा तितिक्षा मता विदुषामित्यर्थः ॥ ७ ॥

निगमेति। निगमाचार्यवाक्येषु—वेदगुरुवचनेषु, यद्वा उपनिषद्व्याख्यात्रुपदेशेषु भक्तिर्भजनं विश्वास इत्यर्थः। सा श्रद्धेति विश्रुता वेदान्तप्रसिद्धा। तु पुनः सल्लक्ष्ये 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतिलक्ष्ये प्रत्यगभिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञासेत्यर्थः, तत्समाधानमिति स्मृतम् ॥ ८ ॥

एवं शमादिषट्कमभिधायैतत्कार्यभूतां मुमुक्षुतामाह—**संसारबन्धेति**। इति या सुदृढा बुद्धिः सा मुमुक्षुता वक्तव्येत्यन्वयः। सा केत्यत आह—**संसारेति**। भो विधे मद्दैव, यद्वा सर्वकर्तविधातब्रंह्मन्! मे मम संसारबन्धनिर्मुक्तिर्नानायोनिसम्बन्धनिवृत्तिः कदा कस्मिन् काले कथं केन प्रकारेण भवेदित्येवंरूपा बुद्धिर्मुमुक्षुतेत्यर्थः ॥ ९ ॥

इदं साधनचतुष्टयं यदर्थमुपन्यस्तं तदिदानीं दर्शयति—**उक्तेति**। उक्तानि—ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुतेत्यन्तग्रन्थसन्दर्भेण वर्णितानि यानि वैराग्यादिसाधनानि ज्ञानोपकरणानि तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन हीति विद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्षणः। यद्वा हीत्यव्ययमेवार्थेऽन्यनिषेधार्थं इत्यर्थः। विचारो विवेकः कर्तव्य आवर्त्तयितव्यः। किमर्थमित्यत आह—**ज्ञानसिद्ध्यर्थमिति**। आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबोधोद्भवनाय। नन्वात्मज्ञानसिद्ध्या कः पुरुषार्थं इत्याशङ्क्य मोक्षाख्यं चतुर्थपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि—**शुभमिति**। शुभं परमानन्दरूपत्वेन मङ्गलं मोक्षसुखमित्यर्थः। इच्छता प्रार्थयता। आत्मनः शुभमिति वान्वयः ॥ १० ॥

ननु ज्ञानसिद्ध्यर्थं विचार एव कर्तव्य इति नियमः कुतः क्रियत इत्याशङ्क्य सदृष्टान्तमाह—**नोत्पद्यत इति**। विचारेण विना अन्यसाधनैः कर्मोपासनालक्षणैः ज्ञानं नोत्पद्यते। तत्र दृष्टान्तमाह—**यथेति**। यथा क्वचित्कस्मिंश्चद्देशे सूर्यादिप्रकाशेन विना पदार्थभानं घटादिवस्तुप्रकाशो न भवति। हीति सर्वजनप्रसिद्धम्। अतो नियमः क्रियत इति भावः ॥ ११ ॥

कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥

नाहं भूतगणो देहो नाहं चाक्षगणस्तथा ।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः ॥ १३ ॥

अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते ।
सङ्कल्पो विविधः कर्त्ता विचारः सोऽयमीदृशः ॥ १४ ॥

एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् ।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥ १५ ॥

तर्हि स विचारः कीदृश इत्यत आह—**कोऽहमिति** । अहं कर्ता सुखीत्यादिव्यवह्रियमाणः कः किंस्वरूपः तथा इदं जगत् स्थावरजङ्गमात्मकं कथं कस्माज्जातम् । किमधिष्ठानमित्यर्थः । तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य जगतः कर्त्तोत्पादकः को विद्यते । वै इति विकल्पं द्योतयति । किं जीवदृष्टं कर्तृ किं वेश्वरः किं वान्यदेव किञ्चिदिति विकल्पः । किञ्चेह जगति उपादानं घटस्य मृद्वत् किमस्ति ? अयमात्मा जगत्कारणविषयः ईदृश एवंस्वरूपो विचारः । स एव ज्ञानसाधनमित्यर्थः ॥ १२ ॥

ननु 'चैतन्यविशिष्टः कायः पुरुष' इति बार्हस्पत्यसूत्राद्देहाकारेण परिणतानि पृथिव्यादिचत्वारि भूतान्येवात्मेति **चार्वाकाः** वदन्ति । स एव कर्ता सुखीत्यादिसर्वव्यवहारमूलमिति सर्वजनप्रसिद्धौ सत्यामात्मविषयो विचारो न स्यादित्यत आह—**नाहमिति** । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा भूतगणो यो देहः स न भवामि, तस्य घटादिवद् दृश्यत्वादित्यर्थः । 'तर्हीन्द्रियगणस्त्वं स्या' इति चार्वाकैकदेशिमतमुत्थाप्य दूषयति—**नाहं चेति** । च पुनरक्षगणः = श्रोत्रादीन्द्रियसङ्घातोऽप्यहं न भवामि । तथेतिपदेन देहवदिन्द्रियगणस्यापि भूतविकारत्वं दर्शितम् । 'स वा एष पुरुषोऽन्नरसमयः अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इत्यादिश्रुतिरुभयत्र प्रमाणम् । ननु यदि देहद्वयं त्वं नासि तर्हि शून्यमेव स्यादित्याशङ्क्याह—**एतदिति** । एतद्विलक्षणः = एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्मकोऽस्मि । 'अस्थूलमनण्वह्रस्वम्' इत्यादिश्रुतेः । **कश्चिदिति** । जात्यादिरहितत्वान्मनोवाचामगोचरत्वं दर्शितम् । अयमीदृशः स विचार इति व्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेऽपि बोद्धव्यः ॥ १३ ॥

तदेवं कोऽहमित्येतन्निश्चित्येदानीं कथमिदं जातमित्यस्य निश्चयः क्रियते । तत्र 'पृथिव्यादिभूतानि कार्यत्वात्स्वस्वपरमाणुभ्यो जायन्ते' इति **तार्किकादयो** मन्यन्ते । 'कर्मणो जायन्ते इति **मीमांसकाः** । 'प्रधानादेव' इति **साङ्ख्याः** । तदेतन्निराकुर्वन्नाह—**अज्ञानेति** । सर्वं जगदिदं नामरूपात्मकमज्ञानप्रभवमज्ञानात्पूर्वोक्तस्वस्वरूपास्फुरणात्प्रभवति । तथाविधम्, अत एवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इव प्रकाशेन प्रविलीयते, निश्शेषलीनं भवतीत्यर्थः । को वै कर्तेत्यस्य निर्णयमाह—**सङ्कल्प इति** । विविधो नानाप्रकारः सङ्कल्पः इदं करिष्यामीत्यादिलक्षणोऽन्तःकरणपरिणामः । कारणानुकूलव्यापारवान् कर्त्ता । शेषं पूर्वोक्तम् ॥ १४ ॥

अथोपादानं किमस्तीत्यस्य निर्णयमाह—**एतयोरिति** । एतयोरज्ञानसङ्कल्पयोर्यदुपादानं उत्पत्ति-

अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः ।
तदहं नात्र सन्देहो विचारः सोऽयमीदृशः ॥ १६ ॥

आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १७ ॥

आत्मा नियामकश्चान्तर्देहो बाह्यो नियम्यकः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १८ ॥

स्थितिनाशाय कारणं तत्तु सत्कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः । अत एवाधिष्ठानज्ञाननिर्वृत्त्याऽज्ञानकार्यत्वेन मिथ्याभूतमपि जगत् यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदिति भावः । ब्रह्मणः सत्त्वे हेतुः—**अव्ययमिति** । अव्ययमपक्षयरहितम् । अनेनैतत्पूर्वभूता अपि जन्मादिविकारा निरस्ताः, नाशश्च निरस्तः । षड्भावविकारराहित्ये हेतुः एकं सजातीयादिभेदशून्यम् । तद्धि कुतो न दृश्यते तत्राह—**सूक्ष्ममिति** । सूक्ष्मं मनोवागादीन्द्रियागोचरम् । तेषां प्रवृत्तिनिमित्तजातिक्रियादिशून्यत्वादित्यर्थः । ब्रह्मण उपादानत्वे दृष्टान्तमाह—**यथैवेति** । यथैव मृद्घटादीनामुपादानं तथैवेत्यर्थः । एवंप्रकारेण कार्यकारणभेदो नाममात्रमिति सूचितम् ॥ १५ ॥

ननु यद्यपि कार्यकारणभेदो वाचारम्भणमात्रस्तथापि जीवब्रह्मणोर्भेदो वास्तवः स्यादित्याशङ्क्याह—**अहमिति** । अत्र यत इत्यध्याहारः । तथाचायमर्थः—यतोऽहमहंप्रत्ययवेद्योऽप्येकः सजातीयादिभेदशून्यः । मनुष्यमात्रेऽप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः । च पुनः सूक्ष्म इन्द्रियागोचरः । पुनर्ज्ञाताऽहङ्कारादिप्रकाशकत्वेन चेतन इत्यर्थः । तथा साक्षी—साक्षादिन्द्रियार्थसन्निकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी; निर्विकार इत्यर्थः । अत एव सदव्ययः संश्चासावव्ययश्च, विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः । यस्मादेवंभूतोऽहं तत्तस्मादहमहंप्रत्ययवेद्यस्तत्सत्यज्ञानादिलक्षणं ब्रह्म अत्र सन्देहो नास्तीत्यर्थः । सोऽयमीदृशो विचार इति ॥ १६ ॥

एतदेव जीवब्रह्मैक्यमज्ञानप्रदर्शनेन द्रढयति—**आत्मेत्यादिपञ्चभिः** । यतोऽप्रत्ययवेद्य आत्मा—अतति सन्ततभावेन जाग्रदादिसर्वावस्थास्वनुवर्तत इत्यात्मा, अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्वरूप इत्यर्थः । स त्वंपदलक्ष्यार्थोऽपि तत्पदलक्ष्यार्थ एव । विनिष्कलो विशेषेण निर्गतकलो निरवयवय इत्यर्थः । अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरितिभावः । अत्र हेतुः—**एकः** । **हीति** 'एकमेवाद्वितीयम्' इत्यादिश्रुतिप्रसिद्धिं द्योतयति । ननु तथा लिङ्गदेहोप्यस्तीति चेन्नेत्याह—**देह इति** । देहो लिङ्गदेहः सूक्ष्मशरीरमिति यावत् । स बहुभिः कलाभिः श्रोत्रादिबुद्ध्यन्ताभिः सप्तदशभिरावृतः आच्छादितस्तत्सङ्घात इत्यर्थः। अत एव लिङ्गदेहस्य निरवयवत्वाद्यभावात् ज्ञानेन तत्कारणाज्ञाननिवृत्तौ निवृत्तिरन्यथाऽनिर्मोक्षप्रसङ्ग इति भावः । एवमतिवैलक्षण्ये सत्यपि तयोरात्मदेहयोः प्रकाशतमसोरिवैक्यमैकात्म्यं प्रपश्यन्ति तार्किकादय इत्यर्थः । अतो विपरीतदर्शनात्परमन्यदज्ञानं किमस्ति एतदेवाज्ञानमित्यर्थः । विपर्ययरूपकर्मान्यथानुपपत्त्या तत्कारणं मूलाऽज्ञानं कल्प्यत इति भावः ॥ १७ ॥

पुनर्वैलक्षण्यमाह—**आत्मेति** । आत्मा नियामको नियन्ता । च पुनरन्तः पञ्चकोशान्तरः देहस्तु नियम्यः सन् बाह्यः । तयोरैक्यमित्युत्तरार्द्धं व्याख्यातम् । एवमग्रेऽपि ज्ञेयम् ॥ १८ ॥

आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १९ ॥

आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २० ॥

आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २१ ॥

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥

अन्यदपि वैलक्षण्यमाह—**आत्मेति** । आत्मा ज्ञानमयः प्रकाशरूपोऽत एव पुण्यः शुद्धः, देहस्तु मांसादिविकारवानत एवाऽशुचिः । एतेनात्मनः स्थूलदेहादपि वैलक्षण्यमुक्तं भवति । तयोरैक्यमित्यादि पूर्ववत् ॥ १९ ॥

वैलक्षण्यान्तरमाह—**आत्मेति** । आत्मा स्वयंप्रकाशः सन् सूर्यादिवदन्यसर्वप्रकाशकोऽत एव स्वच्छः, प्रकाश्यगुणदोषसम्बन्धशून्य इत्यर्थः । 'असङ्गो ह्ययं पुरुष' इति श्रुतेः । देहस्तु तामसो घटादिवत्प्रकाश्यत्वेन जडः । तयोरैक्यमित्यादि पूर्ववत् ॥ २० ॥

अत्र सर्वत्र पौनरुक्त्यं नाशङ्कनीयम् । आत्मनोऽलौकिकत्वेनात्यन्तदुर्बोधत्वादेव बहुधा वैलक्षण्यं प्रदर्श्यते परमकारुणिकैः श्रीमदाचार्यैः—**आत्मेति** । आत्मा नित्यो ध्वंसाप्रतियोगी । तत्र हेतुः—हि यस्मात्सद्रूपः अबाध्यस्वरूपः, देहस्तु ध्वंसप्रतियोगी । अत्रापि हेतुः—हि यस्मादसन्मयोऽनित्यः विकारित्वेन बाधयोग्य इत्यर्थः । यस्मादेवमात्मदेहयोरत्यन्तवैलक्षण्यं तस्मात्तयोरैक्यदर्शनं केवलमज्ञानमिति ॥ २१ ॥

नन्वात्मनः प्रकाशत्वं किं नामेत्यत आह—**आत्मन इति** । आत्मनस्तत् प्रकाशत्वं बोद्धव्यम् ! किं तदित्यत आह—**यदिति** । यदिति यत्पदार्थावभासनं घटपटादिवस्तुविषयप्रकाश इदन्तया निर्दिश्यमानविषयदर्शनमिति यावत् । तर्ह्यग्न्यादिप्रकाशवद्विकारित्वं स्यादित्यत आह—**नाग्न्यादिदीप्तिवद्दीप्तिरिति** । इयमात्मदीप्तिरग्न्यादिदीप्तिवन्न, कदाचिदुत्पत्तिविनाशादिविकारवती नेत्यर्थः । तत्र हेतुमाह-**भवतीति** । भवत्यान्ध्यं यतो निशि–यतः कारणान्निशि रात्रावग्न्यादिप्रकाश एकस्मिन्देशे सत्यपि तदन्यत्र लोकस्यान्ध्यं रूपग्रहाक्षमत्वं भवति नैतादृश्यात्मदीप्तिरेकत्र विद्यमाना चैकत्राऽविद्यमाना परिच्छिन्ना चास्ति; किन्तु दीपादिरूपस्याग्न्यादिप्रकाशस्य प्रकाशिका, तदभावे चान्धकारस्य प्रकाशिका उत्पत्तिनाशरहिता च सदा सर्वत्र पूर्णैवास्ति । यद्वा इयमात्मदीप्तिरग्न्यादिदीप्तिसदृशी न, कुतः ? यतः कारणान्निशि रात्रावान्ध्यमन्धकारो भवत्यतस्तद्विलक्षणाऽऽत्मदीप्तिर्ज्ञेया । यद्यात्मदीप्तिरग्न्यादिदीप्तिसदृशी भवेत्तर्ह्यग्न्यादिदीप्त्या यथान्धकारस्य नाशो भवति तथाऽऽत्मदीप्त्याऽप्यन्धकारस्य नाशः स्यात् । परन्त्वात्मनः सत्ताप्रकाशाभ्यां सर्वत्र सर्वदा विद्यमानत्वेऽप्यन्धकारस्य नाशो न भवत्यत आत्मदीप्तिरग्न्यादिदीप्तिसदृशी न, किन्तु इयमग्न्यादिदीप्तिर्भातीदमान्ध्यं भातीत्याद्याकारेण

देहोऽहमित्ययं मूढो धृत्वा तिष्ठत्यहो जनः ।
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥

ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥

निर्विकारो निराकारो निरवद्योऽहमव्ययः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥

अग्न्यादिदीप्तेरान्ध्यस्य चान्यस्य सर्वस्य च प्रकाशिका चाविरोधिन्यात्मदीप्तिः स्वप्रकाशैवाभ्युपेतव्या सर्वैरात्मज्ञानारूढैरित्यर्थः । तस्मादग्न्यादिदीप्तीनामपि दीपिकाऽन्यसाधननिरपेक्षा या दीप्तिः सा आत्मप्रकाश इति भावः ॥ २२ ॥

तदेवं प्रकाश्यप्रकाशकत्वादिलक्षणवैलक्षण्ये सत्यपि आत्मानात्मभेददर्शितमुपसंहरन्नुभयोर्भेदं स्पष्टयति—**देह इति** । अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्माऽयमिदन्तया निर्दिश्यमानो घटादिवत्प्रत्यक्षतया दृश्यमानो देहोऽस्मीति उभयोर्द्रष्टृदृश्ययोरैक्यं कृत्वा मूढः–स्वाज्ञानकार्यविपर्ययमोहव्याप्तो जनस्तिष्ठति, कृतकृत्यबुद्ध्या निर्व्यापारो भवतीत्यर्थः । एतदहो ! महदज्ञानमिति भावः । किं कृत्वापीत्यत आह–**ममेति** । मम मत्सम्बन्धी अयं देह इति सामान्यतो भेदं ज्ञात्वापि । अत एवाश्चर्यमिति तात्पर्यम् । क इव सर्वदा घटद्रष्टेव । यथा सर्वकाले घटद्रष्टा पुरुषो 'ममायं घट' इति जानाति न तु 'अहं घट' इति कदाचिदपि जानातीत्यर्थः ॥ २३ ॥

नन्वतस्मिंस्तद्बुद्धिरितिलक्षणभ्रमापरपर्यायमोहकार्यलिङ्गानुमेयमज्ञानमीदृक् तर्हि तन्निवर्तकं किमित्याकाङ्क्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह—**ब्रह्मेत्यादिपञ्चभिः** । अहम् अहंशब्दप्रत्ययालम्बनः प्रत्यागात्मा ब्रह्मैवास्मि । एतयोस्तत्त्वंपदार्थयोरैक्ये हेतुगर्भितानि विशेषणान्याह—**सम इति** । समः सत्ताप्रकाशाभ्यां सर्वाभिन्नः । पुनः किंलक्षणः । **शान्तः**—निरस्तसमस्तोपाधित्वाद् विक्षेपादिविकारशून्यः । पुनः किंलक्षणः । **सच्चिदानन्दलक्षणः** सच्चिदानन्दैरनृतजडदुःखप्रतियोगिभिर्लक्ष्यते, विरुद्धांशत्यागरूपया भागलक्षणया ज्ञायत इति सच्चिदानन्दलक्षणः । ब्रह्मबोधे हि द्विविधं द्वारम्–विधिर्निषेधश्चेति । तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः । इदानीमतन्निरसनलक्षणो निषेधः प्रदर्श्यते—**नाहमिति** । अहमहंशब्दप्रत्ययालम्बन आत्मा देहो नेत्यन्वयः । देह इत्युपलक्षणं प्राणेन्द्रियादीनामपि । **हीति** विद्वज्जनप्रसिद्धम् । देहादेरनात्मत्वे हेतुमाह—**असदिति** । असद्रूपोऽसद्बोध्यमनृतं तादृग्रूपं स्वरूपं यस्य स तथाविधः । इत्येवंप्रकारम् 'अहं ब्रह्मास्मि' इत्यादिमहावाक्यजन्याऽखण्डाकारबुद्धिरूपं ज्ञानं बुधैरात्मतत्त्वज्ञैरुच्यते, कथ्यत इत्यर्थः । एतद्विलक्षणः सर्वो ज्ञानाभास इति भावः ॥ २४ ॥

नन्वहं जातो मृतः सुखी दुःखीत्याद्यनेकविकारत्वेनाहंशब्दप्रत्ययालम्बनस्य प्रतीयमानत्वात् कथं तस्य ब्रह्मत्वमित्यत आह—**निर्विकार इति**। अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा निर्विकारोऽस्मीति शेषः । निर्गता विकारा जन्मादयो यस्मात् स तथाविधः । तेषां देहधर्मत्वादिति भावः । तत्र हेतुः—निराकारः देहाद्याकाररहितः । अत एव निरवद्यो वातपित्तादिजन्याध्यात्मिकादितापत्रयरहितः

निरामयो निराभासो निर्विकल्पोऽहमाततः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २६ ॥

निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥

निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २८ ॥

स्वदेहे शोभनं सन्तं पुरुषाख्यं च सम्मतम् ।
किं मूर्ख ! शून्यमात्मानं देहातीतं करोषि भोः ॥ २९ ॥

स्वात्मानं शृणु मूर्ख ! त्वं श्रुत्या युक्त्या च पूरुषम् ।
देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥ ३० ॥

इत्यर्थः । अत एवाऽव्ययः अपक्षयादिरहित इत्यर्थः । अहं मनुष्य इत्यादिप्रतीतेः कथं निर्विकारत्वमिति चेत् सा प्रतीतिः शुक्तिरजतादिवद् बाध्यत्वाद् भ्रान्तिरित्याह—**नाहमिति** । नाहमित्युत्तरार्द्धं व्याख्यातं पूर्वश्लोके । एवमुत्तरत्रापि ज्ञेयम् । पुनरुक्तिस्तु ज्ञानप्रतिबन्धकस्य बुद्धिमान्द्यविपर्ययादेर्दार्ढ्यान्नाशङ्कनीया ॥ २५ ॥

पुनः किंलक्षणं ज्ञानमित्यत आह—**निरामय इति** । अहं निरामयः सर्वरोगरहितः, निराभासो वृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वशून्यः, निर्विकल्पः कल्पनाहीनः, आततः व्यापकः ॥ २६ ॥

पुनः किंलक्षणं ज्ञानमित्यत आह—**निर्गुण इति** । अहं निर्गुणो—गुणरहितः, गुणानां मायामयत्वादित्यर्थः । अत एव निष्क्रियः—क्रियारहितः तथा नित्यो विनाशरहितः अत एव नित्यमुक्तः—कालत्रयेऽपि बन्धशून्यः । तत्र हेतुः—अच्युतः अप्रच्युतसच्चिदानन्दस्वभावः ॥ २७ ॥

पुनरपि ज्ञानलक्षणमाह—**निर्मल इति** । अहं निर्मलः अविद्यातत्कार्यलक्षणमलरहितः; अत एव निश्चलः व्यापकत्वादाकाशवन्निश्चल इत्यर्थः । निश्चलत्वे हेतुः—अनन्तः देशकालवस्तुपरिच्छेदशून्यः, शुद्धः अशुद्धिरहितः, पुनरजरः जरारहितः, अमरो मरणरहितश्च । सर्वधर्माणां देहत्रयवर्तित्वादिति भावः ॥ २८ ॥

नन्वात्मा प्रत्यक्षदेहरूपो न भवति तर्हि शून्यत्वमात्मनः स्यादित्याशङ्क्याह—**स्वदेह इति** । भो मूर्ख ! स्वदेहे पुरुषाख्यं पुरि मनुष्यशरीरे उषति अहमाकारेण वसतीति पुरुष इत्याख्या नाम यस्य तम् । अत एव शोभनं मङ्गलं शरीरविलक्षणत्वादतिमङ्गलं तथा सम्मतम् । 'अयमात्मा ब्रह्म' इत्यादिवाक्यनिर्णीतं चकारात् 'उत्तमः पुरुषस्त्वन्यः' इत्यादिस्मृतिनिर्णीतं घटद्रष्टृवद्देहद्रष्टृत्वेन देहातीतमात्मानं सततं भावं सन्तं सर्वव्यवहाराधिष्ठानं, शून्यं खपुष्पादिवत् अत्यन्ताभावरूपं किं करोषि कथं मन्यसे । मा मन्यथा इति भावः । क्वचित् 'स्वदेहम्' इति द्वितीयान्तः पाठस्तस्मिन् पक्षे देहात्मवाद्येव वदति । उक्तलक्षणं मनुष्यदेहं त्यक्त्वा, समानमन्यत् ॥ २९ ॥

ननु शून्यवादिन एवाभावापत्तेः शून्यं मास्तु, परन्त्वात्मनो देहातीतत्वे प्रमाणाभावाद्देह एवात्मा स्यादित्याशङ्क्याह—**स्वात्मानमिति** । भो मूर्ख देहात्मवादिन् चार्वाक ! त्वं स्वात्मानं

अहंशब्देन विख्यात एक एव स्थितः परः ।
स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥
अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ।
ममायमिति निर्देशात्कथं स्याद्देहकः पुमान् ॥ ३२ ॥
अहं विकारहीनस्तु देहो नित्यं विकारवान् ।
इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ॥ ३३ ॥
यस्मात्परमिति श्रुत्या तया पुरुषलक्षणम् ।
विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ ॥

स्वकीयमात्मानं पुरुषं देहातीतं देहातिरिक्तं श्रुत्या 'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा' इत्यादिकया, पुनर्युक्त्या च 'एकस्मिन्कर्तृकर्मविरोध' इत्यादिरूपया शृणु--अवधारय । देहातीतत्वे किमाकार आत्मेत्यत आह—**सदाकारमिति** । सदाकारमस्तीत्येतन्मात्रव्यवहारकारणभूत आकारो यस्य तम् । एवंविधोऽस्ति चेत्कुतो न दृश्यत इत्यत आह—**सुदुर्दर्शमिति** । भवादृशैः श्रुत्याचार्यश्रद्धाशून्यैः सुदुर्दर्शं सर्वथा दर्शनायोग्यम्, तस्यादृष्टरूपत्वादेवेत्यर्थः । यद्वा पूर्वश्लोकोक्तद्वितीयापेक्षया देहात्मवादिनः समाधानार्थोऽयं श्लोकः स्वात्मानमिति ॥ ३० ॥

तदेवाह—**अहमित्यादिसप्तभिः** । परः देहादन्य आत्मा अहंशब्देन । शब्द इत्युपलक्षणं प्रत्ययस्यापि । विख्यातः प्रसिद्धः । किंलक्षण इत्यत आह—**एक इति** । एक एव स्थितः । एवेति प्रत्येकमवधारणम् । तुशब्दः पूर्वोक्तादात्मनः स्थूलदेहस्य वैलक्षण्यद्योतकः । स्थूलो देहकः—देह एव देहकः । स्वार्थे कप्रत्ययः । कथं पुमान् पुरुषः आत्मा स्यान्न कथञ्चिदित्यर्थः । देहस्यानात्मत्वे हेतुमाह—**अनेकतामिति** । अनेकतां परस्परं भिन्नतां प्राप्तः । एवं तमःप्रकाशवदतिविलक्षणत्वेऽपि देहस्यात्मत्वं ब्रुवन्नतिमूढत्वादुपेक्ष्य इति भावः ॥ ३१ ॥

तदेवातिवैलक्षण्यं दर्शयति—**अहमिति** । अहमहंशब्दप्रत्ययालम्बन आत्मा द्रष्टृतया शब्दादिविषयप्रकाशकतया सिद्धः—शब्दं शृणोमीत्यादिव्यवहारेण प्रसिद्धः, देहस्तु दृश्यतया शब्दादिवत्प्रकाश्यतया स्थितः । तत्र हेतुमाह—**ममेति** । ममायं देह इति घटादिवत्स्वीयसम्बन्धितया निर्देशात्—व्यवहारात् । एवमुभयोर्वैलक्षण्ये सति कथं देहकः पुमान् स्यादिति व्याख्यातार्थश्चतुर्थपादः । एवमग्रेऽपि बोद्धव्यम् ॥ ३२ ॥

पुनर्वैलक्षण्यान्तरमाह—**अहमिति** । अहं (व्याख्यातार्थः) विकारहीनः—जायतेऽस्तीत्यादिषड्विकारहीनः । तु वैलक्षण्ये । देहो नित्यं सर्वकालं विकारवान् अत्र किं प्रमाणमत आह—**इतीति** । इति साक्षात् प्रत्यक्षप्रमाणेन प्रतीयते अनुभूयते । एवं सति कथं स्याद्देहकः पुमानिति ॥ ३३ ॥

एवं युक्त्वा देहात्मनोर्वैलक्षण्यमुक्त्वा श्रुत्याप्याह—**यस्मादिति** । 'यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' तया प्रसिद्धया तैत्तिरीयश्रुत्या । श्रुत्येति करणे तृतीया । पुरुषस्यात्मनो लक्षणम् । विमूढेन

सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ।
अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ॥ ३५ ॥

असङ्गः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च ।
अनन्तमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥ ३६ ॥

तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः ।
जडः परप्रकाश्योऽसौ कथं स्याद्देहकः पुमान् ॥ ३७ ॥

प्रोक्तोऽपि कर्मकाण्डेन ह्यात्मा देहाद्विलक्षणः ।
नित्यश्च तत्फलं भुङ्क्ते देहपातादनन्तरम् ॥ ३८ ॥

लिङ्गं चानेकसंयुक्तं चलं दृश्यं विकारि च ।
अव्यापकमसद्रूपं तत्कथं स्यात् पुमानयम् ॥ ३९ ॥

विगतमूढभावेनातिचतुरेण, श्रुत्यर्थविवेचनकुशलेनेत्यर्थः । इयं कर्तरि तृतीया । **विनिर्णीतं—विचार्य** स्थापितम् । अन्यत्पूर्ववत् । यद्वा—श्रुत्येति कर्तृपदम् । अस्मिन् पक्षे विमूढेनेति देहात्मवादिनं प्रति सम्बोधनम् । विमूढानां इन स्वामिन् । मूर्खशिरोमणित्वादेव श्रुतिं नाद्रियस इति भावः ॥ ३४ ॥

न केवलमनयैकया श्रुत्या विनिर्णीतं किंत्वन्ययापीत्याह—**सर्वमिति** । यत्तो हेतोः श्रुत्या वेदाख्यपरदेवतया 'पुरुष एवेदं सर्वम्' इति पुरुषसंज्ञिते सूक्तेऽप्युच्यते । पुरुषलक्षणमिति पूर्वश्लोकादध्याहारः । अतः कथं स्यादिति पूर्ववत् ॥ ३५ ॥

अपरयापि श्रुत्यैवमेव निर्णीतमित्याह—**असङ्ग इति** । 'असङ्गो ह्ययं पुरुषः' इति श्रुत्या बृहदारण्यके वाजसनेयोपनिषदि पुरुष असङ्गः प्रोक्तः । देहकस्त्वनन्तमलसंश्लिष्टः । कथं पुमान् स्यादिति प्राग्वत् ॥ ३६ ॥

तत्रैवान्यप्रकारेणापि देहात्मनोर्वैलक्षण्यं निरूपितमित्याह—**तत्रैवेति** । तत्रैव बृहदारण्यक एवेत्यर्थः । अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुत्या स्वयंज्योतिः पुरुषः समाख्यातः । हीति विद्वत्प्रसिद्धिं द्योतयति । असौ घटादिवद् दृश्योऽत एव परप्रकाश्यस्तत एव जडो देहकः कथं पुमान् स्यादिति व्याख्यातम् ॥ ३७ ॥

अथास्तामिदं ज्ञानकाण्डं कर्मकाण्डेऽपि देहात्मनोर्भेद एव निर्णीत इत्याह—**प्रोक्त इति** । हि यस्मात्कर्मकाण्डेनापि 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिरूपेण कर्मप्रतिपादकेन वेदभागेनेत्यर्थः । आत्मा देहाद्विलक्षणः प्रोक्तः । कथमित्यत आह—**नित्य इति** । नित्यत्वं च कुत इत्यत आह—**तदिति** । देहपातादनन्तरं तत्फलमनित्यं कर्मफलं यत आत्मा भुङ्क्तेऽतो नित्य इत्यर्थः । चकारात् न्याय-साङ्ख्यादावप्येवमेव देहात्मनोर्भेदो वर्णित इति दर्शितम् ॥ ३८ ॥

नन्वेवं सति वेदान्तिनामपसिद्धान्तः स्यादित्यत आह—**लिङ्गमिति** । लिङ्गं लिङ्गशरीरं तत्परोक्षादिधर्मविशिष्टम्, अयं नित्यापरोक्षस्वभावः पुमान् कथं स्यान्न कथञ्चिदित्यर्थः । चकारात् कारण-

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः ।
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥

इत्यात्मदेहभागेन प्रपञ्चस्यैव सत्यता ।
यथोक्ता तर्कशास्त्रेण ततः किंपुरुषार्थता ॥ ४१ ॥

इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् ।
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥

चैतन्यस्यैकरूपत्वाद् भेदो युक्तो न कर्हिचित् ।
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥

शरीरमपि निराकृतम् । अनयोरपि भेदे लिङ्गदेहस्य वैलक्षण्यसूचकानि विशेषणान्याह—**अनेकेति** । अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरसम्बन्धयुक्तम् । यद्वा श्रोत्रादिबुद्धयन्तसप्तदशकलासंयुक्तं तथा चलं चञ्चलं मनःप्रधानत्वादित्यर्थः । पुनर्दृश्यं 'ममेदं श्रोत्रं, ममेदं मन' इत्यादिममतास्पदत्वेनात्मन उपसर्जनभूतं च पुनर्विकारि उपचयादिमत् । अव्यापकं परिच्छिन्नमसद्रूपमात्मज्ञानैकबोध्यं च । अत्रेदमाकूतम्—यद्यपि लिङ्गशरीराध्यासे नात्मनः कर्तृत्वभोक्तृत्वादिभावस्तथाऽप्यात्मनः स्वतस्तदभावाज्ज्ञानाध्यासनिवृत्तावकर्तृत्वाभोक्तृत्वादिभावसिद्धिरिति वेदान्तिनां न किञ्चिदपसिद्धान्तोऽन्यवदिति मङ्गलम् ॥ ३९ ॥

इदानीं पूर्वोक्तमर्थमुपसंहरति—**एवमिति** । एवं पूर्वोक्तप्रकारेण देहद्वयात् स्थूलसूक्ष्मलक्षणादन्यो भिन्न आत्मा । कोऽसावित्यत आह—**पुरुष इति** । पुरि शेते इति पुरुषः शरीराधिष्ठाता, तर्हि किं जीवः नेत्याह—**ईश्वर इति** । तत्र हेतुः—**सर्वात्मेति** । तर्ह्यद्वैतहानिः स्यादित्यत आह—**सर्वरूप इति** । एवं सति विकारित्वं स्यादित्यत आह—**सर्वातीत इति** । एतादृश आत्मा चेदस्ति तर्हि कुतो नोपलभ्यत इत्यत आह—**अहमिति** । अहं प्रत्यक्षोऽहंशब्दप्रत्ययालम्बनत्वेन सर्वदोपलब्धिस्वरूप इत्यर्थः । तर्ह्यहङ्कारः स्यान्नेत्याह—**अव्यय इति** । अव्ययः अपक्षयादिविकारशून्यः अहङ्कारसाक्षीति भावः ॥ ४० ॥

अथेदानीमात्मनो देहद्वयातिरिक्तत्वप्रतिपादनमनर्थकमिति शङ्कते—**इतीति** । इति पूर्वोक्तप्रकारेण वर्णितेनात्मदेहविभागेन प्रपञ्चस्यैव सत्यता यथोक्ता यथा तर्कशास्त्रेण ततः प्रपञ्चसत्यत्वप्रतिपादनात्किंपुरुषार्थता कुत्सितपुरुषार्थत्वम्, भयनिवृत्त्यभावादित्यर्थः। 'द्वितीयाद्वै भयं भवति' इति श्रुतेः॥४१॥

भेदज्ञानस्याभेदज्ञानं प्रति कारणत्वादात्मदेहविभागकथनं नानर्थकमित्याह—**इतीति** । इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात्पृथक्करणेन देहस्यैव प्राप्तं चार्वाकमतेनात्मत्वं तन्निवारितम् । इदानीमुत्तरग्रन्थेन तस्य देहभेदस्यासत्त्वमात्मसत्तातिरिक्तसत्ताराहित्यं स्फुटं स्पष्टं यथा स्यात्तथा हीति प्रसिद्धमुच्यते ॥ ४२ ॥

तदेवाह—**चैतन्यस्येति** । चैतन्यस्य सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रकाशस्य । 'घटः प्रकाशते, पटः प्रकाशते' इत्यादिष्वेकरूपत्वादेकाकारत्वाद्धेतोः कर्हिचित् कस्याञ्चिदवस्थायामपि भेदो न युक्तो

रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥
उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥
व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥
श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥
दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।
इह पश्यति नानात्वं मायया वञ्चितो नरः ॥ ४८ ॥

न यथार्थ इत्यर्थः । तर्हि जीवभेदः सत्यः स्यादित्यत आह—**जीवत्वमिति** । जीवत्वम्, चकारोऽप्यर्थः । मृषा मिथ्या ज्ञेयम् । तदुपाधेरेवान्तःकरणादेर्मायामयत्वादित्यर्थः । अधिष्ठानसत्यत्वेन कल्पितस्य मिथ्यात्वबोधे दृष्टान्तमाह—**रज्जाविति** । यथा रज्जौ तदज्ञानात् वक्रतादिसादृश्येन मन्दान्धकारे सर्पग्रहः सर्पबुद्धिरव्युत्पन्नस्य भवति नतु व्युत्पन्नस्य, तथैवात्मन्यात्माज्ञानात् प्रकाशसादृश्यादविशेषप्रकाशे चिज्जडग्रन्थिरूपचिदाभासभ्रमो भवत्यविवेकिनां नतु विवेकिनामिति वेदान्तसिद्धान्तरहस्यम् ॥ ४३ ॥

इदानीं पूर्वोक्तमेव दृष्टान्तं विवृण्वन् सर्वस्यापि प्रपञ्चस्य ब्रह्मरूपतामाह—**रज्ज्वति** । केवलेतिविशेषणेन पूर्वावस्थामपरित्यज्यावस्थान्तरप्राप्तिलक्षणविवर्तोपादानत्वमेवोक्तम्, नारम्भोपादानत्वं नापि परिणामोपादानत्वमिति बोध्यम् । अन्यत् स्पष्टम् ॥ ४४ ॥

अत्र हेतुं दर्शयन् पूर्वोक्तमुपसंहरति—**उपादानमिति** । यस्मात्प्रपञ्चस्याकाशादिदेहान्तस्य जगद्विस्तारस्य ब्रह्मणो मायाशबलाच्चैतन्यादन्यत्परमाणवो यद्वा प्रकृतिरुपादानकारणविशेषो न विद्यते, 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादिश्रुतेः। तस्माद्धेतोरिति । स्पष्टमन्यत् ॥४५॥

ननु व्याप्यव्यापकतारूपे भेदे जाग्रति सति कथं प्रपञ्चस्य ब्रह्मतेत्याशङ्क्याह—**व्याप्येति** । व्याप्यमान्तरं व्यापकं बाह्यं तयोर्भावस्तत्ता । मिथ्या घटाकाशादिवत् कल्पितत्वादसन्नित्यर्थः । तत्र प्रमाणमाह—**सर्वमिति** । 'इदं ब्रह्मेदं क्षत्रमिति प्रकृत्येदं सर्वं यदयमात्मा' इत्यादिश्रुतिरूपेश्वराज्ञाबलादित्यर्थः । ततः किमत आह—**इतीति** । इति ज्ञाते इत्यादि सुगमम् ॥ ४६ ॥

ननु प्रत्यक्षेण भासमानो व्याप्यव्यापकभावः कथं मिथ्येत्याशङ्क्याह—**श्रुत्येति** । नूनमिति निश्चये । हीति प्रसिद्धौ । श्रुत्या 'नेह नानास्ति किञ्चन' इत्यादिरूपयेत्यर्थः । नानात्वं निवारितम् । तेन च नानात्वनिवारणेनाद्वयकारणेऽभिन्ननिमित्तोपादाने ब्रह्मणि स्थिते सति भासो व्याप्यव्यापकादिप्रतिभासः, कार्यभूतोऽन्यः स्वकारणातिरिक्तः कथं भवेन्न कथञ्चिदित्यर्थः ॥ ४७ ॥

किञ्च भेददृष्टेर्दोषश्रवणादपि कारणादभिन्नमेव कार्यमित्याह—**दोष इति** । 'मृत्योः स मृत्यु-

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥

ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥

सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः ।
यः सन्तिष्ठति मूढात्मा भयं तस्याभिभाषितम् ॥ ५२ ॥

यत्राज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति ।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥

माप्नोति य इह नानेव पश्यति' इत्यादिरूपया श्रुत्येत्यर्थः । तत्र मृत्योरनन्तरं मृत्युं जननमरणपरम्परामित्यर्थः । स्पष्टमन्यत् ॥ ४८ ॥

तर्हि किं कुर्यादित्यत आह—**ब्रह्मण इति** । बृहत्त्वादपरिच्छिन्नत्वाद् ब्रह्म । तद्रूपात्परमात्मनः सर्वाणि भूतानि जायन्त उत्पद्यन्ते । जायन्त इति स्थितिप्रलययोरप्युपलक्षणम्, 'यतो वा इमानि भूतानि जायन्ते' इत्यादि श्रुतेः । यस्मादेवं तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवन्ति सन्मात्रब्रह्मरूपाणीत्यवधारयेन्निश्चिनुयादिति ॥ ४९ ॥

ननु नानानामरूपकर्मभेदेन विचित्राणि भूतानि कथं ब्रह्मात्मकानीत्याशङ्क्याह—**ब्रह्मैवेति** । 'त्रयं वा इदं नाम रूपं कर्म' इति बृहदारण्यकश्रुतिर्जगौ गायनं कृतवती, स्वाधिकारिणः श्रावयामासेत्यर्थः । किमित्यत आह—ब्रह्मैव सर्वनामान्याकाशादिदेहान्तान् संज्ञाविशेषान्, च पुनर्विविधानि रूपाण्यवकाशादिद्विपदान्तान् नानाविकारविशेषान् । अपि शब्दश्चार्थे । रूपग्रहणं गन्धादिग्रहणस्याप्युपलक्षणम् । समग्राणि कर्माणि आकाशप्रदानादीनि स्नानशौचादीन् क्रियाविशेषानपि बिभर्ति । रज्ज्वादिकमिव सर्पादिप्रतिभासं दधात्यधिष्ठानदर्शनशून्यान् प्रति दर्शयतीत्यर्थः ॥ ५० ॥

अत्र लोकप्रसिद्धं दृष्टान्तमाह—**सुवर्णेति** । सुगमम् ॥ ५१ ॥

एवं कर्तृकर्मादिकारकघटस्यैकाधिष्ठानरूपत्वे सिद्धेऽपि भेददर्शिनो भयमाह—**स्वल्पेति** । स्वल्पमप्यन्तरमुपास्योपासकरूपं भेदं कृत्वा—कल्पयित्वा यस्तिष्ठति तस्य भयं भाषितम् । 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इत्यादिश्रुत्येत्यर्थः ॥ ५२ ॥

ननु प्रकाशतमसोरिव परस्परविरुद्धस्वभावयोर्द्वैताद्वैतयोः कुत एकाधिकरणत्वमित्याशङ्क्यावस्थाभेदादित्याह—**यत्रेति** । यत्र यस्यामज्ञानावस्थायाम् अज्ञानेन द्वैतमिव भवेत्तत्र तस्यामज्ञानावस्थायाम् 'इतरोऽन्योऽन्यत्पश्यति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजाना-

यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥ ५४ ॥
अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।
इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥
अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥
स्वप्नो जागरणेऽलीकः स्वप्नेऽपि न हि जागरः ।
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥
त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥
यद्वन्मृदि घटभ्रांतिं शुक्तौ वा रजतस्थितिम् ।
तद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति ॥ ५९ ॥

तीति । यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेत्' इत्यादिश्रुतेः । चशब्दः पूर्वोक्ताद्वैलक्षण्यं सूचयति । यदा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत् तत्र तस्मिन् ज्ञानकाले इतरोऽण्वपि किञ्चिदप्यन्यन्न पश्यति । 'यत्र वा, अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्' इत्यादिश्रुतेः सकार्याज्ञाननिवृत्त्या न द्वैतमिति भावः ॥ ५३ ॥

ननु द्वैतादर्शने कः पुरुषार्थं इत्याशङ्क्य तत्प्रतिपादिकाम् 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥' इति श्रुतिमर्थतः पठति—**यस्मिन्निति** । यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्यात्मत्वेनात्मभावेन विजानतः अपरोक्षेण साक्षात्कुर्वतोऽधिकारिणः पुरुषस्य । तस्येति षष्ठी सप्तम्यर्थे । तस्मिन्नवस्थाविशेषे वै निश्चयेन मोहो भ्रमो न भवेत्, च पुनः शोको व्याकुलतापि न भवेत् । उभयत्र हेतुः–अद्वितीयतः तत्कारणाभावादित्यर्थः ॥ ५४ ॥

शोककारणद्वैताभावे प्रमाणमाह—**अयमिति** । 'स वा अयमात्मा ब्रह्म विज्ञानमयः' इत्यादिरूपयेत्यर्थः । शेषं स्पष्टम् ॥ ५५ ॥

नन्वयं लोक एव तत्कारणे सति कथं शोकाद्यभाव उच्यत इत्याशङ्क्य सदृष्टान्तमाह—**अनुभूत इति** । शेषं स्पष्टम् ॥ ५६ ॥

दृष्टान्तं विवृण्वन्नुक्तन्यायमन्यत्राप्यतिदिशति—**स्वप्न इति** । अलीको मिथ्या द्वयं स्वप्नजागरणे । लये सुषुप्तौ । शेषं स्पष्टम् ॥ ५७ ॥

उक्तमुपसंहरन्फलितमाह—**त्रयमिति** । त्रयं जाग्रदाद्यवस्थात्रयमेवमुक्तपरस्परव्यभिचारेण मिथ्या । मिथ्यात्वे हेतुः—**गुणेति** । गुणत्रयविनिर्मितं मायाकल्पितमित्यर्थः । तर्हि किं सत्यमत आह—**अस्येति** । अस्य अवस्थात्रयस्य । शेषं स्पष्टम् ॥ ५८ ॥

नन्ववस्थात्रयं मिथ्या भवतु जीवस्तु सत्यः स्यादित्याशङ्क्य सदृष्टान्तमुत्तरमाह—

यथा मृदि घटो नाम कनके कुण्डलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥ ६० ॥

यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥

यथैव शून्ये वैतालो गन्धर्वाणां पुरं यथा ।
यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ ६२ ॥

यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् ।
पात्ररूपेण ताम्रं हि ब्रह्माण्डौघैस्तथाऽऽत्मता ॥ ६३ ॥

घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ।
जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥

सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः ।
अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ॥ ६५ ॥

यद्वदिति । ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन साक्षात्कृते सति जीवत्वं न पश्यतीत्यन्वयः । अन्यत् स्पष्टमेव ॥ ५९ ॥

अज्ञानावस्थायां प्रतीयमानो यो जीवब्रह्मभेदः स नाममात्र इति बहुदृष्टान्तैराह—**यथेति** । रजतस्य ख्यातिराख्या, नामेति यावत् । परे परब्रह्मणि जीवशब्दस्तथा । शेषं स्पष्टम् ॥ ६० ॥

न केवलं जीव एव नाममात्रः किंतु सर्वं विश्वमपि ब्रह्मणि नाममात्रमित्यनेकदृष्टान्तैराह—**यथैवेति** । स्पष्टम् ॥ ६१ ॥

नाममात्रप्रपञ्चस्य मिथ्यात्ववासनादार्ढ्यायेममेवार्थं बहुभिर्लोकप्रसिद्धदृष्टान्तैः प्रपञ्चयति—**यथैव शून्य** इत्यादित्रिभिः । शून्ये निर्जने देशे वैतालः अकस्मादाभासमानो भूतविशेषः । गन्धर्वपुरस्यापि शून्याधिष्ठानत्वं ज्ञेयम् । गन्धर्वनगरं नाम राजनगराकारो नीलपीतादिमेघरचनाविशेषः । आकाशे द्विचन्द्रत्वम् । स्पष्टमन्यत् ॥ ६२ ॥

यथा तरङ्गेति सुगमम् ॥ ६३ ॥

किञ्च **घटेति** । तत्र पादत्रयं स्पष्टम् । ननु किमनेन मिथ्यात्ववासनादार्ढ्येनेत्यत आह—**ज्ञेयमिति** । तदभावतो नामाभावतस्तद्ब्रह्म ज्ञेयम् । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादिश्रुतेः ॥ ६४ ॥

ननु 'यत्र हि द्वैतमिव भवति' इत्यादिश्रुत्यर्थदर्शनेनावस्थात्रये विदेहमोक्षावुक्तौ नतु जीवन्मोक्ष इत्याशङ्क्याह—**सर्व इति** । सर्वोऽपि लौकिको वैदिकश्चेति । शेषं स्पष्टम् । अयं भावः—अज्ञाननिवृत्तिरेव जीवन्मुक्तिर्नतु द्वैतादर्शनमिति ॥ ६५ ॥

कार्यकारणता नित्यमास्ते घटमृदोर्यथा ।
तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह ॥ ६६ ॥

गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ।
वीक्ष्यमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥

सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा ।
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ॥ ६८ ॥

यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः ।
आत्मानात्मविभागोऽयं मुधैव क्रियतेऽबुधैः ॥ ६९ ॥

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७० ॥

घटत्वेन यथा पृथ्वी पटत्वेनेव तन्तवः ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७१ ॥

तत्र हेतुं सदृष्टान्तमाह—**कार्येति** । यथा 'सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्' इत्यादिश्रुतिः । युक्तिस्तु कार्यकारणयोरन्यत्वे एककारणज्ञानात्सर्वकार्यज्ञानं न स्यादित्यादि । सुगममन्यत् ॥ ६६ ॥

कार्यकारणयोरनन्यत्वमेव दृष्टान्तेन स्पष्टयति—**गृह्यमाण इति** । भासुरं प्रमाणनिरपेक्षतयैव भासनशीलम् । स्पष्टमन्यत् ॥ ६७ ॥

ननु ब्रह्मणि भासमाने प्रपञ्चो न भासेतेत्याशङ्क्यावस्थाभेदेनोभयमपि भासत इति सदृष्टान्तमाह—**सदैवेति** । तत्र ज्ञानिनः सदैवात्मा विशुद्धः, अज्ञानतत्कार्यप्रपञ्चमलरहितत्वान्निष्प्रपञ्चोऽस्तीत्यर्थः । अज्ञानिनस्तु सदैवाशुद्धोऽस्तीति भ्रमाद्विभाति । वै हीति तत्प्रसिद्धौ । उभयत्रापि दृष्टान्तः—**यथेति** । यथा रज्जुर्ज्ञानिनः सर्पाभावतया निर्विषत्वेनाभयङ्करी । अज्ञानिनस्तु सर्परूपतया विपरीतत्वेन भयङ्करीति द्विविधा भाति । अयं भावः ब्रह्म यद्यपि स्वयंप्रकाशत्वेन सदा भात्येव तथापि वृत्त्यारूढत्वेन पुरुषार्थोपयोगीति ज्ञानिनः प्रतिभाति नाज्ञानिनः, सूर्यदीपादिरिव चक्षुष्मदन्धयोरिति दिक् ॥ ६८ ॥

नन्वात्मा यदि सदैव निष्प्रपञ्चत्वेन भाति तर्हि किमर्थं देहात्मभेदो वर्णित इत्याशङ्क्याविवेकिनो देहव्यतिरिक्तात्मबोधार्थं विवेकिनस्तु व्यर्थ एवेति सदृष्टान्तमाह—**यथेति** । तत्राबुधैरित्यकारप्रश्लेषे मुधैव क्रियते अपितु नेति काकुव्याख्यानम् । अन्यत्सर्वं सुगमम् ॥ ६९ ॥

इदानीमविवेकिनः कल्पितदेहतादात्म्यं सदृष्टान्तमाह—**सर्पत्वेनेति** ॥ ७० ॥

घटत्वेनेति । स्पष्टम् ॥ ७१ ॥

कनकं कुण्डलत्वेन तरङ्गत्वेन वै जलम् ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७२ ॥

पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७३ ॥

गृहत्वेनेव काष्ठानि खड्गत्वेनेव लोहता ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७४ ॥

यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥

पोतेन गच्छतः पुंसः सर्वं भातीव चञ्चलम् ।
तद्वदात्मनि देवत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥

पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥

चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥

अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥

महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८० ॥

कनकमिति ॥ ७२ ॥

पुरुषत्व इति ॥ ७३ ॥

गृहत्वेनेति । सर्पत्वेनेत्यादिपञ्चानामप्येतेषां श्लोकानामर्थः स्फुटतर एवास्त्यतो न व्याख्यानं कृतम् ॥ ७४ ॥

नन्वन्यथानिर्णये किं कारणमिति चेत्तदज्ञानमेवेति सदृष्टान्तमाह—**यथा वृक्षेत्यादि-**द्वादशभिः ॥ ७५ ॥

पोतेनेति । पोतेन नौकया । स्पष्टमन्यत् ॥ ७६ ॥

पीतत्वमिति ॥ ७७ ॥

चक्षुर्भ्यामिति ॥ ७८ ॥

अलातमिति ॥ ७९ ॥

महत्त्व इति हीति सर्वलोकप्रसिद्धौ ॥ ८० ॥

सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८१ ॥
काचभूमौ जलत्वं वा जलभूमौ हि काचता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८२ ॥
यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८३ ॥
अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८४ ॥
यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८५ ॥
यथा शशी जले भाति चञ्चलत्वेन कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८६ ॥
एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।
स एवात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥
सर्वमात्मतया ज्ञातं जगत्स्थावरजङ्गमम् ।
अभावात्सर्वभावानां देहस्य चात्मता कुतः ॥ ८८ ॥

सूक्ष्मत्वे इति ॥ ८१ ॥

काचभूमाविति ॥ ८२ ॥

यद्वदिति ॥ ८३ ॥

अभ्रेष्विति ॥ ८४ ॥

यथेति । यथा वृक्षेत्यादिश्लोकानां स्फुटार्थत्वात् पिष्टपेषणतुल्यत्वेन न व्याख्यानं कृतम् ॥ ८५ ॥

यथा शशीति । शशीत्युपलक्षणं सूर्यादीनामपि । शेषं स्पष्टम् ॥ ८६ ॥

एवं द्वादशभिः श्लोकैरुक्तमर्थमुपसंहरति—**एवमिति** । एवमुक्तेन प्रकारेणात्मन्यविद्यातः आत्माज्ञानात् देहाध्यासो मनुष्योऽहमित्यादिबुद्धिर्जायते भवति । हीति प्रसिद्धौ । नन्वेतस्य निवृत्तिः कुतो भवेदिति चेदात्मज्ञानादेवेत्याहोत्तरार्धेन—**स इति** । स एव देहाध्यास एवात्मपरिज्ञानात् ब्रह्मात्मैक्यसाक्षात्कारात्परात्मनि अज्ञानतत्कार्यरहिते प्रत्यगभिन्ने ब्रह्मणि लीयते ब्रह्मस्वरूपेणावतिष्ठते । नह्यधिष्ठानं विनाऽऽरोपितस्य स्वरूपमस्ति । चकारादध्यासकारणमज्ञानमपि लीयत इति । अन्यथाऽध्यासलयाभावादित्यर्थः । नहि कारणे सति कार्यस्य लयः सम्भवति । तस्मादात्मज्ञानादेव सकारणकार्याध्यासनिवृत्तिरित्यलं पल्लवितेन ॥ ८७ ॥

एतदेव विवृणोति—**सर्वमिति** । आत्मता देहस्य नेत्यर्थः । स्पष्टमन्यत् ॥ ८८ ॥

आत्मानं सततं जानन्कालं नय महाद्युते ।
प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥
उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।
इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ॥ ९० ॥
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः ॥ ९१ ॥
कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥
स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥
उपादानं प्रपञ्चस्य मृद्भाण्डस्येव कथ्यते ।
अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥

1107

ननु ज्ञानिनो निष्प्रपञ्चात्मतया मम किं स्यात् ब्रह्मण्यभोजनेनान्यस्तृप्यतीति चेदत आह—**आत्मानमिति**। भो महाद्युते ! कामादिपराभवेन स्वहितसाधनोन्मुखस्त्वम् आत्मानं प्रत्यगभिन्नं सततम् आसुप्तिमृतिपर्यन्तं जानन् वेदान्तवाक्यैर्विचारयन् कालं नय अतिक्रामस्व । विचारसाध्यज्ञानानन्तरं चाखिलं प्रारब्धं चरमदेहारम्भकं कर्म भुञ्जन् सुखदुःखाभासानुभवेन क्षपयन् समुद्वेगं कर्तुं नार्हसीत्युपदेशः ॥ ८९ ॥

वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः, भोगाभावे कुत उद्वेगकारणम्, तदभावे च कुतस्तरां तन्निषेधोपदेश इति वेदान्तसिद्धान्तरहस्यं वक्तुं प्रतिजानत आचार्याः—**उत्पन्न इति**। अत्रेयं प्रक्रिया, जगत्प्रतीतिस्त्रिधा—शास्त्रीया, लौकिकी, आनुभाविकी चेति । तत्राद्या पारमार्थिकी, द्वितीयाऽपारमार्थिकी, तृतीया तु प्रातिभासिकी । तासां निवृत्तिस्तु क्रमात् वेदान्तश्रवणादित्रयसाक्षात्कारप्रारब्धक्षयैर्भवति नान्यथेति । तत्रेयं प्रतिज्ञाऽन्यप्रतीत्यभिप्रायेणेति ज्ञातव्यम् । श्लोकार्थस्तु स्फुट एव ॥९०॥

तदेवाह—**तत्त्वेति** । ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इति श्लोकार्थः । पदार्थस्तु स्फुट एव ॥ ९१ ॥

इदानीं प्रारब्धशब्दं व्युत्पादयन्नुक्तमुपसंहरति—**कर्मेति** । तत्र कर्म त्रिविधम्—सञ्चितक्रियमाणप्रारब्धभेदात् । तन्मध्ये भाविदेहारम्भकं सञ्चितम्, तथा वर्तमानदेहनिर्वर्त्यं क्रियमाणम् । प्रारब्धं तु वर्तमानदेहारम्भकम् । तत्र यद्यपि सञ्चितं जन्मान्तरीयमेव तथापि भाविदेहस्य तत्प्रारब्धमेव भवति । तेनेदं सिद्धमात्मनः स्वतःकर्तृत्वाभावात्कालत्रयेऽपि जन्म नास्तीति सर्वमवदातम् ॥ ९२ ॥

पूर्वोक्तं दृष्टान्तं विवृण्वन्सकारणजन्माभावे युक्तिमाह—**स्वप्नेति** । जन्मभावे तत्प्रारब्धं कुतः । स्पष्टमन्यत् ॥ ९३ ॥

ननु देहादिप्रपञ्चस्य 'यतो वा०' इत्यादिश्रुतेः सत्यब्रह्मजन्यत्वात्कथं प्रातिभासिकत्वमिति चेदुच्यते—**उपादानमिति** । अत्र कारणं द्विविधम्—निमित्तोपादानभेदात् । तत्र निमित्तं नामोत्पत्ति-

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥
रज्जुरूपे परिज्ञाते सर्पभ्रान्तिर्न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपञ्चः शून्यतां व्रजेत् ॥ ९६ ॥
देहस्यापि प्रपञ्चत्वात्प्रारब्धावस्थितिः कुतः ।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ९७ ॥
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥ ९८ ॥
उच्यतेऽज्ञैर्बलाच्चैतत्तदाऽनर्थद्वयागमः ।
वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥

मात्रकारणम् । उपादानं तूत्पत्तिस्थितिलयकारणम् । तत्र वेदान्तैः—'मायां तु प्रकृतिं विद्यात्' इत्यादिभिः प्रपञ्चस्योपादानमज्ञानं पठ्यते, चकाराद्ब्रह्मापि । अत्रायं भावः—न केवलं ब्रह्मैव जगत्कारणम्, निर्विकारत्वात् । नापि केवलमज्ञानम्, जडत्वात् । तस्मादुभयं मिलित्वैव जगत्कारणं भवतीति । 'सत्यानृते मिथुनीकरोति' इत्यादिश्रुतेः । तत्र दृष्टान्तः—भाण्डस्य घटकरकादेर्मृदिव मृत्पिण्डं इव । जलस्थाने, आवरकत्वसाम्यात् । तत्र ब्रह्मणोऽविनाशित्वाद्ब्रह्मज्ञानेन तस्मिन्नज्ञान एव नष्टे सति विश्वता जीवजगदीश्वरात्मकजगद्भावः क्व, न क्वाप्यस्तीत्यर्थः ॥ ९४ ॥

मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टान्तं प्रपञ्चयति—**यथा रज्जुमिति** ॥ ९५ ॥

इदानीं यदुक्तं 'तस्मिन्नष्टे क्व विश्वता' इति तत् प्रपञ्चयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टान्तमुपसंहरति सार्द्धेन—**रज्जुरूप इति** स्पष्टम् ॥ ९६ ॥

किञ्च **देहस्येति** । जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावे सति 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिः प्रारब्धं किमर्थं वक्तीति चेदुच्यते अर्द्धेन—**अज्ञानीति** । श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यन्वयः । ज्ञानेन सर्वव्यवहारकारणेऽज्ञाने नष्टे सति ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धादिति तद्बोधार्थमिति । शेषं स्पष्टम् ॥ ९७ ॥

किं तर्हि ज्ञानिबोधार्थं वक्ति श्रुतिरिति चेदुच्यते—**क्षीयन्त इति** । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥' इति श्रुत्या । कर्माणीति बहुत्वं यत् स्फुटं गीतं तत्तन्निषेधार्थं प्रारब्धाभावप्रतिपादनार्थम्, अन्यथा सञ्चितक्रियमाणपेक्षया कर्माणीति द्वित्वं गेयम् । तथा न गीतमतो ब्रह्मात्मसाक्षात्कारात् चिज्जडग्रन्थिभेदेन सञ्चितक्रियमाणप्रारब्धाख्यत्रिविधकर्मक्षयान्ते परमपुरुषार्थं ज्ञानिबोधार्थं श्रुतिर्वक्तीति भावः ॥ ९८ ॥

उक्तवैपरीत्ये बाधकमाह—**उच्यत इति** । एतत्प्रारब्धमज्ञैः श्रुतितात्पर्यानभिज्ञैर्बलादविवेकसामर्थ्याच्चोच्यते यथार्थतया प्रतिपाद्यते । चकारादद्वयात्मानं न पश्यन्ति । तदाऽनर्थद्वयागमो दोषद्वयप्राप्तिः । तत्र प्रारब्धरूपस्य द्वैतस्याङ्गीकारे अनिर्मोक्षप्रसङ्ग एको दोषः, मोक्षाभावे ज्ञानसम्प्रदायो-

त्रिपञ्चाङ्गान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ।
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥
नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ १०१ ॥
यमो हि नियमस्त्यागो मौनं देशश्च कालता ।
आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः ॥ १०२ ॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ १०३ ॥

च्छेदरूपो द्वितीयो दोष इति । न केवलं दोषद्वयस्यैव प्राप्तिरपि तु वेदान्तमतहानं च । वेदान्तमतस्याद्वैतस्य हानं त्यागो भविष्यति, प्रारब्धग्रहणरूपस्य द्वैतस्य याथार्थ्यादित्यर्थः । तर्हि किं प्रतिपत्तव्यमित्यत आह—**यत इति** । यतो यस्याः सकाशात् ज्ञानं भवति तादृशी सा श्रुतिः । ग्राह्येति शेषः । सा श्रुतिस्तु—'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥' इति । एतदभिप्रायः क इति चेल्लिख्यते—धीरो विवेकी ब्राह्मणो ब्रह्म भवितुमिच्छुस्तमेव वेदान्तप्रसिद्धमात्मानं विज्ञायाऽऽदावुपदेशतः शास्त्रतश्च ज्ञात्वाऽनन्तरं प्रज्ञां शास्त्राचार्योपदिष्टविषयामपरोक्षानुभवपर्यन्तां जिज्ञासापरिसमाप्तिकरीं कुर्वीत । बहून् कर्मोपासनाप्रतिपादकान् शब्दान् वाक्यसन्दर्भान्नानुध्यायान्न चिन्तयेत् । तर्हि तान् ब्रूयात्किं तेनेत्याह—**वाच इति** । तदद्वैतशास्त्रपठनं वाचो विग्लापनं विशेषेण श्रमकरम् । हीति सर्वानुभवसिद्धमित्यलं पल्लवितेन ॥९९॥

तदेवमेतावता ग्रन्थसन्दर्भेण मुख्याधिकारिणो वैराग्यादिसाधनचतुष्टयपूर्वकं वेदान्तवाक्यविचार एव प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितम् । इदानीमसकृद्विचार्यापि बुद्धिमान्द्यविषयासक्त्यादिप्रतिबन्धेनापरोक्षज्ञानं यस्य न जायते यस्य मन्दाधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्यभिप्रेत्य ससाधनं ध्यानयोगं प्रतिजानत आचार्याः—**त्रिपञ्चेति** । अथोशब्दोऽधिकारिभेदार्थः । क्वचित् 'अत' इति पाठस्तस्मिन् पक्षे यतो मन्दाधिकारी विचारं न लभतेऽतो हेतोरित्यर्थः । त्रिपञ्च त्रिगुणितानि पञ्च, पञ्चदशेत्यर्थः । तत्सङ्ख्याकान्यङ्गानि निदिध्यासनाङ्गिसाधनविशेषान् यज्ञसाधकप्रयाजादिवदित्यर्थः । वक्ष्ये वक्ष्यामि । तैर्वक्ष्यमाणैः सर्वैरङ्गैर्निदिध्यासनमेव कार्यं नतु तूष्णीमवस्थानमुचितमित्यर्थः । निदिध्यासनकर्तव्यप्रतिज्ञाप्रयोजनमाह—**पूर्वोक्तस्येति** । पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य सिद्धय इति । हीति वेदान्तप्रसिद्धौ । तुशब्दः पातञ्जलवैलक्षण्यलक्षणेन मोक्षस्य सिद्धय इति । अनेनाष्टाङ्गप्रतिपादकं पातञ्जलमवैदिकत्वाद्वैशेषिकादिवदनादेयमिति ध्वनितम् ॥ १०० ॥

मन्दाधिकार्यन्यत्सर्वं कर्म सगुणोपासनविचाररूपं साधनं च विहाय श्रद्धयाऽऽचार्योक्तप्रकारेण निर्गुणं ब्रह्मैव निदिध्यासेदित्याह—**नित्येति** । स्पष्टम् ॥ १०१ ॥

ननु कानि तान्यङ्गानि यैः सह निदिध्यासनं कर्त्तव्यमित्यपेक्षायां तानि निर्दिशति—**यम इति** द्वाभ्याम् । उत्तानार्थावुभावपि श्लोकौ ॥ १०२-१०३ ॥

सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः ।
यमोऽयमिति सम्प्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥

सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानन्दो नियमात्क्रियते बुधैः ॥ १०५ ॥

त्यागः प्रपञ्चरूपस्य चिदात्मत्त्वावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ १०६ ॥

यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १०७ ॥

इदानीमेतेषां प्रत्येकं निर्देशक्रमेण स्वाभिमतानि लक्षणान्याह—सर्वमित्याद्येकविंशत्या । तत्र प्रथमोद्दिष्टं यमं तावद्दर्शयति—**सर्वमिति** । सर्वमाकाशादि देहान्तं जगद्ब्रह्म, बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः । इति विज्ञानान्निश्चयाद्धेतोरिन्द्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूहस्तस्य संयमः सम्यक् शब्दादिविषयाणां विनाशित्वसातिशयत्वदुःखदत्वादिदोषदर्शनात् यमो विषयेभ्यो निवारणम् अयं यम इति सम्प्रोक्तः, न तु केवलमहिंसादिरित्यर्थः । ततश्च किमत आह—**अभ्यसनीय इति** । अयं मुहुर्मुहुरभ्यसनीय इति ॥ १०४ ॥

एवं यमं लक्षयित्वा नियमं लक्षयति—**साजतीयेति** । सजातीयं प्रत्यगभिन्नं परं ब्रह्म, तदेकाकारो वृत्तिप्रवाहः सजातीयप्रवाहः । यद्वा सजातीयानामसङ्गोऽहमविक्रियोऽहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः । च पुनः, **विजातीयतिरस्कृतिः**—विजातीयं ब्रह्मात्मविलक्षणम्, जगत्पूर्वसंस्काराज्जायमाना तदाकारा वृत्तिरित्यर्थः । तस्य तिरस्कृतिर्दोषस्मृत्याऽधिकोपेक्षाऽनादर इत्यर्थः । अयं नियम उक्तः । न तु केवलं शौचादिरित्यर्थः । हीत्युपनिषत्प्रसिद्धौ । नन्वनयोरुपनिषत्प्रसिद्धया कः पुरुषार्थ इति चेदत आह—**परमानन्द इति** । ततश्च किमत आह—**नियमादित्यादि** । सुगमम् ॥१०५॥

इदानीं तृतीयं त्यागं लक्षयति—**त्याग इति** । प्रपञ्चरूपस्य प्रपञ्चो नामरूपलक्षणः । रूप्यते घटोऽयं पटोऽयम् इत्यादि नामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते येन तत्प्रपञ्चरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तस्य । चिदात्मत्वावलोकनाच्चिदजडं स्वत एव प्रकाशमानं ब्रह्म, तदात्मस्वरूपं यस्य तद्भावस्तस्यावलोकनमनुसन्धानं तस्माद्धेतोर्यस्त्यागः नामरूपोपेक्षा स एव त्यागस्त्यागशब्दवाच्यः, 'ईशावास्यमिदं सर्वम्' इत्यादिश्रुतेः । हीति विद्वदनुभवप्रसिद्धौ । नन्वयं त्यागो न कुत्रापि प्रसिद्ध इत्याशङ्क्याह—**महतां पूज्य इति** । तत्र हेतुः—**सद्य इति** । यतोऽयं त्यागः सद्योऽनुसन्धानकाल एव मोक्षमयः परमानन्दस्वरूपावस्थानरूपः, अत एवात्मतत्त्वविदामिष्टत्वादतिप्रसिद्धोऽयं त्याग इत्यर्थः । तस्मादयमेव मुमुक्षुणा कर्तव्यो नान्यः । केवलस्वकर्माद्यकरणरूप इति भावः । एवमग्रेऽप्यूह्यम् ॥ १०६ ॥

अथ मौनं लक्षयति—**यस्मादिति** । शब्दप्रवृत्तिनिमित्तजातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तुमशक्यं यत्ब्रह्म तथापि योगिभिर्गम्यं ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्राप्यं तत्प्रसिद्धमेव ब्रह्मरूपं मौनं सर्वदा बुधो विवेकी भवेत् । तदहमस्मीत्यनुसन्दध्यादित्यर्थः ॥ १०७ ॥

वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।
प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ १०८ ॥

इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।
गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥

आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११० ॥

कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः ॥ १११ ॥

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।
आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥ ११२ ॥

सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् ।
यस्मिन् सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ ११३ ॥

यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनम् ।
मूलबन्धः सदा सेव्यो योग्योऽसौ राजयोगिनाम् ॥ ११४ ॥

नन्विदं प्रत्यगभिन्नब्रह्मानुसन्धानं ध्यानरूपं चदुर्दशमङ्गं प्रतीयते इत्याशङ्क्य स्वारस्यात्प्रकारान्तरेण मौनमेव लक्षयति सार्द्धेन **वाच इति**। अयं भावः—शब्दप्रवृत्तिनिमित्ताभावाद्ब्रह्म यथा वागविषयं तथा नामरूपजात्यादिप्रपञ्चोऽपि सदसदादिविकल्पासहत्वाद्वागतीतः ॥ १०८ ॥

इतीति। इत्युक्तप्रकारेण ब्रह्मजगतोर्विवादत्यागरूपं वा तन्मौनं भवेत्। केषामित्याकाङ्क्षायां सतां चेदं प्रसिद्धमित्याह—**सतामिति**। सत्पुरुषाणां सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः। ननु वाङ्नियमनमेव प्रसिद्धं मौनमिति चेदत आह अर्द्धेन—**गिरेति** ॥ १०९ ॥

इदानीं देशं लक्षयति—**आदाविति**। अत्र जनस्य त्रैकालिकाभाव आनुभविकः स्वप्रतीत्या ज्ञेयः, न तु लौकिकशास्त्रीयप्रतीतिभ्याम्। विरोधादिति भावः। स्पष्टमन्यत् ॥ ११० ॥

अथ कालं लक्षयति—**कलनादिति**। निमेषत आरभ्य कलनात्सर्गस्थितिप्रलयाधारत्वादित्यर्थः। शेषं स्पष्टम् ॥ १११ ॥

आसनं लक्षयति—**सुखेनैवेति**। यस्मिन्सुखे सुखरूपे ब्रह्मणि चिन्तनं कर्त्तव्याकर्त्तव्यचिन्ता नैव भवेत् तद्ब्रह्मासनं विजानीयादित्यन्वयः। कीदृशं ब्रह्म ? अजस्रं कालत्रयावस्थायीत्यर्थः। सुगममन्यत् ॥ ११२ ॥

प्रसङ्गादासनविशेषं लक्षयति—**सिद्धमिति**। सिद्धं च तदासनं च। अथवा सिद्धानामासनं सिद्धासनमिति। कर्मधारयतत्पुरुषसमासाभ्यां ब्रह्मैवेत्यर्थः ॥ ११३ ॥

अथ मूलबन्धं लक्षयति—**यन्मूलमिति**। आकाशादिसर्वभूतानां यन्मूलमादिकारणं ब्रह्म तथा

अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥

दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥

दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत्।
दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥

निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥

चित्तबन्धनं चित्तस्य बन्धकारणं मूलाज्ञानं तदपि यन्मूलं यदाश्रयं पृथक्सत्ताशून्यत्वादिति। यद्वा चित्तस्य बन्धनमेकत्र लक्ष्ये निग्रहस्तदपि यन्मूलं यस्य ब्रह्मणः प्राप्तिनिमित्तमित्यर्थः। स मूलबन्ध इत्यन्वयः। राजयोगिनां व्यवहारेऽप्यविक्षिप्तचित्ततालक्षणो राजयोगस्तद्व्रतां ज्ञानपरिपाकयुक्तानामित्यर्थः। शेषं स्पष्टम् ॥ ११४ ॥

इदानीं देहसाम्यं लक्षयति—अङ्गानामिति। अङ्गानां ब्रह्मण्यध्यस्तानां स्वभावविषमाणामधिष्ठानसमत्वदृष्ट्या समतां विद्याज्जानीयात् चेत्समे ब्रह्मणि। अङ्गवैषम्यमित्यत्राध्याहारः। तच्चेन्नो लीयते समब्रह्मरूपतया न तिष्ठतीत्यर्थः। तर्हीत्यत्र शेषः। शुष्कवृक्षवदङ्गानामृजुत्वं सरलत्वमचञ्चलत्वं च यत्तत्समानत्वं नैव भवेदिति सम्बन्धः। अङ्गानां विषमस्वभावत्वादिति भावः ॥११५॥

इदानीं दृक्स्थितिं लक्षयति—दृष्टिमिति। ब्रह्मणि फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वात् दृष्टिमन्तःकरणवृत्तिं ज्ञानमयीमखण्डब्रह्माकारां कृत्वा जगत्सर्वं ब्रह्ममयं पश्येत्। 'ब्रह्मैवेदं सर्वमि'त्येतावन्मात्रैव वृत्तिः कार्येति भावः। स्पष्टमन्यत् ॥ ११६ ॥

ननु तथापि ब्रह्मणि वृत्तिप्रवृत्तिनिमित्तजात्याद्यभावादिन्द्रियादिप्रत्यक्षविषयस्य जगतो ब्रह्मरूपत्वेन दर्शनं कथं स्यादित्याशङ्क्य स्वारस्यात्पक्षान्तरेणाह—दृष्टीति। वाशब्दः पक्षान्तरे। दृष्टीत्यादिना श्रोत्रादिसर्वत्रिपुटीनामुपलक्षणम्। यत्र यस्मिन् ब्रह्मस्वरूपे दृष्ट्यादिसर्वत्रिपुटीनां विरामो लयो भवेत्तत्र तस्मिन्नेव प्रपञ्चातीते दृष्टिरन्तःकरणवृत्तिः कर्तव्या, न नासिकाग्रावलोकिनीत्यर्थः ॥ ११७ ॥

अथ प्राणायामं लक्षयति—चित्तादीति। मनोऽधीनत्वात्प्राणस्य मनोनिरोधेनैव प्राणनिरोधः, न तु प्राणनिरोधेनैव पातञ्जलाभिमतेन मनोनिरोधस्तदधीनत्वाभावादिति फलितार्थः ॥ ११८ ॥

अमुं प्राणायामं स्वाभिमतेन रेचकादिविभागत्रयेण लक्षयति सार्द्धेन—निषेधनमिति ॥११९॥

ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः ।
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ १२० ॥

विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥ १२१ ॥

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणं चैव धारणा सा परा मता ॥ १२२ ॥

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्याता परमानन्ददायिनी ॥ १२३ ॥

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४ ॥

तत इति । अनात्मोपेक्षाऽऽत्मानुसन्धानतद्दाढर्यानि रेचकादिशब्दवाच्यानीति भावार्थः । नन्वयं त्रिविधोऽपि प्राणायामो न कुत्रापि श्रुत इत्यपेक्षायामत्राधिकारिणमाहार्द्धेन—**अयमिति** । अयमुक्तलक्षणः प्राणायामः । चकाराद्भेदत्रययुक्त इत्यर्थः । प्रबुद्धानां प्रकर्षेणासम्भावनादिरहितत्वेन बुद्धानामात्मबोधयुक्तानाम् । निःसन्देहाऽपरोक्षज्ञानिनामित्यर्थः । योग्य इत्यध्याहारः । तर्ह्यज्ञानां कीदृश इत्यत आह—**अज्ञानामिति** ॥ १२० ॥

इदानीं प्रत्याहारं लक्षयति—**विषयेष्विति** । विषयेषु घटादिषु । यद्वा शब्दादिषु अन्वयव्यतिरेकाभ्यामात्मतां सत्तास्फुरत्ताप्रियतामात्रतां दृष्ट्वानुसन्धाय मनसोऽन्तःकरणस्य चितिमज्जनं नामरूपक्रियानुसन्धानराहित्येन चित्स्वरूपतयावस्थानं स प्रत्याहारः । ततः किमत आह—**अभ्यसनीय इति** ॥ १२१ ॥

धारणां लक्षयति—**यत्रेति** । यत्र यत्र यस्मिन् यस्मिन् पदार्थे मनो याति गच्छति तत्र तत्र ब्रह्मणः सत्तादिमात्रस्य नामाद्युपेक्षया दर्शनादनुसन्धानान्मनसो धारणं ब्रह्मण्येव स्थिरीकरणं धारणेत्यर्थः । नन्वाधारादिषट्चक्रमध्ये एकत्र मनसो धारणं 'धारणा' इति प्रसिद्धमत आह—**सेति** । साऽत्रोक्तलक्षणा धारणा परोत्कृष्टा मता । तत्त्वबोधवतामिति शेषः । अन्या तु पातञ्जलाभिमता प्राणायामादिवदपरेति भावः । च एवेत्यव्ययद्वयं वेदान्तविद्वदनुभवप्रसिद्धिं द्योतयति ॥१२२॥

अथात्मध्यानं लक्षयति—**ब्रह्मैवेति** । सद्वृत्त्या सती प्रमाणान्तरबाधायोग्या वृत्तिस्तया वृत्त्या निरालम्बतया देहाद्यनुसन्धानराहित्येन स्थितिः, अवस्थानमित्यर्थः । शेषं स्पष्टम् ॥ १२३ ॥

अथान्त्यं समाधिरूपं पञ्चदशमङ्गं लक्षयति—**निर्विकारतयेति** । निर्विकारतया विषयानुसन्धानरहिततयान्तःकरणवृत्त्या, पुनरनन्तरमेव ब्रह्माकारतया यत्सम्यक्प्रपञ्चसंस्काररहितं धातृध्येयाकारवृत्तिशून्यं वृत्तिविस्मरणं द्वैताननुसन्धानं स समाधिः पञ्चदशमङ्गमित्यर्थः । ननु वृत्तिविस्मरणस्याज्ञानरूपत्वात्कथं समाधित्वमित्याशङ्क्य ब्रह्मात्मैक्यबोधाभावे केवलवृत्तिविस्मरणस्य

इमं चाकृत्रिमानन्दं तावत्साधु समभ्यसेत् ।
वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सम्भवेत्स्वयम् ॥ १२५ ॥

ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
तत्स्वरूपं न चैतस्य विषयो मनसो गिराम् ॥ १२६ ॥

समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात् ।
अनुसन्धानराहित्यमालस्यं भोगलालसम् ॥ १२७ ॥

लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः ॥ १२८ ॥

भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् ॥ १२९ ॥

ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।
ते तु वृथैव जीवन्ति पशुभिश्च समा नराः ॥ १३० ॥

तथात्वेऽपि न ब्रह्मज्ञानसहितस्य तथात्वमित्याशयेन समाधिं विशिनष्टि—**ज्ञानसंज्ञक इति**। ज्ञानमिति संज्ञा यस्य स ज्ञानसंज्ञकः। ब्रह्माकारतया स्फुरणरूप इत्यर्थः। उक्तं च—'समाधिः संविदुत्पत्तिः परजीवैकतां प्रति' इति ॥ १२४ ॥

इदानीं यदर्थं साङ्गमिदं निदिध्यासनमुक्तं तदाह—**इममिति**। अकृत्रिमानन्दं स्वरूपभूतानन्दाभिव्यञ्जकं निदिध्यासनमित्यर्थः। चकाराद्यथाबुद्धि वेदान्तविचारमपीति स्पष्टमन्यत् ॥१२५॥

एवमभ्यसतः फलमाह—**तत इति**। साधननिर्मुक्तः साधनाभ्यासरहित इत्यर्थः। एतस्य योगिनः तद्वेदान्तप्रसिद्धं स्वरूपं ब्रह्मैवेति भावः ॥ १२६ ॥

अखण्डैकरसब्रह्मस्वरूपत्वेनावस्थानलक्षणमोक्षफलदोऽयं समाधिपर्यन्तो योगो गुर्वनुग्रहवतां सुकरोऽस्ति तथापि सुकर इत्यनादरो न कार्यः, विघ्नबाहुल्यसम्भवादित्याह द्वाभ्यां—**समाधाविति**। स्पष्टोऽर्थः ॥ १२७ ॥

लय इति। तत्र लयो निद्रा। तमः कार्याकार्याऽविवेकः। विक्षेपो विषयस्फुरणम्। रसास्वादो धन्योऽहमित्याद्यानन्दाकारा वृत्तिः। च पुनः शून्यता चित्तदोषः, रागद्वेषादितीव्रवासनया चित्तस्य स्तब्धीभावः कषायः। क्षुब्धतेत्यर्थः। स्पष्टमन्यत् ॥ १२८ ॥

वृत्तिरेव बन्धमोक्षकारणमित्याह—**भावेति**। भाववृत्त्या घटाद्याकारवृत्त्या भावत्वं तन्मयत्वम्। भवतीति शेषः। शून्यवृत्त्या अभाववृत्त्या। शून्यता जडतेत्यर्थः। हीति लोकप्रसिद्धौ। तथा ब्रह्माकारवृत्त्या पूर्णत्वम्। हीति विद्वत्प्रसिद्धौ। ततः किमत आह—**पूर्णत्वमिति**। ॥ १२९ ॥

इदानीं ब्रह्ममयीं वृत्तिं स्तोतुं तद्वृत्तित्यागपरान्निन्दति—**ये हीति**। ये एनां ब्रह्माख्यां वृत्तिं जहति त्यजन्ति ते तु वृथैव जीवन्तीत्यन्वयः। स्पष्टमन्यत् ॥ १३० ॥

ये हि वृत्तिं विजानन्ति ज्ञात्वापि वर्धयन्ति ये ।
ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥ १३१ ॥

येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ १३२ ॥

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।
तेऽप्यज्ञानितया नूनं पुनरायान्ति यान्ति च ॥ १३३ ॥

निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ १३४ ॥

कार्ये कारणताऽऽयाता कारणे नहि कार्यता ।
कारणत्वं ततो गच्छेत्कार्याभावे विचारतः ॥ १३५ ॥

अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः ॥ १३६ ॥

सम्प्रति तामेव वृत्तिं विवर्द्धयितुं ब्रह्मवृत्तिपरान्सत्पुरुषान् स्तौति—**ये हीति** । स्पष्टम् ॥१३१॥

एवं ब्रह्मवृत्तिपरान्स्तुत्वाऽधुना तेषां ब्रह्मप्राप्तिरूपं फलमाह—**येषामिति** । सुगमम् ॥ १३२ ॥

तानेव शब्दवादिनो निन्दति—**कुशला इति** । स्पष्टम् ॥ १३३ ॥

यत एवं तस्माद् ब्रह्मनिष्ठैर्ब्रह्मवृत्त्यैव सर्वदा स्थातव्यमिति सूचयितुं ब्रह्मादीनामुदाहरणमाह—**निमेषेति** । यथा ब्रह्माद्यास्तथा सनकाद्याः, यथा सनकाद्यास्तथा शुकाद्या इति सम्प्रदायो दर्शितः । एतेन ब्रह्मादिसेव्यत्वादतिश्रेष्ठोऽयं समाधिपर्यन्तो राजयोगः सर्वदा मुमुक्षुभिः सेवनीय इति ध्वनितम् ॥ १३४ ॥

तदेवं स्वाभिमतं साङ्गं राजयोगमभिधाय पूर्वोपक्रान्तसाङ्ख्यापरपर्यायं वेदान्तविचारमुपसंहरति—**कार्यं** इत्यादिपञ्चभिः श्लोकैः । कार्ये घटपटादिरूपे विकारे कारणता मृत्तन्त्वादिरूपा सर्वविकाराधिष्ठानता आयाताऽनुगता, कारणे तु कार्यता नाहीति प्रसिद्धम् । ततः कारणात्कार्याभावे कारणत्वं गच्छेत् । ननु कथं कारणे कार्याभाव इत्यत आह—**विचार इति** । यथायं दृष्टान्तस्तथाकाशादिकार्ये कारणता । आकाशोऽस्तिभातीत्यादिव्यवहारहेतुभूता सत्यज्ञानादिरूपब्रह्मणः कारणता आयाता अनुगता, कारणे ब्रह्मणि तु आकाशादिकार्यता नहीति । परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणतापि नहीति दार्ष्टान्तिकोऽर्थः ॥ १३५ ॥

ततः किमत आह—**अथेति** । अथानन्तरं कार्यकारणभावनिवृत्तौ यच्छुद्धं मनोवाचामगोचरं वस्तु तद्भवेत् । 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः । ननु बुद्धेः क्षणिकत्वेनैकदा तथा विचारितेऽपि पुनरन्यथैव भातीत्यत आह—**द्रष्टव्यमिति** ॥ १३६ ॥

अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥ १३७ ॥

कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्ये नित्ये प्रपश्यति ॥ १३८ ॥

कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् ।
कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः ॥ १३९ ॥

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना ।
पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥ १४० ॥

अदृश्यं भावरूपं च सर्वमेव चिदात्मकम् ।
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥ १४१ ॥

न केवलमयं विचारो ज्ञानसाधनमेवापि तु ध्यानसाधनमपीत्याह—**अनेनेति** । अनेनैव प्रकारेण शुद्धचित्तानां वृत्तिज्ञानम् उदेति, ततः परं ब्रह्मात्मिका वृत्तिर्भवेदिति योजना । पदानामर्थस्तु स्फुट एव ॥ १३७ ॥

तमेव विचारं विशदयति द्वाभ्याम्—**कारणमिति** । आदौ प्रथमं कारणं व्यतिरेकेण कार्यविरहेण विचारयेत् । पुनस्तत्कारणमन्वयेनानुवृत्त्या कार्येऽपि नित्यं प्रपश्यतीति ॥ १३८ ॥

अथवैवं विचारयेदित्याह—**कार्येति** । आदौ कार्ये कारणमेव विचारयेत्, पश्चात्तत्कार्यं विसर्जयेत् नानुसन्दध्यात् । एवं कार्यवर्जने सति कारणत्वं स्वत गच्छेत् । एवं कार्यकारणवर्जनेऽवशिष्टं सच्चिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति ॥ १३९ ॥

ननु विचारजन्यापरोक्षज्ञानेन मुनेर्ब्रह्मत्वं भवतु नाम, परन्तु परोक्षज्ञानिनः कथं भवेदित्याशङ्क्य तीव्रभावनया परोक्षज्ञानिनोऽपि ब्रह्मत्वं भवेदिति सदृष्टान्तमाह—**भावितमिति** । अयं भावः—यद्यपि परोक्षज्ञानेन प्रमातृगतावरणनिवृत्तौ सत्यामपि प्रमेयगतमावरणं न निवर्त्तते तथापि नश्चयात्मना निश्चययुक्तबुद्धिमता पुरुषेण यद्वस्तु सच्चिदानन्दं ब्रह्म तीव्रवेगेनाहर्निशं ब्रह्माकारवृत्त्या भावितं चिन्तितं तद्वस्तु ज्ञेयमपरोक्षेण ज्ञातुं योग्यं ब्रह्म शीघ्रमचिरेण पुमान् भवेत् । प्रत्यगभिन्नब्रह्मभावनया पुरुषो ब्रह्मरूपो भवतीत्यर्थः । हीति विद्वत्प्रसिद्धौ । तत्र सर्वलोकप्रसिद्धं दृष्टान्तमाह—**भ्रमरकीटवदिति** । भ्रमरेण कुतश्चिदानीय जोवन्नेव स्वकुटयां प्रवेशितो यः कीटः स यथा भयात् भ्रमरध्यानेन भ्रमर एव भवति तद्वदिति ॥ १४० ॥

यदि पूर्वश्लोकोक्तदृष्टान्ते भावनाबलादेवान्यस्यान्यत्वं भवेत् तर्हि ब्रह्मविवर्तत्वेन ब्रह्मरूपस्य विश्वस्य ब्रह्मभावनया तद्रूपता भवेदिति किमु वक्तव्यमित्याशयेन सर्वात्मभावनामाह—**अदृश्यमिति** । अदृश्यं परोक्षं भावरूपं प्रत्यक्षं च सर्वं विश्वम् । यद्वा अदृश्यं द्रष्टृरूपम्, भावरूपं दृश्यम् । चकाराद्दर्शनम् । एतत्सर्वं त्रिपुटयात्मकं जगद्भ्रान्त्याऽऽत्मभिन्नत्वेन भासमानमपि चिदात्मकं निर्विशेषस्फुरणमात्र-

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत् ।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥

एभिरङ्गैः समायुक्तो राजयोग उदाहृतः ।
किञ्चित्पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥

॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचिताऽपरोक्षानुभूतिः समाप्ता ॥

स्वरूपं स्वात्मानमेव बुधः अद्वैतज्ञाननिष्ठः सावधानतया स्थिरवृत्त्या नित्यं भावयेत्, सकलमिदमहं च ब्रह्मैवेति सर्वदा पश्येदित्यर्थः ॥ १४१ ॥

एतदेव विवृणोति—**दृश्यमिति** । दृश्यं घटादिकमदृश्यतामधिष्ठानचिद्रूपतां नीत्वा । हीति विद्वत्प्रसिद्धौ । ब्रह्माकारेण कल्पितस्य परिच्छिन्नस्य नामरूपादेर्निवृत्तिपूर्वकं बृहदाकारेणापरिच्छिन्नरूपेण चिन्तयेदित्यर्थः । ततः किमत आह—**विद्वानिति** । चिद्रसपूर्णया चिदेव रसश्चिद्रसश्चिदानन्दस्तेन पूर्णया धिया नित्यसुखे अविनाशिसुखे विद्वांस्तिष्ठेदिति ॥ १४२ ॥

इदानीमुक्तं स्वाभिमतयोगमुपसंहरति—**एभिरिति** । किञ्चित्स्वल्पं पक्वाः दग्धाः कषाया रागादयो येषां तेषां हठयोगेन पातञ्जलोक्तेन प्रसिद्धेनाष्टाङ्गयोगेन संयुतोऽयं वेदान्तोक्तो योग इति । शेषं स्पष्टम् ॥ १४३ ॥

अयं राजयोग एव केषां योग्य इत्याकाङ्क्षायां सर्वग्रन्थार्थमुपसंहरन्नाह—**परिपक्वमिति** । येषां मनः परिपक्वम्, रागादिमलरहितमिति यावत् । तेषामित्यध्याहारः । तेषां जिताग्षिड्वर्गाणां पुरुषधुरन्धराणाम् । केवलः पातञ्जलाभिमतयोगनिरपेक्षः । अयं वेदान्ताभिहितो योगः सिद्धिदः प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्तिप्रदः । चकारोऽवधारणे । नान्येषामपरिपक्वमनसामित्यर्थः । ननु परिपक्वमनस्त्वमतिदुर्लभमित्याकाङ्क्षायामस्यापि साधनत्वादतोऽप्यन्तरङ्गसाधनमाह—**गुरुदैवतभक्तानामिति** । जवादतिशीघ्रमित्यर्थः । सर्वेषामिति पदेन वर्णाश्रमादिनिरपेक्षं मनुष्यमात्रं ग्रहीतव्यम्, अत एव गुरुदैवतभक्तेरन्तरङ्गत्वम् । तथा च श्रुतिः—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इति । स्मृतयश्च—'तद्विद्धि प्रणिपातेन' । 'श्रद्धावाँल्लभते ज्ञानम्' इत्याद्याः । अयं भावः—परिपक्वमनसामपि दुःसाध्यानि साधनानि गुरुदैवतभक्तानां सुसाध्यानि भवन्तीति हेतोर्गुरुदैवतभजनमेव स्वधर्माविरोधेन सर्वैः कार्यमिति परमं मङ्गलम् ॥ १४४ ॥

॥ इति श्रीमद्विद्यारण्यस्वामिविरचितदीपिका समाप्ता ॥

श्रीशङ्करभगवत्पादाचार्यविरचितः

आत्मबोधः

श्रीपद्मपादाचार्यविरचितवेदान्तसारटीकोपेतः

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत् ।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥

एभिरङ्गैः समायुक्तो राजयोग उदाहृतः ।
किंचित्पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥

॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचितापरोक्षानुभूतिः समाप्ता ॥

[illegible] च ब्रह्मैवेति सर्वदा [illegible] ॥ १४१ ॥

एतदेव विवृणोति—दृश्यमिति । [illegible] ॥ १४२ ॥

[illegible] ॥ १४३ ॥

अथ [illegible] —परिपक्वमिति । [illegible] ॥ १४४ ॥

॥ इति श्री[illegible]दीपिका समाप्ता ॥

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितः

आत्मबोधः

तमोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयं आत्मबोधो विधीयते ॥ १ ॥

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिद्ध्यति ॥ २ ॥

अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसङ्घवत् ॥ ३ ॥

श्रीपद्मपादाचार्यविरचितवेदान्तसारटीकासहितः

शतमखपूजितपादं शतपथमनसोप्यगोचराकारम् ।
विकसितजलरुहनेत्रं उमाच्छायाङ्कमाश्रये शम्भुम् ॥

तत्र भगवान् शङ्कराचार्यः उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनां अनुग्रहार्थं सर्ववेदान्तसिद्धान्तसङ्ग्रहधनमात्मबोधप्रकरणं दिदर्शयिषुः प्रतिजानीते—**तपोभिरिति**। कृच्छ्रचान्द्रयणनित्यनैमित्तिकाद्यनुष्ठानरूपैः तपोभिः क्षोणानि पापानि-रागाद्यन्तः-करणदोषाः येषाम् । "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं" इति वचनात् । अत एव शान्तानां वीतरागिणां इहामुत्रार्थफलभोगरहितानां मुमुक्षूणां संसारग्रन्थिभेदने कृतप्रयत्नानां यथोक्तसाधन-सम्पन्नानां अयमात्मबोधो विधोयते विधिमुखेन आवश्यकतया प्रतिपाद्यत इत्यर्थः ॥ १ ॥

ननु तपोमन्त्रकर्मयोगाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येनोच्यते इत्यत्राह—**बोधोऽन्येति**। तपोमन्त्रकर्मयोगादिसाधनानि परम्परया क्रमेण ज्ञानद्वारा मोक्षं साधयन्ति। ज्ञानन्तु स्वजन्ममात्रादेव अज्ञानं निश्शेषं नाशयित्वा मुमुक्षुन् स्वाराज्येऽभिषेचयति । अतोऽन्य-साधनेभ्यो ज्ञानस्य प्रधान्यमुक्तम् । तदेव दृष्टान्तेन दृढयति—**पाकस्येति** । यथा लोके पचनक्रियायाः काष्ठजलभाण्डादिसाधनेषु सत्स्वपि वह्निं विना पाको न सिध्यति तद्वत् ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः ॥ २ ॥

ननु कर्मणां विचित्रशक्तित्वात्कर्मैव किञ्चिदज्ञानं नाशयिष्यति । किमात्मज्ञानेनेत्याशङ्क्य कर्माज्ञानयोर्विरोधाभावान्नैवमित्याह—**अविरोधितयेति** । अज्ञानरूपं कर्म अन्तःकरणमालिन्यरूपं

अविच्छिन्न इवाज्ञानात्तन्नाशस्येति केवलः ।
स्वयंप्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥ ४ ॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥
संसारः स्वप्नतुल्यो हि रागद्वेषादिसङ्कुलः ।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसन्भवेत् ॥ ६ ॥
तावत्सत्यं जगद्भाति शुक्तिका रजतं यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥ ७ ॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः ।
व्यक्तयो विविधास्सर्वा हाटके कटकादिवत् ॥ ८ ॥

कामक्रोधादिकं नाशयितुं नोत्सहते। विद्या तु प्रकाशरूपत्वादज्ञानं नाशयितुं तमस्तेजःपुञ्ज इव क्षमत इत्यर्थः ॥ ३ ॥

ननु प्रतिशरीरं भिन्न एवात्मा उपलभ्यते कथमस्य कैवल्यमित्याशङ्क्याह—**अवच्छिन्न इवेति**। परिपूर्णस्याद्वितोयस्यात्मनः अज्ञानपरिकल्पितोच्चावचशरीराध्यासकृतपरिच्छिन्नत्वमविवेककृतमेव। न तु तत्त्वदृष्ट्या। विवेकेन तन्नाशादात्मा केवल एव प्रकाशते मेघावरणाभावे भानुरिवेत्यर्थः ॥ ४ ॥

नन्वात्मनः अभेदबुद्धिरयुक्ता, वृत्तिज्ञानेन भेदसिद्धेः इत्यात्राह—**अज्ञानकलुषमिति**। अज्ञानकार्यभूतैः अहमादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं च ज्ञानं कर्तृ चिरकालाभ्यासवशादज्ञानहानिद्वारा तत्कार्यान्तःकरणादिकमशेषतो नाशयित्वा स्वयमपि नश्यति। आत्माज्ञानकार्यात्वाद्वृत्तेः तत्र प्रतिबिम्बितज्ञानं आत्मावभासरूपत्वादात्मन्येवैकीभवति। तदानीं आत्मा प्रकाशते। यथा कतकरेणुः अखिलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः ॥ ५ ॥

अपरोक्षतया अनुभूयमानस्य संसारस्य कथमत्यन्तासत्वं, प्रत्यक्षविरोधादित्याशङ्क्य स्वप्नदृष्टान्तेन तस्य मिथ्यात्वं साधयति—**संसारेति**। रागद्वेषादिभिः सङ्कुलायमानः संसारः स्वकाले स्वस्य कारणभूताज्ञाने स्थिते सति तावन्मिथ्याभूतोऽपि संसारः सत्य इव भाति। प्रबोधे सति वाक्यश्रवणादात्मज्ञानोत्पत्तौ असत्य एव भवति। तत्र दृष्टान्तः स्वप्नतुल्यः। यावन्निद्रा अनुभूयते तावन्मिथ्याभूतोऽपि स्वप्न सत्य इवाभाति। प्रबोधे निद्रानाशे मिथ्या भवति। तद्वदित्यर्थः ॥ ६ ॥

जगन्मिथ्यात्वमेव दृष्टान्तान्तरेण द्रढयति—**तावदिति**। यथा नीलपृष्ठत्रिकोणादिविशेषज्ञानं नोत्पद्यते यावत् तावद्रजतज्ञानं सत्यमिवानुभूयते। तथा सर्वाधिष्ठानभूतं सच्चिदानन्दाद्वयं ब्रह्म यावन्न ज्ञायते, साक्षी नानुभूयते तावज्जगदाकारेण परिणतः संसारः सत्य इव भ्रान्त्या दृश्यत इत्यर्थः ॥ ७ ॥

सर्वं दृश्यं प्रपञ्चजातं ब्रह्मण्येव मायया परिकल्पितमिति प्रतिपादयति—**सच्चिदात्मनीति**।

यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत् ॥ ९ ॥
नानोपाधिवशादेव जातिनामाश्रमादयः ।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ १० ॥
पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १२ ॥
अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १३ ॥

सत्यज्ञानानन्दात्मनि नित्ये सर्वानुस्यूते विष्णौ व्यापके परब्रह्मणि सर्वा व्यक्तयो देवतिर्यङ्नरस्थावरजङ्गमादयः सर्वोपादानभूते परमेश्वरे हेम्नि कटकमुकुटादिवत्कल्पिता एव ब्रह्मणोऽभिन्ना इत्यर्थः ॥ ८ ॥

उक्तमर्थमाकाशदृष्टान्तेन द्रढयति—**यथाकाश इति ।** हृषीकेशः = मनःप्रभृतिसर्वेन्द्रियप्रेरकः नियामको वा, विभुः = सर्वगतः परमेश्वरः स्वमायापरिकल्पितनानाविधोपाधिषु प्रतिबिम्बितः सन्नानेन भाति । तन्नाशे सति = ब्रह्मात्मैक्यज्ञाने सति तेषां मायापरिकल्पितदेहाद्युपाधीनां नाशे सति केवलः एक एव भाति । यथा एक एव आकाशो मठघटाद्युपाधिषु एकस्सन्नानेव भाति, उपाधिविलयादेकवद्भाति तद्वदित्यर्थः ॥ ९ ॥

ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुविद्ध्यमानस्य कथं नित्यमुक्ततेत्यत्राह—**नानोपाधीति ।** पूर्वोक्तनानोपाधिवशादेव आत्मनि जातिनामाश्रमादयः, आरोपिताः = मायया परिकल्पिताः । ननु सत्याः । यथा स्वभावतो माधुर्यं जलं कटुतिक्तमधुररक्तपीतादिद्रव्यवशात्तत्तद्रूपं भवति नतु स्वरूपेण तद्वदित्यर्थः ॥ १० ॥

आत्मनो विद्यात्मनोऽविद्यापरिकल्पितोपाधित्रयमध्ये स्थूलोपाधिमाह—**पञ्चीकृतेति ।** पञ्चीकृतानां, भूतानां प्रत्येकं द्वेधाविभज्य तत्रैकमेकधर्मं पुनश्चतुर्धा विभज्य स्वांशं परित्यज्योत्तरेषु संयोजनं पञ्चीकरणम् । एवं पञ्चीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः सम्भवो यस्य तत् । सम्भूतं प्रारब्धकर्मभिः सञ्चितं = रचितं स्थूलशरीरं सुखदुःखभोगानामायतनं = भोगस्थानं प्रत्यगात्मन इत्युच्यते ॥ ११ ॥

पञ्चप्राण इति । यस्यैव महाप्राणस्य प्राणादयः पञ्च वृत्तयः । ज्ञानेन्द्रियकर्मेन्द्रियाणि दश, मनः यस्य सङ्कल्पात्मिका अन्तःकरणवृत्तयः, बुद्धिशब्देन निश्चयान्तःकरणवृत्तिः । अपञ्चीकृतसूक्ष्मवृत्तिव्याप्तमहाभूतेभ्यः इत्थं जातं सूक्ष्माङ्गं लिङ्गशरीरं सुखदुःखभोगसाधनमुच्यत इत्यर्थः ॥ १२ ॥

कार्योपाधिमुक्त्वा कारणोपाधिमाह—**अनादीति ।** सदसद्भ्यामनिर्वचनीयाऽविद्याऽनादिः-

पञ्चकोशादियोगेन तत्तन्मय इव स्थितः ।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १४ ॥

वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः ।
आत्मानमान्तरं शुद्धं विविञ्च्यात्तण्डुलं यथा ॥ १५ ॥

सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवाभासेत स्वच्छेषु प्रतिबिम्बवत् ॥ १६ ॥

देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १७ ॥

कारणोपाधिभूता। स्थूलसूक्ष्मप्रपञ्चयोः कारणभूतत्वात्। अनृतजडदुःखविलक्षणत्वेन सच्चिदानन्दादिरूपेण अञ्चति प्रकाशत इति प्रत्यक्कारणोपाधिरुच्यते। उपाधिवर्णने प्रयोजनमाह—**उपाधित्रितयादन्यमिति**। तत्साक्षिणमात्मानं अवधारयेत् जानीयादित्यर्थः ॥ १३ ॥

ननु अन्नमयादिकोशेषु तत्तन्मयतया स्थितस्य कुतो नित्यमुक्तत्वमुच्यते इत्याशङ्क्याह—**पञ्चकोश इति**। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः पञ्चकोशाः। आदिशब्देनाशनादीनां ग्रहणम्। एतयोर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थितः। आत्मा शुद्धः। ननु तेषु वस्तुतो रञ्जनाखेदोऽपि, "स वा एष पुरुषोऽन्नरसमयः" इति सूक्ष्मवस्तुदर्शनार्थमुपाधिस्थ ब्रह्म सूचयति। ननु तत्वदृष्ट्या, यथानीलः स्फटिकः नीलपीतादिवस्त्रयोगेन तत्तन्मय इव भाति वस्तुतो नास्ति रञ्जना तद्विदित्यर्थः ॥ १४ ॥

आत्मस्वरूपज्ञाने विवेचनप्रकारमाह—**वपुरिति**। पञ्चकोशैस्तावदात्मानं मिथ्यातादात्म्येन स्थितं, वपुः=स्थूलशरीरं, तुषादिभिर्युक्तं तण्डुलमिव, युक्त्यवघाततः=अवहननाच्छुद्धमात्मानं तण्डुलमिव, विविच्यात् विवेकेन जानीयात्। कथं, स्थूलदेहो नात्मा, कार्यभूतत्वात्, घटवत्। सूक्ष्मदेहोऽपि तथैवानात्मा, देहत्वात् स्थूलदेहवदित्यनुमानादिना तेभ्यस्तेभ्यो भिन्नमात्मनं विविच्य जानीयादित्यर्थः ॥ १५ ॥

ननु सर्वगतस्तर्हि किं सर्वत्र न दृश्यत इत्यत्राह—**सदेति**। आत्मा सदा सर्वगतोऽपि सर्वत्र व्याप्य स्थितोपि जडैः बहिः प्रवृत्ताक्षैः न प्रकाश्यते। रागादिभिः अविद्धायां बुद्धावेवावभासते। न सर्वत्र यथा प्रतिबिम्बः स्वच्छेषु दर्पणादिष्वेव दृश्यते नान्यत्र, तद्वदित्यर्थः ॥ १६ ॥

देहे स्थितस्याप्यात्मनः औदासीन्यं राजपुरुषदृष्टान्तेनाह—**देहेन्द्रियेति**। देहेन्द्रियमनोबुद्धिप्रकृतिभ्यः जडपरिणामदृश्येभ्यः। विलक्षणं=शुद्धं, आत्मानं, तद्वृत्तीनां=साक्षितया स्थितं, यथा राजा स्वनगरेषु स्थितः मन्त्रिषु वर्तमानेषु सत्सु स्वयंसाक्षितया तान्पश्यन् तिष्ठति तद्वदेव जानीयादित्यर्थः ॥ १७ ॥

व्यापृत्तेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनाम् ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १८ ॥
आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ १९ ॥
देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २० ॥
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाऽम्भसः ॥ २१ ॥
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २२ ॥

नन्वात्मनोऽविकारित्वं अयुक्तं यतः सर्वदा व्यापारवान्दृश्यते इत्यत्राह—**व्यापृतेष्विति** । इन्द्रियादिषु व्यापृत्तेषु आत्मा व्यापारीवाविवेकिनां गुरुशास्त्रादिरहितानां दृश्यते । नतु तत्वदृशाम् । यथा मेघेषु वायुवशाद्धावत्सु चन्द्रोऽपि धावन्निव लौकिकैः दृश्यते । नतु चन्द्रमा धावति । तद्वदात्मापीत्यर्थं ॥ १८ ॥

ननु देहेन्द्रियमनोबुद्धयोऽपि आत्मवत्किमर्थं सचेतना दृश्यन्त इत्यत्राह—**आत्मचैतन्यमिति** । सत्यज्ञानानन्दरूपस्यात्मनः चैतन्यमाश्रित्य देहेन्द्रियमनोबुद्धयादयः स्वकीयार्थेषु स्वस्वविषयेषु वर्तन्ते । यथा जनाः प्राणिनः । सूर्यालोकं=सूर्यप्रकाशमाश्रित्य व्यापारेषु व्यवहरन्ति । स्वतः चैतन्यमात्मन एव, देहेन्द्रियादयस्तु जडा एव इत्यर्थः ॥ १९ ॥

ननु अहं जातोऽस्मि, बाल्यकौमारयौवनाद्यवस्थामनुभवामि, पश्यामीत्यादिना अनवरतमनुभूयमानस्यात्मनः कथं अविकारित्वमुच्यत इत्यत्राह—**देहेन्द्रियेति** । देहेन्द्रियमनोबुद्धिधर्मान् गुणांश्च सत्त्वादीन्कर्माणि च कर्मेन्द्रियव्यापारान् मिथ्यातादात्म्येन स्थिते निर्मलेऽसङ्गरूपे सच्चिदानन्दात्मके परमात्मनि अत्यन्तसामीप्याददविवेकतोऽध्यस्यन्ते । यथा गगने नीलादिवत् अतस्ते आत्मधर्मा न भवन्ति । अपितु देहादीनामेवेत्यर्थः ॥ २० ॥

ननु कर्तृभोक्तृत्वादिकमात्मन्यनवरतमनुभूयमानत्वात्तत्र दुर्वारमित्याशङ्क्य तदापि तथैव मिथ्येत्याह—**अज्ञानादिति** । अज्ञानवशान्मानसोपाधिः यस्य तस्यैव कर्तृत्वादयो धर्माः । ते तु अज्ञानवशादेव आत्मनि कल्प्यन्ते । यथा अम्भसः चलनादिकं अम्बुनि प्रतिफलिते चन्द्रेऽविवेकतः कल्प्यते तद्वदात्मनीत्यर्थः ॥ २१ ॥

इच्छाद्वेषसुखदुःखादीनात्मधर्मान् मन्यन्ते वैशेषिकादयः । तान्निराकरोति—**रागेच्छेति** । रागेच्छादि सुखदुःखप्रयत्नादिकं सर्वं बुद्धेरेव न त्वात्मनः । कथं ? जाग्रत्स्वप्नयोः बुद्धौ सत्यां प्रवर्तते । सुषुप्तौ तस्या बुद्धेर्नाशे कारणे लीने तन्न प्रवर्तते । यस्माद्बुद्धेरेव धर्माः न त्वात्मनः इति ॥ २२ ॥

प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता।
स्वभावस्सच्चिदानन्दनित्यनिर्मलतात्मनः ॥ २३ ॥

आत्मनस्सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्।
संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २४ ॥

आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्वपि।
जीवस्सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति ॥ २५ ॥

रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् ॥ २६ ॥

आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २७ ॥

स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ २८ ॥

तस्यात्मनः कीदृक् स्वभावः इत्याशङ्क्यात्मस्वभावमुपदिशति—**प्रकाश इति**। यथा प्रकाश एव अर्कस्य स्वभावः। तोयस्य शैत्यं, अग्नेरुष्णता तथा आत्मनोऽपि सच्चिदानन्दनित्यनिर्मलता स्वभावः=स्वरूपमित्यर्थः ॥ २३ ॥

यद्यविकारोऽयमात्मा जानामीति प्रत्ययः कथमित्यपेक्षायामाह—**आत्मन इति**। प्रत्यगात्मनः सच्चिदंशः अंश इवांशः आत्माभासः। बुद्धेः वृत्तिश्च एतद्द्वयं अविवेकेन संयोज्य असङ्गस्यात्मनः संयोज्य, असङ्गस्यात्मनः केनापि संयोगो नास्त्येव तथापि अज्ञानवशान्मेलनं सम्भाव्य जानामीति प्रत्ययः साभासाहङ्कारवृत्तिः प्रवर्तते। प्रत्यगात्मनि किञ्चिद्विकारो नास्तीति भावः ॥ २४ ॥

एतदेव स्पष्टयति—**आत्मन इति**। आत्मा स्वभावादेव विकारशून्यः। बुद्धेः कदाचिदपि बोधशङ्कैव नास्ति, आत्मन्यपि विक्रिया नास्ति, तथापि जीवः साभासाहङ्कारः साभासान्तःकरण-वृत्तीनामेकत्र तप्तायःपिण्डवत्सङ्गतमेव, अलमत्यर्थं देहेन्द्रियादिकमहमिति ज्ञात्वाऽविचार्य अहं ज्ञाता द्रष्टा भोक्ता कर्ता जातो मृत इति, मुह्यति=भ्रमत इत्यर्थः ॥ २५ ॥

आत्मा स्वयमेव स्वप्ने वा अविवेकेनान्यधर्मानारोप्य बिभेतीत्याह—**रज्जुसर्पवदिति**। रज्जौ सर्पारोपणं कृत्वा भयकम्पनादिकं वहेत्। एवं आत्मानं जीवं मत्वा बहुदुःखसंसारमग्नो भवति। यदा शास्त्राचार्योपदेशवशात् विवेकचक्षुषा स्वमात्मानमखण्डैकरूपं जानाति तदा भयरहितः सुखी भवेत्। २६ ॥

आत्मेति। आत्मा केवलमेक एव सन्नपि बुद्ध्यादीनि अवभासयति, तैस्तु नावभास्यते। यथा एक एव दीपः घटादिकं तद्वदित्यर्थः ॥ २७ ॥

आत्मा बुद्ध्यहङ्कारादीनपेक्षते स्वप्रकाशने इति स्वीकर्तव्यमित्याशङ्क्याह—**स्वबोधेति**।

निषिध्य सकलोपाधीन्नेति नेतीति वाक्यतः ।
विन्द्यादैक्यं महावाक्ये जीवात्मपरमात्मनोः ॥ २९ ॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम् ।
एतद्विलक्षणं विन्द्यादहं ब्रह्मेति निर्मलम् ॥ ३० ॥
देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः ।
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च ॥ ३१ ॥
अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ।
अप्राणो ह्यमनाश्शुभ्र इत्यादिश्रुतिशासनात् ॥ ३२ ॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः ।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ ३३ ॥

आत्मनो बोधरूपत्वात् स्वबोधे नित्ये सति तस्यात्मनो बोधाय ज्ञानान्तरापेक्षा नास्त्येव । अनुभवरूपत्वात् । यथा दीपस्य स्वप्रकाशने दीपान्तरापेक्षा नास्त्येव तद्वदित्यर्थः ॥ २८ ॥

यदि बुध्यादिभिः आत्मा ज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपायान्तरं वक्तव्यम् । स उपाय कथमित्यत आह—**निषिध्येति** । अथात आदेशो नेति नेतीत्यतन्निरसनवेदान्तवाक्येन तत्त्वंपदार्थगतसवज्ञत्वकिञ्चिज्ज्ञत्वाखिलोपाधीन्निषिध्य-अनात्मत्वेन ज्ञात्वा निरस्य 'तत्वमसि' 'अयमात्मा ब्रह्म' 'अहं ब्रह्मास्मि' इत्यादिवाक्यैः लक्षणया ब्रह्मात्मैक्यज्ञानं विद्यात् प्राप्नुयात् । अनेन प्रकारेण ज्ञातव्यमित्यर्थः ॥ २९ ॥

आत्मस्वरूपज्ञाने अतन्निरसनाभावे का क्षतिरित्याशङ्क्य अतन्निरसनाभावे आत्मा ज्ञातुमशक्यः । यथायं सर्प इत्यारोपितस्य सर्पस्यापाकरणाभावे रज्जुज्ञानं नोत्पद्यते तद्वदनात्मनिरसनेनात्मा ज्ञातव्य इत्याशयेनाह—**आविद्यकमिति** । देहेन्द्रियादि सर्वं दृश्यजातं, आविद्यकं, दृश्यत्वाद्, बुद्बुदवत्, क्षरं, एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदानन्दात्मकं ब्रह्मैवाहमस्मीति विन्द्यात्, ततः कृतकृत्यो भवतीत्यर्थः ॥ ३० ॥

एवमुक्तरीत्याऽऽत्मानमद्वयानन्दं वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा स्वानुभवावष्टम्भेन आत्मन्येवात्मनो मननप्रकारमाह—पञ्चभिः श्लोकैः । **देहान्यत्वादिति** । देहान्यत्वात् दृश्यादिस्वाभावस्थूलशरीराद्यन्यत्वाज्जन्मजराकार्श्यलयादयो न सन्ति इन्द्रियादिभिः असङ्गत्वात् शब्दादिविषयभोगः सङ्गः=अनुभवः, नास्त्येव, अनुभवत्वात् न मे दुःखरागद्वेषादयः । "अप्राणो ह्यमनाश्शुभ्र" इत्यादिश्रुतेः ॥ ३१ ॥

कथमिन्द्रियप्राणमनसामभावस्तस्यैवेत्याशङ्क्य श्रुतिं प्रमाणयति । अत्र श्रुतिः—अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः । एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । अप्राणो ह्यमना इति स्वार्थः ॥ ३२ ॥

गुरोः प्रसादात्स्वानुभवसिद्धमर्थं चाभिनन्दयति निर्गुण इत्यादिभिः त्रिभिः श्लोकैः । अहं निर्गुणः बुद्ध्याद्यभावात् । निष्क्रियः=इन्द्रियाद्यभावात् । नित्यः, अविद्याकार्यरहितत्वात् ॥ ३३ ॥

अहमाकाशवत्सर्वबहिरन्तर्गतोऽच्युतः ।
सदा सर्वसमश्शुद्धो निस्सङ्गो निर्मलोऽचलः ॥ ३४ ॥
एवं निरन्तरकृता ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ॥ ३५ ॥
नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत् परब्रह्माहमेव तत् ॥ ३६ ॥
विविक्तदेश आसीनो विरागो विजितेन्द्रियः ।
भावयेदेकमात्मानं तमनन्तमनन्यधीः ॥ ३७ ॥
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥
रूपवर्णादिकं सर्वं विहाय परमार्थवित् ।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते ॥ ३९ ॥
ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते ।
चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव तत् ॥ ४० ॥

पूर्वोक्तहेतुभिः अवशिष्टं स्वरूपं अज्ञासिषमित्युक्ते तत्किमवशिष्टमित्याशङ्क्याह—**अहमिति ।** आकाशवत्सर्वस्य दृश्यजातस्य बहिरन्तर्गतः अच्युतः = च्युतिरहितः सदा सर्वसमः = विषमेऽपि समं व्याप्य स्थितः तथापि शुद्धः निर्लेपः अचलः पूर्णस्य चलनाभावात् ॥ ३४ ॥

पूर्वोक्तश्लोकमननं चिरकालाभ्यस्तं तत् पुरुषार्थं साधयतीत्याह—**एवमिति ।** एवमुक्तं ब्रह्मैवाहमस्मीति नैरन्तर्येण चिरकालाभ्यस्तवासना अविद्याकृतचित्तविक्षेपान् निश्शेषतो नाशयति । यथा रसायनं औषधं चिरकालसेवितं सत् रोगान्निश्शेषतो नाशयति तद्वदित्यर्थः ॥ ३५ ॥

नित्य इति । सत्यादिश्रुत्या यत्प्रतिपाद्यते तत् ब्रह्मैवाहमस्मीति स्वरूपतत्त्वं कथितम् ॥ ३६ ॥

ब्रह्मानुसन्धाने साधननियमानाह—**विविक्त इति ।** ब्रह्मण्येव स्थिता बुद्धिः यस्य तादृशो भवेत् । दृश्यप्रपञ्चे जाग्रति कथमेकत्वभावना सम्भवतीत्यत आह ॥ ३७ ॥

आत्मनीति । अखिलं दृश्यजातं सुधीः = शुद्धान्तःकरणः सन् शुद्धया धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा तदा द्वितीयाभावादेकमात्मानं सज्योत्स्नाकाशवद्भावयेत् ॥ ३८ ॥

परमात्मदर्शी मुनिः नामरूपवर्णादिकं सर्वं विहाय परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते इत्याह—**रूपे इति ।** रूपवर्णादिकमिति स्पष्टोऽर्थः ॥ ३९ ॥

ननु प्रमातृत्वादित्रिपुटीज्ञानं वर्तमानमुपलभ्यते । कथमेकत्वभावनेत्याशङ्क्य परमात्मनि भेदो नास्तीत्याह—**ज्ञात्रिति ।** ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते भेदः कल्पितात्मन्येव अवभाति ज्ञानानन्दैकरूपत्वादात्मा स्वयमेव दीप्यते = प्रकाशते ॥ ४० ॥

एवमात्माऽरणौ ध्यानमथने सततं कृते ।
उदिताऽवगतिज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४१ ॥
अरुणेनेव बोधेन पूर्वसन्तमसे हृते ।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२ ॥
आत्मा तु सततं प्राप्तो ह्यप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा ॥ ४३ ॥
स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्विके रूपे सम्यक् दृष्टे निवर्तते ॥ ४४ ॥
तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४५ ॥
सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितम् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥ ४६ ॥

एवं विशुद्धवस्तुज्ञानात्प्रत्यक्षफलमाह—**एवमिति** । आत्मा अन्तःकरणमेव अरणिः तस्मिन् मन एव उत्तरारणिः ध्यानेन तयोर्मंथने सर्वदा कृते तत्रोदिता ज्वालारूपावगतिः ज्ञानं विद्या अज्ञानमेव इन्धनं मूलाज्ञानं निश्शेषतः सपरिकरं दहति = नाशयति । तितिक्षुः मुमुक्षुः स्वाराज्येऽभिषिक्तः कृतकृत्यो भवतीत्यर्थः ॥ ४१ ॥

जीवपरयोरत्यन्तैक्यज्ञानेन अविद्यापरिकल्पितान्धतमसि निश्शेषमपयाते सति परमात्मा स्वयमाविर्भवतीत्याह—**अरुणेति** । अरुणेन प्रकाशेनादौ अन्धकारक्षये अंशुमान् यथा अविर्भवेत् तद्वदात्माऽपीत्यर्थः ॥ ४२ ॥

आत्मा सर्वदा परोक्षस्वभावत्वादप्राप्त एव कदा प्राप्तो भवेदित्याह—**आत्मेति** । आत्मा सर्वत्र परिपूर्णः अद्वयानन्दस्वरूपः सर्वदा प्राप्त एव । अविद्यावशाद्भ्रान्त्या अप्राप्त इव भाति । तन्नाशे तदावरणाविद्यानाशे वाक्यश्रवणात्प्राप्त इव कण्ठगतचामीकरन्यायेन तद्विदित्यर्थः ॥ ४३ ॥

ननु जीवस्य परमात्मैक्यमयुक्तमित्याशङ्क्याह—**स्थाणाविति** । यथाऽन्धकारे स्थिते स्थाण्वादौ पुरुषोऽयमित्याशङ्कया बिभेति तथैवाविवेकाद्ब्रह्मणि जीवत्वमारोप्य । यदा तत्त्वमस्यादिवाक्योपजनितविवेकदृष्ट्या तस्य जीवस्य तात्विके रूपे सम्यक्दृष्टे सति कल्पितत्वाज्जीवत्वमपि निवर्तते तदैव ब्रह्मैवाहमिति जानीयादित्यर्थः ॥ ४४ ॥

अहंममेति प्रत्यये जाग्रति कथमैक्यज्ञानमित्याशङ्क्याह—**तत्त्वस्वरूपेति** । जीवपरयोः नैरन्तर्याभासेनैकत्वानुभवादुत्पन्नं यद्ज्ञानं तदहं ममेति अज्ञानं बाधते दिग्भ्रमादिवत् । अनुभवदर्शनादित्यर्थः ॥ ४५ ॥

अहं ममेति प्रत्यये नष्टे योगी विज्ञानेन चक्षुषा सर्वं दृश्यजातं स्वात्मन्येवाभेदेन पश्यतीत्याह—**सम्यगिति** । सम्यग्विज्ञानवान्योगी अधिष्ठानभूते स्वात्मनि अखिलं विश्वं स्थितं पश्यति

आत्मैवेदं जगत्सर्वं आत्मनोऽन्यन्न किञ्चन ।
मृदो यथा घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४७ ॥

जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् ।
स सच्चिदादिधर्मत्वं भेजे भ्रमरकीटवत् ॥ ४८ ॥

तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी शान्तिसमायुक्त आत्मारामो विराजते ॥ ४९ ॥

बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवच्छश्वदन्तरेव प्रकाशते ॥ ५० ॥

उपाधिस्थोऽपि तद्धर्मैर्न लिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५१ ॥

विज्ञानेन चक्षुषा मृत्सुवर्णादिवत् । यद्वा आत्मत्वाच्च प्रमातृत्वात्सर्वभूतेषु मशकादिष्वपि नियन्तृत्वेन वर्तमानं निरतिशयैश्वर्यं पश्यति न तु तारतम्येन, किञ्च मलिनभूतेत्वपि निरतिशयेन जात्याद्यप्रसक्त्या ऐश्वर्यादि पश्यति परिपूर्णत्वात् । तदा कृतकृत्यो भवतीत्यर्थः ॥ ४६ ॥

नान्वात्मा सर्वं न भवति । प्रत्यक्षविरोधात् । नानात्वेन दृश्यमानमिदं कथमात्मन्यभेदेन पश्यतीत्यत आह—**आत्मैवेति** । इदं सर्वजगदात्मैव आत्मकार्यत्वात् । अतोऽन्यदात्मनः किञ्चिन्न विद्यते । यथा घटशरीरादि मृदन्यन्न भवति । अतः आत्मन्येव सर्वं दृश्यजातं न भेदेनेक्षते पश्यतीत्यर्थः । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" "सर्वंखल्विदं ब्रह्मे"ति श्रुतेः ॥ ४७ ॥

एवंभूतश्चेज्जीवन्मुक्तो भवति—**जीवन्निति** । अनाद्यविद्यापरिकल्पितस्थूलशरीराद्युपाधिगुणान्परित्यजन्नयमेव जीवन्मुक्त इत्युच्यते । सच्चिदानन्दादिधर्मत्वात् । भ्रमरकीटवत्साक्षाद्ब्रह्म भेजे प्राप्नोतीत्यर्थः । ततः स्वात्मारामः सुखं तिष्ठतीत्याह—**तीर्त्वेति** । मोह एव अर्णवः अपर्यन्तत्वात्, तं ज्ञानप्लवेनैव तीर्त्वा, रागद्वेषादय एव राक्षसाः मोक्षपरिपन्थिनः । तान्निश्शेषतो नाशयित्वा, शान्तिसमायुक्तः=शमदमादिसमेतः । आत्मारामः आत्मन्येव क्रीडा यस्य सः । विराजते=स्वाराज्येऽभिषिक्तः प्रकाशत इत्यर्थः ॥ ४९ ॥

जीवन्मुक्तस्य लक्षणमाह—**बाह्येति** । बाह्येन्द्रियोद्भवां अनित्यसुखासक्तिं=वासनां हित्वा, तत्र हेतुः आत्मसुखनिर्वृत इति । घटस्थदीपवदन्तरेव स्वसाक्षितया आत्मानुभव इतरैर्न ज्ञायत इत्यर्थः ॥ ५० ॥

एवमुक्तप्रकारेण जीवन्मुक्तेन प्रारब्धसंक्षयपर्यन्तं वर्तितव्यमित्याह—**उपाधिरिति** । देहाद्युपाधिसाक्षित्वेन स्थितोऽपि मुनिः व्योमवत्तद्धर्मैः नानुलिप्तः कर्मलेपो नास्त्येव । सर्वज्ञोऽपि प्राकृतवत्तिष्ठेत् । सर्वत्र विषयेषु यदृच्छया प्राप्तेष्वपि आसक्तिरहितस्सन्वायुवच्चरेत् ॥ ५१ ॥

उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५२ ॥

यल्लाभान्न परो लाभो यत्सुखान्न परं सुखम् ।
यज्ज्ञानान्न परं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५३ ॥

यद् दृष्ट्वा न परं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥

तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम् ।
अनन्तं नित्यमेकं यत् तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥

अतद्व्यावृत्तिभेदैस्तु वेदान्तैर्लक्ष्यतेऽव्ययम् ।
अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥

अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥ ५७ ॥

प्रारब्धक्षये सति देहद्वयोपाधौ विलीनेऽपि देहात्कैवल्यमाह—**उपाधिविलयादिति**। उपाधिभूतदेहद्वयलये प्रारब्धकर्मसंक्षये मुनिः = योगी सन् । विष्णौ = सर्वव्यापके परब्रह्मणि निर्विशेषं यथा भवति तथा विशेत् । दृष्टान्तः—**जले जलमित्यादि** ॥ ५२ ॥

ब्रह्म सर्वातिशयत्वात्तटस्थलक्षणेनाभिन्नमिति श्लोकत्रयेणाह—**यल्लाभादिति**। यल्लाभात् = ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते, सर्वलाभानामत्रैवान्तर्भूतत्वात् । ब्रह्मानन्देषु क्षुद्रानन्दानां अन्तर्धानम् । यत्सुखात् = ब्रह्मानुभवसुखादपरं सुखं नास्ति । निरतिशयसुखत्वात् । यज्ज्ञानात् = ब्रह्मसाक्षात्कारज्ञानादपरं ज्ञानं नास्ति । मोक्षहेतुत्वात् । तद्ब्रह्मेत्यवधारयेत् = जानीयादित्यर्थः ॥ ५३ ॥

यद्दृष्ट्वेति। यद्ब्रह्म दृष्ट्वा पुनरन्यद्दृश्यं नास्ति तत्रैव पुरुषार्थस्य सिद्धत्वात्। **यज्ज्ञात्वा = येन पर**मात्मनाप्यैक्यं ज्ञात्वा, न पुनर्भवः जन्मादिकं नास्ति । यज्ज्ञात्वा = यत्स्वरूपं ज्ञात्वाऽन्यत् ज्ञेयं नास्ति तद्ब्रह्मेत्यवधारयेत् । अन्यत्सर्वं वृथापाण्डित्यमेव ॥ ५४ ॥

स्वरूपलक्षणं श्लोकद्वयेनाह—**तिर्यगूर्ध्वमिति** । स्पष्टोऽर्थः ॥ ५५ ॥

अतद्व्यावृत्तीति । स्पष्टोऽर्थः ॥ ५६ ॥

ननु ब्रह्मादयोऽपि निरतिशयानन्दा एव श्रूयन्ते । तत आह—**अखण्डेति** । लवा ब्रह्मेन्द्रादयः परिच्छिन्नानन्दा एव । ब्रह्म त्वखण्डानन्दरूपत्वादपरिच्छिन्नानन्दमेव, तस्य आनन्दसमुद्रस्य लेश-

तद्युक्तमखिलं वस्तु व्यवहारस्त्वतिप्रियः ।
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५८ ॥

अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ५९ ॥

यद्भासा भास्यतेऽर्कादि भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेति ॥ ६१ ॥

स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डवत् ॥ ६२ ॥

जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किञ्चन ।
ब्रह्मान्यदस्ति चेन्मिथ्या यथा मरुमरीचिका ॥ ६३ ॥

माश्रित्य ब्रह्मादयः आनन्दिनो भवन्ति आनन्दतारतम्येन "एतस्यैवानन्दस्यान्यापि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः ॥ ५७ ॥

आत्मैव परमप्रेमास्पदतया सर्वप्रियतमो भवतीत्याह—तद्युक्तमिति। अखिलं देहादिवस्तु तद्युक्तं तेन संयुक्तमेव प्रियतमम् । व्यवहारोऽपि तद्युक्तं एव अत्यन्तं प्रियः । तस्मात्सर्वगतं ब्रह्मात्यन्तप्रियं यथाखिले क्षीरे घृतमिव व्यापित्वात् आत्मैव प्रियत्वेन सिद्धः ॥ ५८ ॥

तर्ह्यात्मा केन प्रकारेण सर्वं व्याप्य तिष्ठतीति जानीयादित्याशङ्क्य साक्षाद्वक्तुमशक्यत्वात्तत्तारूपेण भातीत्यनण्वस्थूलमिति । श्रुतिं प्रमाणयतीत्याह—अनण्वेति । स्पष्टोऽर्थः ॥ ५९ ॥

पुनस्तदेव ब्रह्म ज्ञानार्थं श्लोकत्रयेण प्रथमं निरूपयति—यद्भासेति। यत्तेजोभासा भान्वादिकं भास्यते भास्यैरर्कादिभिः यत्तेजो नावभासते । "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"ति श्रुतेः ॥ ६० ॥

तथा गीताशास्त्रे—येन सर्वमिदं भाति तद्ब्रह्मेति जानीयात् ॥ ६१ ॥

तप्तायःपिण्डवत्स्वयमेव अन्तर्बहिर्व्याप्य प्रकाशत इत्याह—स्वयमिति । स्पष्टोऽर्थः ॥ ६२ ॥

पुनस्तदेवाह—जगद्विलक्षणमिति । सर्वं ब्रह्मैव सत्यं तथापि जगद्रूपेण यदा पश्यति तदा-

दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥ ६४ ॥

सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥ ६५ ॥

श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः ।
जीवस्सर्वमलान्मुक्तः स्वर्णवद्दृश्यते स्वयम् ॥ ६६ ॥

हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् ।
सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम् ॥ ६७ ॥

ग्राह्यजगद्वैलक्षण्येन तत्कार्यत्वेन विचार्य ज्ञातुं शक्यम् । ब्रह्मणोऽन्यद्वस्तु न विद्यते । मृत्सुवर्णादिवत् । ततोऽन्यद्यत्किञ्चिद्दृश्यते चेत्तन्मिथ्या मरुमरीचिकाजलवदित्यर्थः ॥ ६३ ॥

पुनस्तदेव स्पष्टयति—**दृश्यत इति** । चक्षुषा यद्दृश्यते श्रोत्रेन्द्रियेण यच्छ्रूयते मनसा यत्स्मर्यते मनसा वाचा यदभिधीयते तत्वज्ञानात्तत्सर्वं ब्रह्म । "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तमसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्वः ततस्तु तं पश्यते निष्कलं ध्यायमान" इत्यादिश्रुतेः । "न कर्मणा न प्रजये"त्यादिश्रुतेः । तथा गीताशास्त्रे—"नाहं वेदै"रित्यादि—भक्त्या त्वनन्यया शक्य इत्यन्तेन ॥ ६४ ॥

ननु सर्वगतं चेद्ब्रह्म सर्वैः किं न दृश्यत इत्याशङ्क्य न चक्षुरादिभिः गृह्यत इत्याह—**सर्वगमिति** । अज्ञानचक्षुः सर्वगतमपि सच्चिदानन्दमद्वयं ब्रह्म न पश्यति । "न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति । तमक्रतुं पश्यति वीतशोको धातुप्रसादान्महिमानमीशमि"त्यादिश्रुतेः । तत्र दृष्टान्तमाह—प्रकाशमानमपि । भानुं = सूर्यं अन्धो न पश्यति तद्वदित्यर्थः ॥ ६५ ॥

11027

एवं तावदुक्तरीत्याऽनुभवसम्पन्नस्यापि तदभ्यासरहितस्य वासनाबलात्किञ्चिदज्ञानं सम्भवति । तत्परिहारार्थं पुनः श्रवणादीनि कार्याणीत्याह—**श्रवणादिभिरिति** । जीवः प्रत्यगात्मा साभासाहङ्कारः इह श्रवणमननादिभिः दीप्तः = प्रकाशितः ज्ञानाग्निपरितापितः ज्ञानमेवाग्निः तेन परितापित = शोधित इत्यर्थः । सर्वाज्ञानमलान्मुक्तः स्वयमेव सम्यक्प्रकाशते । यथाग्निना परितापितं स्वर्णं स्वोपाधिद्रव्यं हित्वा स्वरूपेण प्रकाशते तद्वदित्यर्थः ॥ ६६ ॥

एवं शोधितो जीवः परमात्मा हृदाकाशतमोऽज्ञानमुपसंहरन्भानुवत्प्रकाशत इत्याह—**हृदाकाश इति** । बोध एव भानुः आकाशवत्सर्वव्यापी सर्वस्य आधारभूतत्वात् सर्वाधारो भाति । सर्वंस्वरूपेण सर्वं ब्रह्माहमिति प्रकाशते । मृत्सुवर्णादिवत् "सर्वं खल्विदं ब्रह्मे"तिश्रुतेः । "विश्वं भूतं" इत्यादि "तस्मै रुद्राय नमो अस्त्वि"त्यन्तं श्रुतेः । रुः अशुभं द्रावयते इति रुद्रः ॥ ६७ ॥

दिग्देशकालाद्यनवेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादाचार्यविरचितः आत्मबोधः ॥

आत्मज्ञस्य परमज्ञानप्रतिबन्धकदुरितपरिहारार्थं नानापदार्थैर्यागः कर्तव्य इत्याशङ्क्य स्वात्मतीर्थंरतस्य न किञ्चित्कर्तव्यमस्तीत्याह—यः निष्क्रियः परमहंसः स्वात्मतीर्थं भजते सः सर्ववित् = सर्वज्ञः सर्वत्रगः परमात्मस्वरूपत्वादमृतः । मुक्तो भवेत् । कथंभूतं स्वात्मतीर्थं दिग्देशकालाद्यनवेक्ष्य शीतादिहृत् = शीतादिभेददुःखानि हरतीति शीतादिहृत् । नित्यसुखं = परमानन्दहेतुत्वात् । अत एव निरञ्जनम् । इतरतीर्थेषु तद्वैपरीत्यं द्रष्टव्यम् । तस्मादात्मतीर्थंरतस्य न किञ्चिदवशिष्यत इति भावः ॥ ६८ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादशिष्यश्रीपद्मपादाचार्येण कृतं वेदान्तसाराख्यं व्याख्यानं सम्पूर्णम् ॥

11027

श्रीशङ्करभगवत्पादाचार्यविरचिता

त्रि पु री

श्रीआनन्दगिर्याचार्यविरचितविवरणटीकोपेता

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादाचार्यविरचितः आत्मबोधः ॥

आत्मकल्प [illegible] इत्याशङ्क्य स्वात्मतीर्थं [illegible] —यः निष्क्रियः परमहंसः स्वात्मतीर्थं भजते सः सर्ववित् = सर्वज्ञः सर्वगः [illegible] अमृतः । मुक्तो भवेत् । कथंभूतं स्वात्मतीर्थं दिग्देश-कालाद्यनपेक्ष्य शीतादिहृत् = शीतादीन् [illegible] हरतीति शीतादिहृत् । नित्यसुखं = परमानन्द-हेतुत्वात् । अत एव निरञ्जनम् । [illegible] ॥ ६८ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य [illegible] ॥

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचिता

त्रिपुरी

शब्दस्पर्शरूपरसगन्धादयो विषयाः पञ्च, पृथिव्यादयश्च परमात्मनः समुत्पन्नाः। पृथिव्यापस्तेजो वायुराकाशमिन्द्रियाणि, अहङ्कारो बुद्धिर्महानव्यक्तम्। तत्र पृथिवी

श्रीआनन्दगिर्याचार्यविरचितविवरणम्

अध्यात्मादिविभेदेन यदविद्या विजृम्भते।
तद्ब्रह्म नौम्यहं सत्यमानन्दज्ञानमव्ययम्॥

मुमुक्षूणां मोक्षसाधनसम्यग्ज्ञानमपेक्षमाणानां अनायासेन तत्प्राप्त्यर्थं त्रिपुरीप्रकरणमारभमाणः सुखप्रतिपत्त्यर्थं अध्यारोपापवादन्यायेन तत्त्वमुपदिदिक्षुः अध्यारोपप्रक्रियया प्रथमं सृष्टिमन्वाचष्टे—**शब्देति**। शब्दादयो गन्धान्ता बुद्धीन्द्रियविषयाः। वक्तव्यादयश्च आनन्दयितव्यान्ताः कर्मेन्द्रियविषयाः। मन्तव्यादयश्च चेतयितव्यान्ता अन्तःकरणविषयाः। पृथिव्यादयश्च आकाशान्ताः पञ्चमहाभूताख्याः स्थूलसूक्ष्मविभागभाजः परस्मादात्मनः सकाशान्मायाशक्तिद्वारा जाता व्यवहारमार्गमवतरन्ति। तत्र शब्दादयः स्थूलास्सन्तो भौतिकत्वात् भूतद्वारा परस्मादुत्पद्यन्ते। भूतानि पुनरव्यक्तमेव द्वारीकृत्य ततो भवन्तीति विवेक्तव्यमित्यर्थः।

साधारण्येन महाभूतानां उत्पत्तिमभिधाय तेषामेव अपञ्चीकृतानामुत्पत्तिमभिप्रेत्याह—**पृथिवीति। आकाशमिति**। एतद्भूतपञ्चकं अपञ्चीकृतं परमात्मनः समुत्पन्नमिति सम्बन्धः। सम्प्रति एकादशेन्द्रियाणां अपञ्चीकृतभूतद्वारेण परस्मादुत्पत्तिमभिप्रेत्योक्तम्**इन्द्रियाणीति**। परमात्मनः समुत्पन्नानीति पूर्ववत्। तत्र श्रोत्रं पादौ च आकाशद्वारेण। त्वक् पाणी च वायुद्वारेण चक्षुर्वाक्च तेजोद्वारेण। रसनं उपस्थश्च सलिलद्वारेण। घ्राणं वायुश्च पृथिवीद्वारा परस्मादुद्भवति। मनस्तु समुदितभूतपञ्चकद्वारा तस्मादुत्पन्नं। तद्विषयाणां च तत्तदिन्द्रियप्रकृतिद्वारा परस्मादेवोत्पत्तिरिति विवेचनीयम्। अहङ्कारोऽपि भूतपञ्चकद्वारा परस्मादेवोत्पद्यत इत्याह—**अहङ्कार इति**। अस्मदादिसम्बन्धिनी व्यष्टिबुद्धिरपि तथैवेत्याह—**बुद्धिरिति**। हिरण्यगर्भसम्बन्धिनी समष्टिबुद्धिरपि तथैवेत्याह—**महानिति**। एतेन चित्तोत्पत्तिर्व्याख्याता। उक्तानां भूतभौतिकानामतिसूक्ष्माणां समुत्पत्तौ प्रधानद्वारमनाद्यनिर्वाच्यमज्ञानं कथयति—**अव्यक्तमिति**। पञ्चीकृतस्थूलभूतोत्पत्तिमभिप्रेत्य धारणादितत्तत्क्रियानिमित्तत्वेन तत्तद्भूतोत्पत्तिरित्यर्थः।

क्रियया भूतानि लक्षयति—**पृथिवीत्यादिना**। गुणद्वारेणापि भूतानि लक्षयितुं शक्यानी-

धारणे, आपः पिण्डीकरणे क्लेदने च, तेजः प्रकाशने पचने च, वायुर्व्यूहने, आकाशमवकाशदाने। आकाशमेकलक्षणं, द्विलक्षणो वायुः, त्रिलक्षणं तेजः, आपश्चतुर्गुणाः, पञ्चलक्षणा पृथिवी। शब्दगुणमाकाशम्। परस्परानुप्रवेशेन शब्दस्पर्शगुणो वायुः। शब्दस्पर्शरूपगुणोऽग्निः। शब्दस्पर्शरूपरसगुणा आपः। शब्दस्पर्शरूपरसगन्धगुणा पृथिवी। यत्कठिनं सा पृथिवी। यद्द्रवं तदापः। यदुष्णं तत्तेजः। यत्संसरति स वायुः। यत्सुषिरं तदाकाशमित्येतत्स्थूलशरीरं सदसदात्मकम्।

मनः संकल्पविकल्पात्मकं चेति। इन्द्रियाणि विज्ञानशक्तयः क्रियाशक्तयश्च। ज्ञानशक्तयः श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि। क्रियाशक्तयः वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि। प्राणापानव्यानोदानसमाना इति पञ्च वायवः। मनोबुद्धिरहंकारश्चित्तमिति अन्तःकरणचतुष्टयम्। चेतयितव्यलक्षणं चित्तम्। अभिमानलक्षणोऽहङ्कारः। बोद्धव्यलक्षणा बुद्धिः। महान् प्राणो हिरण्यगर्भः परिस्पन्दात्मा

त्याह—**आकाशमित्यादिना**। लक्षणशब्दो गमकगुणमधिकरोति। उक्तमेव प्रपञ्चयति—**शब्दगुणमिति**। परस्परानुप्रवेशेनेति पञ्चीकरणं सूच्यते। उत्तरत्रापि इदं विशेषणं सम्बध्यते। यद्यपि शब्दादीनां भूम्याकाशादिभूताभेदाभ्युपगमान्न गुणगुणिभावोऽवकल्पते, तथापि स्थूलेषु भूतेषु तथा प्रथामाश्रित्य गुणगुणिभावाभिधानमविरुद्धम्। यद्यपि पञ्चीकृतेषु भूतेषु सर्वत्र सर्वे गुणाः सम्भवन्ति, तथापि तथा प्रतीतिविशेषवशात्तद्व्यवस्थोक्तिरिति भावः। पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च ब्रह्माण्डं सर्वमेतद्वैराजरूपमात्मनः स्थूलं शरीरमित्याह—**इत्येतदिति**। तस्य कार्यकारणरूपतामाह—**सदसदात्मकमिति**। कार्यमभिव्यक्तेः सदित्युच्यते। कारणं चानभिव्यक्तेरसदित्याख्यायते। तदुभयात्मकमुक्तं शरीरमित्यर्थः। अथवा सम्यग्ज्ञानमन्तरेणानिवृत्तेः सदात्मकं, तेन च निवृत्तेरसदात्मकम्। यद्वा कल्पितेन स्वेन रूपेण असदात्मकं, अधिष्ठानरूपेण तु सदात्मकमिति व्याख्येयम्।

सम्प्रति सूक्ष्मशरीरं विवृण्वन्निन्द्रियान्तर्भूतत्वेन सूचितस्य मनसो लक्षणमाह—**मन इति**। अथवा सदसदात्मकमिति सूक्ष्मशरीरान्तर्भूतस्य मनसो लक्षणम्। तद्व्यवस्थाद्वयेन सदपि सुषुप्तावसदिष्यते। तस्यैव लक्षणान्तरमाह—**सङ्कल्पेति**। कानि पुनरिन्द्रियाणि इत्याशङ्क्य, तानि द्वेधा विभजति—**इन्द्रियाणीति**। विज्ञानशक्तिमन्तीन्द्रियाणि विशेषतो निर्दिशति—**विज्ञानेति**। क्रियाशक्तिमन्तीन्द्रियाणि विविच्य कथयति—**क्रियेति**। सप्तदशकलिङ्गसिध्यर्थं क्रियाशक्तिप्रसङ्गात्प्राणादिपञ्चकमुपन्यस्यति—**प्राणेति**। उक्तपञ्चदशकमन्तःकरणद्वयं च गृहीत्वा सप्तदशकं लिङ्गं सिध्यतीत्यभिसन्धाय अन्तःकरणं विभजते—**मनोबुद्धिरिति**। तत्र प्रागेव मनसो लक्षितत्वादवशिष्टमहङ्कारादित्रितयं लक्षयति—**अभिमानेत्यादिना**। बोधशब्देन निश्चयो विवक्ष्यते। चैतन्यलक्षणं तदाभासव्याप्तं तत्प्रधानं तदाकारमिति यावत्। यदुक्तं महानिति, तदिदानीं विवृणोति—**महानित्यादिना**। यद्यपि हैरण्यगर्भी बुद्धिर्महानित्युक्तं तथापि बुद्धिमहतोरभेदमादाय क्रियाशक्तिप्राधान्येन प्राणो महानित्युच्यते। ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः तथा विवक्ष्यते। प्राणशब्दार्थं विविच्य कथयति—**परिस्पन्दात्मेति**। क्रियामात्रस्यात्मासत्ताप्रदः प्राणशब्दार्थः इत्यर्थः। नच तस्मिन्प्रमाणाभावः।

सूत्रं वायुरिति एतत्सूक्ष्मशरीरम् । तथाऽव्यक्तमव्याकृतं प्रधानं बीजं क्षेत्रं तम इति सुषुप्तमित्येतदविद्याशरीरम् ।

स परमात्मा नित्यशुद्धबुद्धमुक्तस्वभावः आकाशवदवस्थितः 'सदेव सोम्येदं' इत्यादिश्रुत्युक्तः इह प्रविष्टः सर्वभूतेषु स्थित्वा श्रोत्रेण शब्दं प्रतिपद्यते । त्वचा स्पर्शं, चक्षुषा रूपं, जिह्वया रसं, नासिकया गन्धं, वाचा वक्तव्यं, हस्ताभ्यां ग्रहीतव्यं, पद्भ्यां गन्तव्यं, पायुना विसर्जयितव्यं, उपस्थेन आनन्दयितव्यम्, मनसा मन्तव्यम्, बुद्ध्या बोद्धव्यम्, अहङ्कारेण अहङ्कर्तव्यम्, चित्तेन चेतयितव्यं, तमसा विकारं प्रतिपद्यते इति सर्वत्र संबध्यते । स आत्मा क्षेत्रज्ञः कर्ता जीवो विज्ञानात्मेति । एतदविद्याशरीरं मणिवदुपाधिविशेषात् । तमेवंविधं मोहशरीरं विदित्वा अकर्तारमात्मानं क्रमेणा पापपुण्यात्मकेन न लिप्यत इति ।

स्थूलप्रपञ्चविधारणलिङ्गात्तदधिगतेरित्याह—**सूत्रमिति**। प्राणस्य सूत्रत्वेन विधारयितृत्वे 'वायुर्वै गौतम' इत्यादिश्रुतिं सूचयति—**वायुरिति**। अपञ्चीकृतानि महाभूतानि तत्कार्यं चोक्तं सर्वमात्मनः सूक्ष्मं शरीरमित्याह—**इत्येतदिति**।

शरीरद्वयकारणं दर्शयन् पूर्वोक्तं प्रपञ्चयति—**अव्यक्तमित्यादिना**। 'तद्धेदं तर्हि अव्याकृतमासीत्' इति श्रुतिसिद्धं साभासमज्ञानं अव्याकृतमित्युच्यते। तस्यैव प्रविलीयमानसमस्तकार्याश्रयत्वं दर्शयति—**प्रधानमिति**। उत्पत्तिकालेऽपि तस्मादेव सर्वं कार्यमुत्पद्यत इत्याह—**बीजमिति**। स्थितिकालेऽपि तत्रैव कार्यजातं तिष्ठतीत्याह—**क्षेत्रमिति**। 'नासदासीन्नोसदासीत्' इत्युपक्रम्य 'तम आसीत्' इति श्रुतेः, 'आसीदिदं तमोभूतम्' इति स्मृतेश्च प्रसिद्धमेतदित्याह—**तम इति**। तस्य चेतनापरतन्त्रतया स्वातन्त्र्यं व्यावर्तयति—**इति सुषुप्तमिति**।

ननु परमात्मनः सकाशादविद्याद्वारेण स्थूलसूक्ष्मशरीरद्वयलक्षणं जगदुत्पद्यते चेत्तस्याविद्यातदुत्थसम्बन्धिनो नित्यशुद्धतादिविहृतिरित्याशङ्क्य अध्यारोपितसम्बन्धो न वास्तवं रूपं व्याहन्तीति परिहरति—**स परमात्मेति**। यस्य वस्तुतो नास्ति परस्य कार्यकारणात्मकप्रपञ्चसम्बन्ध तस्यातिविशदमसङ्गत्वमित्याह—**आकाशवदिति**। अथवा कार्यकरणसम्बन्धो वस्तुतो नास्तीत्यत्र असङ्गत्वं हेतुमाह—**आकाशवदिति**। ननु परस्य कार्यकारणात्मकद्वैतप्रपञ्चसंस्पर्शाभावे तस्य भेदेनावस्थानादस्थाने परित्यक्तमद्वैतमित्याशङ्क्य आरोपितस्याधिष्ठातृमात्रत्वावगमान्नैवमित्याह—**सदेवेति**।

नन्वेवमपि परस्य स्रष्टव्ये प्रविष्टत्वाभावात्तदन्तर्वर्तिना श्रोत्रप्रभृतीनां पृथक्त्वात्कथमद्वितीयत्वमित्याशङ्क्य 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतिमाश्रित्योत्तरमाह—**स परमात्मेत्यादिना**। तर्हि परमात्मनः तत्र श्रोत्रादिभावेन विभक्तत्वादद्वैतानुपपत्तितादवस्थ्यमित्याशङ्क्य 'क्षेत्रज्ञं चापि मां विद्धि' इति श्रुतिमाश्रित्याह—**स आत्मेति**। तस्यैव क्रियाश्रयत्वेन कर्तृत्वं, प्राणानां चारयितृत्वेन जीवत्वं, विज्ञानशब्दितबुद्ध्युपाधिकत्वेन विज्ञानात्मत्वमित्याह—**कर्तेति**। तस्य नानात्वमौपाधिकं स्फटिकादेरिव जपाकुसुमाद्युपाधिकृतं लौहित्यादीत्याह—

अथाऽध्यात्माधिभूताधिदैवानि वक्ष्ये। श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतम्। त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतम्। चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतम्। जिह्वाऽध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतम्। नासाध्यात्मं घ्रातव्यमधिभूतं, पृथिवी तत्राधिदैवतम्। वागध्यात्मं वक्तव्यमधिभूतं अग्निस्तत्राधिदैवतम्। हस्तावध्यात्मं आदातव्यमधिभूतं इन्द्रस्तत्राधिदैवतम्। पादावध्यात्मं गन्तव्यं अधिभूतं विष्णुस्तत्राधिदैवतम्। पायुरध्यात्मम्, विसर्जयितव्यमधिभूतं मित्रस्तत्राधिदैवतम्। उपस्थोऽध्यात्मं आनन्दयितव्यमधिभूतं प्रजापतिस्त्राधिदैवतम्। मनोऽध्यात्मं, मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतम्। बुद्धिरध्यात्मम्, बोद्धव्यमधिभूतं, ब्रह्मा तत्राधिदैवतम्। अहङ्कारोऽध्यात्मं अहंकर्तव्यमधिभूतं, रुद्रस्तत्राधिदैवतम्। चित्तमध्यात्मम्, चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतम्। तमोऽध्यात्मं, विकारयितव्यमधिभूतम्, ईश्वरः कर्म दैवं तत्राधिदैवतम्। एवमध्यात्माधिभूताधिदैवतं तत्सर्वमुक्तम्।

स परमात्मा निर्विकल्पो निरवयवो निर्गुणो निरञ्जनः सर्वगतः सर्वव्यापी सर्वज्ञः सूक्ष्मो नित्यो विरजोऽक्षरः परं ब्रह्म, 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म'

मणिवदिति। जीवस्योपाधिवशात्कर्तृत्वादिरूपेण स्थितस्य अकर्तृत्वादिरूपपरमात्ममात्रत्वेन परिज्ञाने पुण्यापुण्यसंस्पर्शाभावान्मुक्तिरेवेति तज्ज्ञानफलं दर्शयति—**तं विदित्वेति**। अकर्तारमितिच्छेदः।

एकस्य पुरस्य तत्त्वप्रतिपत्तिस्थानरूपं पुरान्तरमवतारयति—**श्रोत्रमित्यादिना**। **अध्यात्मं** इति। आत्मनि शरीरे विषयत्वेन व्यवस्थितमित्यर्थः। **अधिभूतमिति**। भूतेषु तत्तदिन्द्रियविषयत्वेनावस्थितम्। दिशि इति आकाशाभिमानिनी देवता उच्यते। तत्रत्याध्यात्माधिभूतयोः उक्तिः। **अधिदैवमिति**। देवतासु मध्ये अधिष्ठात्री देवतेत्यर्थः। मित्रशब्देन प्राणापानवृत्त्योरभिमानिनी देवता गृह्यते। प्रजापतिशब्देन विराडात्मा पितृरूपमापन्नो विवक्ष्यते ब्रह्मेति हिरण्यगर्भो विराजस्सकाशादान्तरस्सूक्ष्मो देवतात्मा विवक्षितः। रुद्रशब्दो मूर्तिविशेषवचनः। ईश्वरशब्देन सर्वस्योक्तस्य भेदजातस्य कारणमभिलप्यते। अन्यदपि किञ्चिदनुक्तमध्यात्मादिभेदभिन्नमस्तीत्याशङ्कामपनुदन्नुपसंहरति—**एवमिति**।

तत्रेदं भेदजातं परिकल्प्यते सोऽपि भिन्नस्सन्कल्पितस्स्यादिति शून्यवादिनो दर्शनमाशङ्क्य स किं स्वतो भिद्यते परतो वेति विकल्प्य प्रथमं दूषयति—**स परमात्मेति**। स्वतो भेदपक्षेऽपि स भेदः स्वरूपगतो वा स्यादवयवद्वारको वा गुणद्वारको वेति विकल्प्याद्यं निरस्यति—**निर्विकल्पक इति**। द्वितीयं प्रत्याह—**निरन्वय इति**। न तृतीय इत्याह—**निर्गुण इति**। परतो भेदपक्षं प्रतिक्षिपति—**निरञ्जन इति**। न चतुर्थ इत्याह—**सर्वगत** इति। पृथिव्यादेरिव सर्वगतत्वमौपचारिकमिति शङ्कां शिथिलयति—**सर्वव्यापीति**। आकाशवदचेतनत्वमाशङ्क्य विशिनष्टि—**सर्वत्र** इति। तस्य द्विविधेन्द्रियागोचरत्वादपि प्रामाणिको भेदो नास्तीत्याह—**सूक्ष्म** इति। परमाणुतुल्यतां वारयति—**नित्य** इति। न च त्रसरेणुव्यतिरिक्तो नित्योऽस्ति परमाणुरिति भावः। सत्वरजस्तमोभिर-

'प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' 'आत्मैवेदं सर्वं' 'ब्रह्मैवेदं सर्वं' 'पुरुष एवेदं' 'तेनेदं पूर्णं पुरुषेण सर्वं' इत्येतैः विशेषणैः विशेषितं परं ब्रह्म, तदेवाहमोमिति प्रतिपद्यते नीलमहत्सुगन्ध्युत्पलवत् ।

शब्दादयः आत्मानं न जानन्ति परस्परमपि, अन्यज्ञातत्वात् बाह्यघटादिवत् । एवं देहेन्द्रियमनोबुद्धिसङ्घाता आत्मानं न जानन्ति परस्परमप्यन्यदृष्टत्वात्, शब्दादिवत् दृश्यत्वाच्च । शरीरमात्मानं न जनाति घटादिवत् दृश्यत्वाच्च । इन्द्रियाणि आत्मानं न जानन्ति प्रदीपवद्दृश्यत्वात् । मन आत्मानं न जानाति इन्द्रियवद्दृश्यत्वात् । बुद्धिरात्मानं न जानाति मनोवद्दृश्यत्वात् । अहङ्कारः आत्मानं न जानाति बुद्धिवद्दृश्यत्वात् । चित्तमात्मानं न जानाति, अहङ्कारवत् दृश्यत्वात् । सुखदुःखादयो रागादयश्चात्मानं न जानन्ति चित्तवद्दृश्यत्वात् । सुषुप्तौ इन्द्रियमनोबुद्ध्यादीनामभावे शब्दादयो न ज्ञायन्ते, नात्माभावे । तस्मान्नाहं दृश्यो द्रष्टैवाहं सर्वप्रत्ययसाक्षित्वात् ।

संस्पर्शाच्च न तस्मिन्भेदाशङ्केत्याह—**विरज** इति । कूटस्थत्वाच्च तथेत्याह—**अक्षरमिति** । ननु ब्रह्मैवंविधमिष्यते, परमात्मा तु कथमित्थं स्यादित्याशङ्क्याह—**परं ब्रह्मेति** । अथ कथं यथोक्तं ब्रह्म परमपुरुषार्थतया प्रेप्सितमित्याशङ्क्याह—**विज्ञानमिति** । ब्रह्मणा यथोक्तरूपत्वेऽपि प्रत्यगात्मनि किमायातमित्याशङ्क्याह—**तदेवाहमिति** । ननूक्तमैक्यज्ञानमनायासेन केनोपायेन स्यादिति चेदोङ्काराभ्यासेनेत्याह—**ओमिति प्रतिपद्यत** इति । आध्यात्मादिना स्थूलादिना च त्रिधोक्तं योजनादिमात्रं कृत्वा तदपि पूर्वंपूर्वमुत्तरोत्तरमात्रमापाद्योङ्कारं कार्यकारणविभागशून्ये प्रतीचि प्रविलाप्य तन्मात्रमोङ्कारोपलक्षितं सदेवानुसन्दध्यादित्यर्थः । कथं पुनः विज्ञानानन्दादिशब्दानां ब्रह्मणि पर्यवसानमित्याशङ्क्य सामानाधिकरण्यादिद्वारेणेत्युदाहरणेन दर्शयति—**नीलमिति** । दृष्टान्ते धर्मधर्मिभावे सत्यपि दार्ष्टान्तिके तदभावात्पदानामैकरस्यपर्यवसायित्वमवसेयम् ।

तदेवं पुरद्वयं दर्शयित्वा द्रष्टृदृश्यविवेकद्वारापि तत्वप्रतिपत्ती सम्भावयितुं पुनरान्तरं दर्शयति—**शब्दादय इति** । आत्मानमिति शब्दादिस्वरूपोक्तिः । **परस्परमिति** । शब्दो रूपं रूपं च शब्दं न जानातीति यावत् । अन्यदृष्टत्वादित्यनेन हेतुः क्रियते । बाह्यस्य शब्दादिसङ्घातस्य ज्ञातृत्वं निराकृत्याध्यात्मिकस्य निराकरोति—**मन इति** । शरीरस्य न स्वपरविषये द्रष्टृत्वमित्याह—**इन्द्रियाणीति** । उभयविषयद्रष्टृत्वाभावं मनसो दर्शयति—**मन इति** । एवमेव बुद्धिरपीत्यादि व्याख्येयम् । चतुर्विधस्यान्तःकरणस्य द्रष्टृत्वाभावात्तद्वृत्तीनां स्वात्मनि परमात्मनि वा तदभावमभिधत्ते—**सुखेति** । ननु शब्दादीनां दृश्यमानत्वात्तद्द्रष्टृत्वेन आत्मा चेदिष्यते तर्हि सुषुप्त्यादौ शब्दाद्युपलम्भाभावादात्मनोऽपि तदुपलब्धुः असिद्धिरेव स्यात् । आदित्यदर्शनाभावे तत्प्रतियोगिकस्य द्रष्टृत्वस्य प्रतिनिर्देष्टुमशक्यत्वादित्याशङ्क्य 'अविनाशी वा अरेऽयमात्मा' इत्यादिश्रुतिमाश्रित्य परिहरति—**स्वप्न इति** । 'त्रयः स्वप्नाः' इति श्रुतेः स्वप्नशब्देन सुषुप्तिर्गृह्यते । द्रष्टृदृश्यविवेकमुपपादितमुपसंहरति—**तस्मादिति** । तत्पदपरामृष्टं हेतुमेव स्पष्टयति—**सर्वप्रत्ययेति** ।

अपवरकमध्ये प्रदीपवत्स्वभावेनैव प्रकाशयति । यस्मात् गृहप्रविष्टमार्जारान् प्रयत्नाभिमानरहितः प्रकाशयति यथा तथा बुद्धिगृहे ज्ञप्तिस्वरूपः स्वयंज्योतिरात्मा, 'अत्रायं पुरुषस्स्वयंज्योतिर्भवति' 'स्वेन भासा सर्वमिदं विभाति' 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥' इत्येवमादिवचनेभ्यः । बुद्धिवृत्तीनां चक्षुरादिद्वारेणोत्पद्यमानानां रूपाद्याकारप्रत्ययानां सुखदुःखमोहात्मकानां अभ्यन्तरे स्मृतीच्छाप्रयत्नरागद्वेषाभिमानरहितः स्वभावेनैव प्रकाशयति यस्मात्तस्मान्नित्यत्वं शुद्धत्वं बुद्धत्वं विकाररहितत्वं सर्वज्ञत्वं सूक्ष्मत्वमचलत्वं अनामरूपकर्मात्मत्वम् । अशनापिपासाशोकमोहजरामृत्युप्रभृतयः शरीरस्येति 'योऽशनापिपासे जरां मृत्युमत्येति' 'यदिदं किञ्चाश्वभ्यः आशकुनिभ्यः आकीटपतङ्गेभ्यः' प्रकृतेरन्नमिति सिद्धम् । न त्वात्मन इति ।

प्रत्यगात्मनः सर्वसाधकत्वे तदनुकूलप्रयत्नाभिमानप्रसङ्गादविकृतब्रह्मत्वानुपपत्तिरित्याशङ्क्याह—**अपवरकेति** । प्रदीपदृष्टान्तं विवृणोति—**यथेति** । प्रकाशयतीत्यत्र कर्तृत्वेन प्रदीपस्सम्बध्यते । दार्ष्टान्तिकं व्याचष्टे—**तथेति** आत्मा सर्वप्रत्ययप्रयत्नाभिमानरहितः सन्प्रकाशयतीति सम्बन्धः । ज्ञप्तिस्वरूपं यत् ज्योतिः तत्स्वरूपोऽयमात्मेति आत्मनः स्वयंप्रकाशत्वमुक्तम् । तत्र श्रुतिं प्रमाणयति—**अत्रेति** । स्वप्नावस्था सप्तम्या परामृश्यते । स्वेन भासा प्रत्यगात्मस्वरूपभूतेन ज्ञानेन सर्वमिदमादित्यादि तदाभासव्याप्त्या स्पष्टं प्रतिभातीत्यर्थः । तत्र तस्मिन्ब्रह्मणि विषये सूर्यो भासकत्वेन न भातीति योजना । एवं न चन्द्रतारकमित्यादि योजनीयम् । इतश्च परमात्मप्रकाशकत्वं न सूर्यादीनामस्ति, तत्प्रकाश्यत्वादित्याह—**तमेवेति** । अनुगमनवदनुभानं स्वगतप्रकाशवशादित्याशङ्क्य—**तस्येति** । 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म', 'प्रज्ञानघन एव' इत्यादिवचनानि, आदिशब्देन गृह्यन्ते ।

आत्मनो ज्ञप्तिस्वभावस्य प्रयत्नादिरहितस्य सर्वप्रत्ययसाक्षित्वे फलितमाह—**बुद्धिवृत्तीनामिति** । अभ्यन्तरे स्थित्वा ता एव बुद्धिवृत्तीरिति शेषः । शुद्धत्वं सर्वबुद्धिसाक्षित्वात् । बुद्धत्वं समस्तजडसाधकत्वेन बोधैकरसत्वात् । सूक्ष्मत्वं साक्षित्वेनोभयविधेन्द्रियाग्राह्यत्वात् । अचलत्वं आकाशवदवस्थितत्वात् । नामरूपयोस्साक्ष्यकोटिनिविष्टयोः साक्षिणि सम्भावनाभावात् । विकाररहितत्वमनामरूपत्वात् इति विवेक्तव्यम् । प्रत्यगात्मनः षडूर्मिसम्बन्धिनो विकाररहितत्वमसिद्धमित्याशङ्क्याह—**अशनेति** । आश्रयान्तरगामित्वादशनायादीनामात्मसम्बन्धो नास्तीति फलितं वक्तुमितिशब्दः । आत्मनः षडूर्मिसम्बन्धाभावे प्रमाणमाह—**योऽशनेति** । तमेतमात्मानं वेदितुमिच्छन्तः प्रव्राजिनः प्रव्रजन्तीति सम्बन्धः । आत्मनोऽशनायाद्यभावे कथं प्रसिद्धो भोक्तृभोग्यविभागस्सम्भवेदित्याशङ्क्याह—**यदिदमिति । प्रकृतेरिति** । अस्मादधस्तात्पदमध्याहर्तव्यम् । प्रकृतिशब्देन प्राणो गृह्यते, तस्यात्तृत्वप्रसिद्धेरिति द्रष्टव्यम् । अनात्मन्येव भोक्तृभोग्यविभागस्साभासस्यान्तःकरणस्य भोक्तृत्वादिति मन्वानो व्यावर्त्यं दर्शयति—**नत्वात्मन इति** । तृतीयपुरसमाप्त्यर्थं इतीत्युक्तम् ।

जाग्रत्स्वप्नसुषुप्तेषु एक एव आत्मा। जागरिते वैश्वानरः, स्वप्ने तैजसः, सुषुप्ते प्राज्ञः। स एव निर्विशेषस्तुरीयः। स परमात्मा सोऽहमिति। 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सहैवेति'।

॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचिता त्रिपुरी समाप्ता ॥

शरीरद्वयोपन्यासेनाध्यात्मादिविभागाभिधानेन द्रष्टृदृश्यवचनेन च तत्त्वप्रतिपत्तिप्रकारं व्याख्यायावस्थात्रयद्वारेणापि तत्प्रतिपत्तिप्रकारं व्याचिख्यासुः आत्मनः प्रत्यवस्थं भेदमाशङ्क्याह—**जाग्रदिति**। एकत्वे कथं संज्ञाभेदः स्यादित्याशङ्क्य अवस्थाभेदवशादित्याह—**जागरित इति**। अवस्थासम्बन्धिनस्सकाशादन्यस्यैवात्मनो ज्ञेयत्वमाशङ्क्याह—**स एवेति**। क्रमाक्रमाभ्यामवस्थात्रयमनुभवन्नेवात्माकार्यकारणात्मकं त्रितयमतीत्य सकलविशेषाभावोपलक्षितस्तुरीयो निरुच्यते। स च सदानन्दैकतानः विज्ञानधातुः इत्यर्थः।

शोधित त्वंपदार्थमनूद्य तस्य तत्पदार्थत्वं वाक्यार्थं कथयति—**स परमात्मेति**। सम्प्रति व्यतिहारविवक्षया परिशोधितं तत्पदार्थमनूद्य तस्य प्रत्यागात्ममात्रत्वं प्रत्याययति—**सोऽहमिति**। इतिशब्देन प्रकरणं परिसमापयन्यथोक्तवाक्यार्थपरिज्ञानादज्ञानतदुत्थानर्थनिवृत्त्या परिपूर्णपरमानन्दाविर्भावेन कृतकृत्यता भवतीति।

पुरत्रयपरामर्शो वस्तुतो नानुभूयते।
यत्र तस्मै नमः कुर्वे पुरुषोत्तममूर्तये॥

॥ इति श्रीआनन्दगिर्याचार्यविरचितं विवरणं समाप्तम् ॥

श्रीशङ्करभगवत्पादाचार्यविरचितं

मनीषापञ्चकम्

श्रीसदाशिवेन्द्रसरस्वतीयोगिविरचिततात्पर्यदीपिकासहितं

श्रीबालगोपालेन्द्रमुनिविरचितं

मधुमञ्जरीटीकासहितञ्च

श्रीशङ्करभगवत्पादाचार्यविरचितं

मनीषापञ्चकम्

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञाऽपि यस्यास्ति चेत्
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ १ ॥

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया सेशं मया कल्पितम् ।
इत्थं यस्य दृढा मतिस्सुखतरे नित्ये परे निर्मले
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ २ ॥

शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना ।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥ ३ ॥

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः ।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनीपा मम ॥ ४ ॥

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित् स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ५ ॥

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितं

मनीषापञ्चकम्

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञाऽपि यस्यास्ति चेत्
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ १ ॥

श्रीसदाशिवेन्द्रयोगिविरचिता तात्पर्यदीपिका

स्वप्रकाशचिदानन्दसदेकरसरूपिणे ।
नित्यशुद्धनिराभासकूटस्थायाऽऽत्मने नमः ॥
आनन्दघनमद्वन्दं निर्विकारं निरञ्जनम् ।
भजेऽहं भगवत्पादं भजतामभयप्रदम् ॥
यत्कटाक्षवशादेव मुच्येऽहं भवबन्धनात् ।
तं वन्दे सच्चिदानन्दं श्रीगुरुं करुणानिधिम् ॥

इह खलु परमकारुणिको भगवान् शिवः अनर्थमकरागारे संसारसागरे निमग्नं लोकमुद्दिधीर्षुः कदाचित् काशीं प्रति गच्छन्तं आचार्यं प्रति चण्डालवेषं धृत्वा जगाम। ततो जगाद भगवानाचार्यः—हे चण्डालाधम ! इतो दूरं गच्छ गच्छेति। ततश्चण्डालवेषमण्डितः शिवः प्राह—

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात् ।
यतिवर ! दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥

हे यतिवर ! अत्र ब्रूहि किमन्नमयाच्छरीरादन्नमयं शरीरं गच्छ गच्छेति दूरीकर्तुं वाञ्छसि ? अथवा चैतन्यादेव चैतन्यं गच्छ गच्छेति दूरीकर्तुं वाञ्छसि। न तावदाद्यः। उभयोश्शरीरयोरन्नकार्यत्वेनैकरूपत्वात्। श्रूयते हि शरीरस्य अन्नकार्यत्वम्। 'स वा एष पुरुषोऽन्नरसमय" इति। एवं सर्वस्यापि जगतो मायाकार्यत्वेनैकत्वं द्रष्टव्यम्। न द्वितीयः। चैतन्यस्य सर्वत्रैकरूपत्वात्। "एको देवः सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मे'ति श्रुतेः। न ह्येकस्य सर्वगतस्य चैतन्यस्य देशाद्देशान्तरं प्रत्यपसरणं सम्भवति। एतत्सर्वमभिप्रेत्योक्तम्।

परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ।
विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥ इति ॥

तस्मात् सर्वस्य मायामयत्वेन चैतन्यत्वेन वा एकात्मकत्वात् परनिन्दादिकं न युक्तमिति भावः। चैतन्यैकत्वमेव स्पष्टीकुर्वन्नाह—

प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदग्रहः।
किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवीथीपयः पूरेवान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे॥

प्रत्यग्वस्तुनि प्रातिलोम्येन अनृतजडदुःखाहङ्कारादिभ्यो विलक्षणत्वेन प्रतिभासमानं यद्वस्तु सद्रूपं तस्मिन्। ब्रह्मणः वस्तुपदसूचितं सद्रूपत्वं निगद्य चिदानन्दरूपत्वं निराह। **निस्तरङ्गसहजानन्दावबोधाम्बुधाविति।** निस्तरङ्गः निर्विकल्पः। अत एव सहजः ध्रुवः यः परमानन्दावबोधः। स एवाम्बुधिरिवाम्बुधिः सर्वत्रैकरसत्वात्तस्मिन्। तदनेन सच्चिदानन्दत्वं ब्रह्मणः स्वरूपलक्षणमुक्तं भवति। ननु तर्हि लक्ष्यस्य ब्रह्मणः सत्ताद्यात्मकत्वं न स्यादिति चेन्नैतत् सारम्। यथा वीचीतरङ्गाद्युपाधिभेदभिन्नचन्द्रानुगतचन्द्रत्वेन लक्षिता चन्द्रव्यक्तिः चन्द्रत्वं न जहाति चन्द्रत्वस्य चन्द्रव्यक्त्यात्मत्वात्। तथा मायाकल्पितकुम्भादिव्यक्त्यनुगतसत्तया लक्ष्यमाणं ब्रह्मापि सत्त्वं न जहाति। एवमन्तःकरणवृत्त्युपाधिभेदभिन्नचिद्विशेषानुगतचित्त्वेन लक्ष्यमाणं चित्त्वं न जहाति। एवं प्रियप्रमोदाद्यन्तःकरणवृत्त्युपाधिभेदभिन्नानन्दानुगतानन्दत्त्वेनापि लक्ष्यमाणं आनन्दत्वं न जहाति। तत् कस्मात् सत्यत्वादीनां ब्रह्मव्यक्त्यात्मकत्त्वात्। तदुक्तमाचार्यैः—

सत्तादीनां हि जातीनां व्यक्तितादात्म्यदर्शनात्।
लक्ष्यव्यक्तिरपि ब्रह्म सत्तादि न जहाति नः॥ इति। (वे० कल्पतरुः १-१-२)

ननु सद्व्यक्तिनानात्वे कथं तदात्मकाद्वितीयब्रह्मसिद्धिरिति चेत् न। तस्य सद्भेदस्यौपाधिकत्वात्। एवं सत्यज्ञानानन्दभेदोऽप्यौपाधिक एव। अन्यथा सत्त्वरहितज्ञानानन्दयोः शून्यत्वप्रसङ्गात् बोधात्मकत्वरहितसतश्च भानाभावप्रसङ्गात्। दृश्यत्वे सत्त्वायोगाच्च सद्बोधात्मकसाक्षिणश्च परमप्रेमास्पदत्वेनानन्दस्वाभाव्यावगमात्। तस्मादौपाधिकव्यक्त्याकारभेदबाधेन सत्यज्ञानानन्दात्मकं ब्रह्मेति निश्चीयते। श्रुतिरपि सत्यज्ञानानन्दात्मकत्वं प्रतिपादयति। "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"ति। अतो निरस्तसमस्तोपाधिके कूटस्थनित्ये अखण्डसच्चिदानन्दैकरसे ब्रह्मणि अयं विप्रः अयं श्वपच इति। तल्लक्षणं स्मर्यते।

द्विजोत्तमायां चण्डालाद्यः पुमान् जायते भुवि।
श्वपचस्स तु विज्ञेयः सर्वशास्त्रविशारदैः॥ इति।

एवं उत्तमाधमभावेन **महानयं विभेदग्रहः कः** [न] कोऽपीत्यर्थः। 'एकमेवाद्वितीय'मिति स्वगतसजातीयविजातीयभेदराहित्यश्रवणात् "मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति" इत्यादिभेददर्शननिन्दाश्रवणाच्च। अतस्सर्वत्राखण्डैकरसे ब्रह्मणि न मनागपि भेदावकाशः। नह्युत्कृष्टनिकृष्टोपाधिभेदेन सर्वत्रैकरसस्य चैतन्यस्य वास्तवभेदः तद्धर्मत्वं वाऽस्ति। तत् कस्मात्? यथा **गङ्गाम्बुनि** भागीरथीपाथसि प्रतिबिम्बिते चण्डालवीथीपयःपूरे नीचवाटिकोदकप्रवाहे वा प्रतिबिम्बितेऽम्बरमणौ सूर्ये किमन्तरमस्ति। अन्तरं भेदो नास्तीत्यर्थः। कथं तर्ह्युभयत्र भेदप्रतीतिरिति चेत्। उपाधित इति ब्रूमः। तथा च श्रुतिः।

यथा ह्ययंज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको नु गच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा॥ इति।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ इति च ।

अतः परमात्मनः सूर्यकादिवदपारमार्थिक एव भेदः । ननु न सूर्यतुल्यत्वमिहोपपद्यते। सूर्यस्य हि रूपवतः परिच्छिन्नस्य रूपवति सलिले प्रतिबिम्बभावः सम्भवति । आत्मनस्तु नीरूपत्वादपरिच्छिन्नत्वाच्च कथमनात्मनि देहादौ प्रतिबिम्बभावस्सम्भोभविष्यतीति चेत् । नायं दोषः । युक्त एव त्वयं दृष्टान्तः विवक्षितांशसम्भवात् । नहि दृष्टान्तदार्ष्टान्तिकयोः सर्वांशेन साम्यं पदमजेनापि प्रतिपादयितुं पार्यते । सर्वसाम्ये हि दृष्टान्तदार्ष्टान्तिकाभेदप्रङ्गात् । अस्मिन्नंशे हि साम्यं एकस्सूर्यः उपाधिवशान्नानेव उपाधिगतधर्मवानिव लक्ष्यते । एवं परमात्मा परमार्थत एकोऽपि निर्विकारोऽपि देहाद्युपाध्यन्तस्तावन्नानेव उपाधिर्मान् वृद्धिह्रासादीन् भजत इव उपलक्ष्यत इत्येवं दृष्टान्तदार्ष्टान्तिकभावे किं वा बाधकमस्ति॥ अत एव भगवान् बादरायणः एतदसूत्रयत् "अत एव चोपमा सूर्यकादिवदि"ति। दृष्टान्तान्तरमाह—काञ्चनघटीमृत्कुम्भयोर्वाम्बर इति । यथा परमार्थतः परिपूर्ण एकोऽप्यकाशः रुक्मघटमृद्घटयोरवच्छिन्नतया नानेव परिच्छिन्न इवोपलक्ष्यते । न हि तस्मिन् वास्तवभेदः परिच्छिन्नभावो वास्ति । एवं परमात्मा परमार्थतोऽपरिच्छिन्न एकोऽपि देहाद्यवच्छिन्नत्वेन नानेव परिच्छन्न इवानुभूयमानोऽपि सर्वदा परिपूर्ण एवावशिष्यते । तथा च श्रूयते—

घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥

"आकाशवत् सर्वगतश्च नित्य" इति । तदुक्तम्—

चण्डालदेहे पश्वादिशरीरे ब्रह्मविग्रहे ।
अन्येषु तारतम्येन स्थितेषु पुरुषोत्तमः ॥
व्योमवत् सर्वदा व्याप्तः सर्वसम्बन्धवर्जितः ।
एकरूपो महादेवस्स्थितः सोऽहं परामृतः ॥ इति ।

अतः सर्वत्राखण्डैकरसे स्वप्रकाशचिद्घनसदानन्दसान्द्रे परिपूर्ण एकस्मिन् ब्रह्मणि भेदानवकाशात् परनिन्दा कथं सञ्जाघटीतीति भावः ।

योऽवस्थात्रयभिन्नसद्भासकस्सच्चिदेकरसमेकम् ।
बोधयति शिष्यवृन्दं परशिवेन्द्रं प्रणौमि यतिचन्द्रम् ॥

इत्थमीश्वरवाक्यं निशम्य सर्वज्ञो भगवानाचार्यः सकलसाधनकलापैस्सह श्रुताध्यात्मशास्त्रान् विगलितनिरन्तरनिरतिशयनिजानन्दानुसन्धानतया अनुपशान्तस्वान्तान् अत एवाविगलिताभिमानवतः कांश्चित् पुरुषविशेषान् उपलक्ष्य तेषां विनैव समाधिना ब्राह्मणत्वाद्यभिमानापनुत्तये स्वपदे विश्रान्तये च पञ्चभिः श्लोकैः स्वानुभूतिमाविष्करोति । तत्रापि जाग्रदाद्यवस्थात्रयावभासकत्वेन प्रतीचः परब्रह्माभेदं दर्शयति ।

जाग्रत्स्वप्नसुषुप्तिष्विति—यदा आदित्याद्यनुगृहीतैश्चक्षुरादीन्द्रियैः शब्दादिस्थूलविषयाणामुपलब्धिस्तदा जाग्रदवस्था । यदा तु चक्षुरादीन्द्रियाणां उपरतत्वेन चित्तस्यापि बाह्यव्यापारोपरमः केवलं वासनामयपदार्थाकारपरिणामेनावस्थानं तदा स्वप्नावस्था । यदा तु कारणभूते भावरूपाज्ञाने इन्द्रियान्तरवच्चित्तमपि प्रविलीयते तदा सुषुप्त्यवस्था । आसु तिसृष्वप्यवस्थासु तदवभासकत्वेन

अनुवर्तमाना स्फुटतरा आविर्भावतिरोभावधर्मरहिता या संवित् चैतन्यैकरसः परमात्मा उज्जृम्भते स्वयमेव प्रकाशते। अत्र **प्राभाकराः** नायमात्मा स्वयमेव प्रकाशते। अपि तु स्वप्रकाशसंविदाश्रयत्वेन प्रकाशत इत्याचक्षते। नैतत् सारम्। श्रुतिविरोधात्। श्रूयते ह्यात्मनः स्वयंज्योतिष्ट्वम्। अत्रायं पुरुषस्स्वयंज्योतिरिति। यदुक्तम्—स्वप्रकाशसंविदाश्रयत्वेनात्मा प्रथत इति तत्र वक्तव्यम्। येयमर्थप्रकाशरूपा संवित् यस्यामर्थश्चात्मा च प्रथेते सा किं जडा आहोस्विन् अजडा। जडैव चेदर्थात्मनोरपि जडतया अविशेषादशेषस्य जगतः प्राप्तमान्ध्यम्। नन्वभ्युपेयते संविदपराधीनप्रकाशेति आत्मा तु जड एव स्यादिति चेत्। नैतत् सङ्गतम्। अथात्मसम्बन्धिन्यां संविद्यजडायामपि अर्थात्मनोः प्रकाशमानता न सिद्ध्येत् पण्डितेऽपि पुत्रे पितुरपाण्डित्यवत्। नन्वर्थात्मनोः प्रकाशेन सह संवित्प्रकाशते इति चेत् तत्र वक्तव्यम्। यः संविदः प्रकाशः यश्चार्थात्मनोस्तौ किं संविदस्सकाशात् भिन्नौ अहोस्विदभिन्नौ। नतावदाद्यः, संविदः प्रकाशव्यतिरेके संविदप्रकाशरूपा सती घटवदस्वप्रकाशा स्यात्। अर्थात्मप्रकाशयोस्संविद्व्यतिरेके संविदर्थप्रकाशा न भवेत्। किं तु ज्ञापिका स्यात्। ननु संविदः अर्थात्मनोश्च प्रकाशौ संविदः सकाशादभिन्नाविति चेत्। न। संविदतिरिक्तप्रकाशानङ्गीकारे संविदर्थात्मनां साहित्यमुक्तं स्यात्। न हि जात्वर्थसंविदोः सहभावस्सम्भवति। अतीतानागतार्थगोचरायाः संविदोऽर्थसहभावाभावात्। अत्र **कश्चित्** प्रलपति प्रकाशस्य स्वरूपा विषया इति **तदसङ्गतम्**। विषयप्रकाशयोरत्यन्तवैलक्षण्यात्। विषया भिन्नदीर्घस्थूलतयाऽनुभूयन्ते। प्रकाशस्त्वान्तरास्थूलानण्वह्रस्वदीर्घतयाऽनुभूयन्ते। अतः प्रकाशादन्योऽर्थोऽनिर्वचनीय इति व्यक्तमुत्पश्यामः। न चास्य प्रकाशस्याजानतः स्वलक्षणभेदोऽनुभूयते। न चानिर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति। तस्मादयं प्रकाश एव स्वप्रकाश एकः कूटस्थो नित्यो निरंशः प्रत्यगात्मेत्यनवद्यम्। अतः योऽयमवस्थात्रयावभासकत्वेन अनुवर्तमानः आविर्भावतिरोभावधर्मरहितः स्वप्रकाशचिदेकरसः परमात्मा स एवाहमस्मीत्युत्तरेणान्वयः।

एवं अवस्थात्रयावभासकत्वेन प्रतीचः परब्रह्मतां प्रदर्श्य व्यष्टिसमष्ट्यात्मकसकलशरीराधिष्ठानत्वेन तदवभासकतया प्रत्यगात्मनः परब्रह्मत्वं दर्शयति। या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता आत्मभावेन अवभासकतयाऽवस्थिता या संवित् यो विज्ञानैकरसः परमात्मा। न केवलमयमात्मा देहादिचेतनप्रपञ्चस्यावभासकः अपि तु जगतः प्रपञ्चस्यापीत्याह—**जगत्साक्षिणीति**। साक्षादीक्षत इति साक्षी सर्वस्य जगतः द्रष्टा परमात्मा।

नन्वेतादृश आत्मा अस्ति चेत् किमिति नोपलभ्यत इति चेत्। न, जगदवभासकत्वेनोपलभ्यमानत्वात्। यद्यसौ चिन्मात्ररूपः साक्षी न स्यात्, केन तर्हि प्रकाशेन साक्ष्यं जगत् भायात्। ननु साक्षिस्वरूपवत्साक्ष्यस्यापि स्वत एव भानं किं न स्यात् इति चेत्। न। साक्षिस्फुरणाभावे तस्य जडत्वेन स्वाभाविकस्फुरणासम्भवात्। यद्युच्येत साक्षिणोऽभावेऽपि जडं जगदजडेन ज्ञानाधारेणात्मना तदा ज्ञायत एवेति। हन्त तर्ह्यनात्मा जडः आत्मा चाजड इत्येतत् भानं तव कथं बोभविष्यति। तथा च यो भानविषयः स तावज्जडः। यस्तु दृगाश्रयः सोऽजड इति जडत्वाजडत्वे उभे अपि भानाधीननिरूपणे इत्यवश्यमकामेनापि साक्षिस्वरूपं भानमङ्गीकर्तव्यम्। अत्र **भाट्टाः**—अस्तु भानं तच्च चक्षुरादिवन्निलीनेन विज्ञानेन स्वविषये जन्यत इति जगुः। तन्न सङ्गतमेव स्यात्। यदि हि विषयस्फुणररूपं भानं जन्यं स्यात्तर्हि मृज्जन्यघटादिवज्जन्यत्वेन जडमेव स्यात्। अतो विषयवत् भानस्यापि जडत्वाविशेषात् स्वतः स्फूर्तिर्न स्यात्।

यत्तावदुक्तम् भानस्य विज्ञानं जनकमिति तत्र वक्तव्यम् । किं विज्ञानं भानरूपेण परिणमते उत भानस्यारम्भकम् । न तावदाद्यःज्ञानस्याविक्रियत्वात् । विकारिण एव हि क्षीरादेर्दध्याद्याकारेण परिणामो दृष्टः । न ह्यविक्रियस्य ज्ञानस्य परिणामः सम्भवति । यदि ज्ञानस्यापि विक्रिया स्यात् तर्हि क्षीरादिवच्चेत्यमेव भवेत् । अतः दृश्यत्वे ज्ञानत्वमेव हीयेत । नापि द्वितीयः विज्ञानस्याद्रव्यत्त्वात् । द्रव्यं हि द्रव्यान्तरारम्भकं तन्तुपटादौ तथा दृष्टत्त्वात्, न हि ज्ञानं द्रव्यं, गुणत्वेन परैरङ्गीकारात् । अतो भानस्याद्रव्येण सता ज्ञानेन आरम्भो न युक्तः । अपिचारम्भवादे ह्यसदेव कार्यमुत्पद्यत इति स्थितिः । तथा चासतस्स्वरूपभानस्य ज्ञानमारम्भकमिति न युक्तम् । यदि हि ज्ञानमसदपि भानमारभेत । हन्त तर्ह्यसत्त्वाविशेषाद्वन्ध्यापुत्रादेरारम्भकं स्यात् । तस्मात् परिणामारम्भकत्वव्यतिरेकेणोत्पादकत्वानिरूपणात् विज्ञानेन भानं नोत्पद्यते । एवं विज्ञानमपि न जन्यते । यदि हि विज्ञानं जन्यं स्यात्तर्हि जन्यत्वेन हेतुना जडमेव स्यात् । ननु रूपादिविषयैश्चक्षुरादिसम्प्रयोगानन्तरं रूपादिविषयं ज्ञानं दृश्यते । तर्हि तस्य का गतिरिति चेत् । नैष दोषः । ज्ञानस्य जन्यत्वप्रतीतेर्भ्रान्तिरूपत्त्वात् । कस्मात् ? विषयाकारपरिणतान्तःकरणवृत्तिर्हि तत्र जन्यते । अतस्तदीयजन्यत्वं तदवच्छिन्ने चैतन्येऽपि स्फटिकादौ लौहित्यमिवावभासते । अतो भ्रान्तिरेव ज्ञाने जन्यत्वप्रतीतिः । एवं घटादिविषयस्फुरणरूपस्य भानस्यापि जन्यत्वप्रतीतिर्भ्रान्तिरेव । तस्याप्युत्पत्तिमद्वृत्तिज्ञानान्वयव्यतिरेकानुविधायित्वेन तस्यैव जन्यत्वस्य तत्रावभासनात् । तस्मादजन्यत्वात् विज्ञानं सत्यमेव तदभेदात् भानमपि सत्यमेव । तथा चायं प्रयोगः—विमतं सत्यं भावत्वे सत्यजन्यत्त्वादात्मवत् । अत एव न प्रागभावेऽनैकान्तिकता । तस्य भावत्त्वाभावात् । तस्मात्तदिदं भानमेव चिन्मात्ररूपः साक्षीत्यनवद्यम् । अतः सर्वेषु शरीरेष्वात्मत्वेनावस्थितः सर्वस्य जडप्रपञ्चस्य अवभासकः चिन्मात्ररूपः साक्षी यः परमात्मा स एवाहमस्मि न च दृश्यवस्तु देहादिकं नास्ति । तस्य स्वरूपयाथात्म्यज्ञानेन बाध्यमानत्त्वात् । एवं यस्य दृढप्रज्ञाऽस्ति । किमिदं प्रज्ञानस्य दार्ढ्यं ? यथा बहुजन्मसु दृढं भावितत्त्वेन अस्मिन् जन्मनि विनैव परोपदेशं कामादय उत्पद्यन्ते । तथा दीर्घकालनैरन्तर्यसत्कारैर्भाविते तत्त्वे पश्चाद्वाक्ययुक्तिपरामर्शमन्तरेणैव पुरोवर्तिघटादिवत् सहसा तत्त्वं परिस्फुरति चेत् तदिदं प्रज्ञानस्य दार्ढ्यं नाम । एतादृश तत्त्वज्ञानं यस्यास्ति स तु ब्रह्मैवेति कृत्वा चण्डालो वास्तु । तल्लक्षणम् स्मर्यते । "शूद्राद्विप्राङ्गनायां तु चण्डालो नाम जायते" इति । द्विजो वास्तु गुरुरिति मम मनीषा । ननु चाण्डालस्य कथं गुरुत्वमिति चेत् । न, नित्यशुद्धासङ्गात्मविज्ञानेन जातिकुलाद्यभिमाननिवृत्तेः सोऽन्त्यजोऽपि शुद्ध एव । तथा च स्मर्यते ।

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्त्येष्वपि च जातानां वृत्तमेव विशिष्यते ॥ इति ।

अतः ब्रह्मात्मैक्ये न किञ्चित् बाधकमिति भावः । ननु—

"यतो वा इमानि भूतानि जायन्ते" इत्यादिना ब्रह्मणो जगत्कारणत्वश्रवणात् प्रत्यगात्मनस्तदन्तर्भावात् कथमुभयोरैक्यमिति चेत् । नायं दोषः । त्रिगुणात्मिकाऽविद्यासध्रीचीनेन प्रत्यगात्मना द्रष्ट्रा स्वप्नप्रपञ्चवत् सर्वस्य सेश्वरस्य दृश्यजातस्यापि कल्पितत्त्वात् । तदुक्तम्—

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।
एवं जाग्रत्प्रपञ्चोऽपि मयि मायाविजृम्भितः ॥ इति ।

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया सेशं मया कल्पितम् ।
इत्थं यस्य दृढा मतिस्सुखतरे नित्ये परे निर्मले
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ २ ॥

एवं प्रत्यगात्मनो जगत्कारणत्त्वसम्भवात् परब्रह्मत्त्वं सङ्घटते । अपि च "तत् सृष्ट्वा तदेवानुप्राविशत् । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"त्यादिश्रुतेः परब्रह्मैव हि साक्षात् प्रत्यगात्मा । अत एव हि तत्त्वमस्यादिका श्रुतिः जीवभावापन्नस्य यत् स्वाभाविकमद्वितीयं परब्रह्मात्मत्वं तत् प्रतिपादयन्ती जगत्कारणत्वोपाधिकं यत् सर्वज्ञत्वादिलक्षणम् यच्चाज्ञानतत्कार्योपाधिकं सर्वप्रत्यग्रूपं चैतन्यं तदुभयं एकमेवेति सोऽयं देवदत्त इतिवत् विरुद्धांशपरिहारेणैक्यं बोधयति ।

अत्र केचिदाहु—आत्मनो जीवत्त्वं न भ्रान्तिसिद्धम् । अपि तु स्वाभाविकमेवेति ।
तद्वार्तामात्रमेव स्यात् । तत् कस्मात् यद्यात्मनो जीवत्त्वं स्वाभाविकं स्यात् तर्हि तस्य मुक्त्यवस्थाया-
मपि निवृत्तिर्न स्यात् । स्वभावस्यानपायात् । अतो मुक्तानामपि सुखदुःखानुवृत्तिः स्यात् । ननु यथा
आम्लसम्पर्कात् ताम्रस्य स्वभावभूतं मलं निवर्तते एवं केनचित् परमेश्वरसमाराधनादिना साधनेन
जीवस्य सुखदुःखादिसंसारानुभवात्मकजीवत्त्वनिवृत्तौ सत्यां परब्रह्मसायुज्यरूपा मुक्तिः किं न स्यात्
इति चेत् । नैतत् सारम् । तत् कथं, यथा अग्नेः स्वभावभूतस्य दहनप्रकाशनादेर्विनाशो नास्ति, एवं
स्वाभाविकस्य जीवत्वस्यापि विनाशो दुर्घट एव स्यात् । ननु मणिमन्त्रादिसामर्थ्यादग्नेरुष्णप्रकाशयो-
र्निवृत्तिमुपलभामहे तद्वत् साधनवैचित्र्यात् स्वाभाविकजीवत्त्वस्यापि निवृत्तिः किं न स्यात् इति चेत्
तदज्ञानविजृम्भितमेव स्यात् । तत् कस्य हेतोः अग्नेः स्वभावभूतमौष्ण्यादिकं मणिमन्त्रादिसामर्थ्यात्
प्रतिबद्धमेव केवलं न तु नष्टम् । एवमेव सुखदुःखादिलक्षणस्य स्वाभाविकस्य जीवत्त्वस्य केनचित्
साधनेन प्रतिबन्ध एव केवलं स्यात् । न तु नाशः । तस्मादयं जीवः यदि परमार्थतो ब्रह्मणोऽन्यः
स्यात् तर्हि साधनशतेनापि तस्य ब्रह्मभावो न घटत एव । ननु न वयं जीवस्य ब्रह्मतादात्म्यलक्षणां
मुक्तिं ब्रूमः । अपि तु तत् साम्यमिति केचिदिच्छन्ति । तद्वार्तामात्रमेव । कस्मात् विकल्पासहत्वात् ।
तथा हि—जीवस्य किमेकदेशेन ब्रह्मसाम्यं विवक्षितम् उताहो सर्वात्मना ? एकदेशेन चेत् संसारिणा-
मपि जीवानां चेतनत्वादिना एकदेशेन परब्रह्मसाम्यसम्भवादयत्नेन तेऽपि मुक्ताः स्युः । यदि सर्वेणैवा-
कारेण ब्रह्मसाम्यं विवक्षितं स्यात्तर्हि तत्साम्यं न युज्यते । केनचिदाकारेण व्यावृत्तयोरेव हि समान-
धर्मयोगादुपमानोपमेयभावः । इह तु सर्वात्मना समानयोर्जीवब्रह्मणोर्भेदजनकव्यावृत्ताकारविरहात् ।
अत एव भेदाभावाच्च जीवः परब्रह्मैव स्यात् । न तु ब्रह्मसम इत्येतदनवद्यम् ॥ १ ॥

तस्मात् सच्चिदानन्दैकरसः साक्षात् परमात्मैव सत्त्वपरिणामरूपनानाविधतत्तदन्तः करणोपहितः सन् अनपक्रान्तात्मभावेन नानाविधजीवभावं भजते । स च जीवभावापन्नः स्वात्मनः परब्रह्मात्मत्त्वज्ञानेन स्वस्वरूपस्याच्छादकं भावरूपाज्ञानं तत्कार्यं संसारं चात्ममात्रतया विलापयन् स्वयमेव स्वप्रकाशचिदानन्दस्वरूपेणावशिष्यते । एवं प्रत्यग्ब्रह्मणोरैक्ये किं बाधकमित्यभिप्रेत्याह—**चिन्मात्रविस्तारितमिति** हेतुगर्भविशेषणं चिन्मात्रविस्तारितत्त्वात् चिन्मात्रे ब्रह्मण्यध्यस्तत्वादिदं सर्वं जगच्चिन्मात्रं ब्रह्मैवेत्यर्थः । त्रिगुणया अविद्यया साधनेन मया प्रत्यगात्मना द्रष्ट्रा एतत् सर्वं

शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥ ३ ॥

दृश्यजातं सेश्वरं जगत् कल्पितम्। यतः अतः जगदधिष्ठानभूतं चिन्मात्रं ब्रह्मैवाहमस्मि। इत्थमनेन प्रकारेण सुखतरे निरतिशयानन्दैकरसे नित्ये ध्रुवे। अत एव परे सर्वोत्कृष्टे। अत एव च निर्मले अज्ञान-तत्कार्यमलरहिते स्वप्रकाशचिदेकरसे ब्रह्मणि यस्य मुमुक्षोर्मतिर्दृढा भवति निरतिशयानन्दनित्यशुद्ध-स्वप्रकाशचिदेकरसब्रह्मविषयकसाक्षात्कारो दृढो भवति। स तु नित्यशुद्धब्रह्मैवेति कृत्वा चण्डालो वा भवतु द्विजो वा भवतु गुरुरिति मम मनीषेत्यन्वयः। अतः प्रत्यग्ब्रह्मणोरैक्यं सुघटत इति भावः।

नन्वेवमप्यविसम्वादिव्यवहारदर्शनात् आरोपितरजतादिवैलक्षण्यात् पारमार्थिकमेवेदं जगत्। अतः कथमद्वैतसिद्धिरिति चेत्। न। दृग्रूपे अद्वैते ब्रह्मण्यध्यस्तत्त्वेन शुक्तिरूप्यवदसत्यत्त्वात्। ननु कथं चैतत् प्रपञ्चस्याध्यस्तत्त्वमिति चेत्। अविसम्वादिव्यवहारदर्शनेऽपि दृश्यत्त्वात् शुक्तिरूप्यवत् इति ब्रूमः।

न च दृश्यत्वहेतोः पक्षधर्मताऽसिद्धिरिति वाच्यम्। द्वैतप्रपञ्चस्य स्वतो जडत्त्वेन दृग्रूपेण स्वप्रकाशब्रह्मस्वरूपचैतन्येनावभास्यमानत्त्वात् दृश्यत्त्वहेतुः कृत्स्नपक्षं व्याप्य वर्तत इति। एतत् सार्वपरिषम्। तस्मात् आरोपितद्वैतप्रपञ्चोऽसत्य एव। नन्वेवमद्वितीयस्यात्मनोऽप्यसत्त्वं किं न स्यादिति चेन्न अद्वितीयात्मनो दृग्रूपतया दृश्यत्वाभावेन अध्यस्तत्त्वासम्भवात्। यद्यद्वैतमपि द्वैतवदध्यस्तं स्यात् तर्हि तस्य केन चिदधिष्ठानेन भवितव्यम्। निरधिष्ठानभ्रमानुपपत्तेः। किं तदधिष्ठानं अद्वैतमेव उत द्वैतमपि, न तावदग्रिमः आरोप्यादद्वैतात् अन्यस्याद्वैतान्तरस्याभावात्। नापि चरमः। अद्वैतस्य केवलं कल्पिते द्वैते अध्यासासम्भवात्। लोके हि परमार्थभूते शुक्तिकाशकलादौ रजताध्यासस्य दृष्टत्त्वात्तदनुसारेणाद्वैताध्यासस्यापि अधिष्ठानत्त्वेन तत्त्वभूतमेव किञ्चित् वक्तव्यम् न परिकल्पितम्। ननु भवतु लोके सत्याधिष्ठानत्वं अद्वैताऽध्यासे अन्यस्यासम्भवात् कल्पितस्यैवाधिष्ठानत्वमिति नियमः किं न स्यादिति चेत्। न। द्वैतस्याध्यस्तैकशरीरत्त्वात्। अध्यस्तस्य चाधिष्ठानात् ब्रह्मस्वरूपादनति-रेकादेकस्यैवाधिष्ठानत्त्वमारोप्यत्वञ्चेति व्याहतमेव प्रसज्येत। किञ्च यदि द्वैताद्वैते उभे अप्यारोपिते स्याताम् तर्हि तद्व्यतिरिक्तस्य वस्त्वन्तरस्याभावात् निरधिष्ठानभ्रमः प्रसज्येत। ननु शून्यमेवो-भयोरधिष्ठानमस्त्विति चेत्। न। निस्स्वरूपस्य शून्यस्य केनचिदाकारेण निर्वक्तुमशक्यत्त्वेनाधिष्ठानत्व-बाधावधित्वलक्षणधर्मयोगासम्भवात्। प्रपञ्चितमेतत् रत्नदीधितौ ॥ २॥

तस्मादद्वैतस्याध्यासासम्भवात् द्वैतस्य चाद्वैते स्वप्रकाशचिदेकरसे ब्रह्मण्यध्यस्तत्त्वेनासत्यत्त्वात् सत्यज्ञानानन्दैकरसं एकं अद्वितीयं ब्रह्मैवावशिष्यते। अतो न काचनानुपपत्तिरित्यभिप्रेत्याह—**शश्वदिति। गुरोर्वाचा** इदं विश्वं शश्वदनुक्षणं नश्वरमेवेति निश्चित्य नित्यं कालत्रयाबाध्यं निरस्तसमस्तप्रपञ्चं स्वप्रकाशचिदेकरसं सदानन्दघनमद्वितीयं ब्रह्म यत्तदेवाहमस्मीति निरन्तरं एतत् दीर्घकालादेरप्युप-लक्षणं विमृशता विमर्शोऽत्र भावना। अत एव भगवान् **पतञ्जलि**रेतदसूत्रयत्—आदरनैरन्तर्यदीर्घ-कालसत्कारासेवितो दृढभूमिरिति। तथा चायमर्थः सम्पन्नः—विधिवत् सर्वकर्माणि संन्यस्य नैरन्तर्य-

दीर्घकालसत्कारैः दृढमसङ्गचिद्रूपमखण्डैकरसं ब्रह्माहमिति भावयेदिति। ब्रह्मभावनाप्रकारस्तु भगवत्पादैरेव दर्शितः।

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओमिति॥

ननु कथं सर्वकर्मसंन्यासित्वं घटते। ज्ञानकर्मणोरङ्गाङ्गिभावेन समुच्चयसम्भवात् इति चेत्। नैतत् सारं, उभयोः परस्परविरोधात्। तथा हि—सर्वानर्थप्रपञ्चस्य मूलभूतं प्रत्यगात्मनः पारमार्थिकपरब्रह्मस्वरूपत्वाच्छादकं अज्ञानम्। तस्मिन् सविलासे सत्येव कर्म तत्प्रसादेन स्वात्मानं लभते। औपनिषदमद्वितीयात्मज्ञानं तु अज्ञानम् तत् कार्यं च प्रत्यगात्मन्युपाधिवशात् भासमानकर्मापेक्षितकर्तृभोक्तृत्वादिसकलानर्थं विलापयदेवाविर्भवति। तथा च ज्ञानकर्मणोस्सहावस्थानविरोधादङ्गाङ्गिभावेन समुच्चयो न घटत एव। अपि च स्वर्गपशुपुत्रादिकं स्वल्पमेव फलं कर्म प्रयच्छति। ज्ञानं तु परमानन्दावाप्तिलक्षणं परिपूर्णं फलं प्रयच्छति। अतोऽधिकफलं ज्ञानं न्यूनफलस्य कर्मणोऽङ्गं इत्येतन्न युक्तम्। अफलस्य हि प्रयाजादेः कैमर्थ्यवशात् फलवत्सन्निधावफलं तदङ्गमिति न्यायेन फलवदाग्नेयादियागशेषत्वं दृश्यते। ज्ञानस्य तु पृथक् फलसद्भावस्य श्रुतत्वेन फलाकाङ्क्षाया अभावान्नास्य शेषत्वम्। ननु यथा प्रयाजविधिवाक्यशेषेण वर्म वा एतद्यज्ञाय क्रियते इत्यादिना श्रुतस्य फलस्य अङ्गेषु फलश्रुतिः अर्थवाद इति न्यायेनार्थवादत्वम्। तथा ज्ञानफलस्यापि अर्थवादत्वात् प्रयाजादिवदङ्गत्वं किं न स्यात् इति चेत्। न। प्रयाजादेर्हि दर्शपूर्णमासप्रकरणपठितत्वेनाङ्गभावस्य निर्णीतत्वाद्युक्तं तदीयफलश्रवणस्यार्थवादत्वं न तथा ज्ञानं कस्यचित् कर्मणः प्रकरणे स्थितं येन फलश्रुतेरर्थवादता कल्प्येत। अतः प्रकरणभेदादपि ज्ञानस्य न कर्माङ्गत्वम्। अपि च स्वर्गपुत्रादिफलरागयुक्तः कर्मण्यधिकारी। ज्ञाने तु वैराग्ययुक्त इत्यधिकारिविशेषमुपादाय प्रवृत्तत्वात् ज्ञानस्य न कर्माङ्गत्वं। स्वरूपभेदाच्च। अज्ञानकार्यत्वात् कर्म अप्रकाशात्मकं स्वप्रकाशात्मकब्रह्मात्मकत्वात् ज्ञानं प्रकाशात्मकम्। तथा च तमःप्रकाशयोरिवानयोस्सहावस्थानानुपपत्त्या कथमङ्गाङ्गिभावेन समुच्चयस्सम्भवति। तस्मात् सर्वकर्मसन्यासः सम्यगुपपद्यते। अत एव श्रुतिस्मृतयो विविदिषाविद्वत्प्रभेदेन परमहंससंन्यासं प्रतिपादयन्ति। एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति। एवं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति।

ब्रह्मविज्ञानलाभाय परहंससमाह्वयः।
शान्तिदान्त्यादिभिः सर्वैः साधनैः सहितो भवेत्॥
संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया।
प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥
प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम्।
तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्॥
यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम्।
तदैकदण्डं सङ्गृह्य सोपवीतां शिखां त्यजेत्॥
ज्ञात्वा सम्यक् परं ब्रह्म सर्वं त्यक्त्वा परिव्रजेत्॥

इत्येवमाद्याः—अतः सुष्ठूक्तम्—**निरन्तरं विमृशतेति**। निरन्तरं निरतिशयानन्दब्रह्मभावनायामुपायमुपदर्शयन्नाह—**निर्व्याजशान्तात्मनेति**। निर्गतः व्याजः दम्भः दर्पादेरप्युपलक्षणम्। शान्तः नष्टः आत्मा मनः। तथा च दम्भदर्पाद्यशुभवासनाक्षयः मनोनाशश्च यस्य विदुषस्तेनेत्यर्थः।

ननु के ते वासनामनसो ? कथं नाम तयोर्नाश इति चेत् तच्छृणु—पूर्वापरपरामर्शमन्तरेण सहसोत्पद्यमानस्य दम्भदर्पादिवृत्तिविशेषस्य हेतुश्चित्तगतसंस्कारो वासना पूर्वाभ्यासेन चित्तस्य वास्यमानत्वात्। तदुक्तम्—

दृढभावनया त्यक्तपूर्वापरविचारणम्।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता॥ इति।

तस्या वासनाया क्षयो नाम विवेकजन्यायाममानित्वादिदैववासनायां दृढायां सत्यां बाह्यनिमित्तेन दम्भाद्यनुत्पत्तिः। प्रदीपज्वालासन्तानवत् वृत्तिसन्तानरूपेण परिणममानमन्तःकरणद्रव्यं मननात्मकत्वान्मन इत्युच्यते। तस्य च मनसो नाशो नाम वृत्तिरूपपरिणामं परित्यज्य निरुद्धाकारेण परिणामः। तथा च योगशास्त्रे पतञ्जलिः सूत्रयामास—व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधलक्षणचित्तान्वयो निरोधपरिणाम इति। व्युत्थानसंस्कारा अभिभूयन्ते। निरोधसंस्काराः आविर्भवन्ति। निरोधक्षणास्तु चित्तेनान्वीयन्ते। सोऽयं मनोनाश इत्यवगन्तव्यम्। तत्र मनोनाशाभावे वृत्तिषूत्पद्यमानासु कदाचित् बाह्यनिमित्तेन दम्भाद्युत्पत्तेर्नास्ति वासनाक्षयः। अक्षीणायां च वासनायां तथैव वृत्त्युत्पादनान्नास्ति मनोनाशः। तथा चोक्तम्—

यावद्विलीनं न मनो न तावत् वासनाक्षयः।
न क्षीणा वासना यावत् चित्तं तावन्न शाम्यति॥ इति।

तथा च मनसो दम्भादिवृत्त्यनुदयान्मनो नश्यति। अनेन वासनाक्षयमनोनाशयोरपि परस्परसाधनत्वमुक्तं भवतीति द्रष्टव्यम्। नन्वस्त्वेतत्, वासनाक्षयमनोनाशयोः ज्ञानसाधकत्वं क्व प्रसिद्धमिति चेत् श्रुतिस्मृतिष्विति ब्रूमः।

तथाहि—आसुरवासनाक्षयकारिण्याः दैववासनायास्तत्त्वज्ञानसाधनत्वं श्रुतिस्मृत्योरुपलभ्यते। "शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वात्मन्येवात्मानं पश्यती"ति श्रुतिः। स्मृतिरपि च।

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥ इति।

अन्यस्मिन् अहंबुद्धिरभिष्वङ्गः ।
ज्ञायतेऽनेन इति व्युत्पत्त्या ज्ञानं ज्ञानसाधनमित्यर्थः ॥

मनोनाशस्यापि ज्ञानसाधनत्वं श्रुतिस्मृतिप्रसिद्धम् । "ततस्तु तं पश्यते निष्कल ध्यायमानः" इति श्रुतिः । "अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ" जहाति ॥ इति च ।

प्रत्यगात्मसमाधिप्राप्त्या देवं ज्ञात्वेत्यर्थः ॥
यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै विद्यात्मने नमः ॥ इति स्मृतिः ।

इत्थं तत्त्वज्ञानस्य साधनं प्रदर्श्य फलं प्रदर्शयन्नाह—**भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावक** इति । भूतमप्रवृत्तफलं जन्मान्तरसञ्चितम् । अस्मिन्नपि जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चितम् । भावि च ब्रह्मसाक्षात्कारादूर्ध्वं देहेन्द्रियव्यापारवशात् सम्भावितञ्च दुष्कृतं संविन्मये स्वप्रकाशचिदेकरसे सर्वाधिष्ठानभूते पावके ब्रह्माग्नौ प्रदहता स्वव्यतिरेकेणाभावादिति प्रविलापयतेत्यर्थः । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति पापाविनाशस्य सर्वशास्त्रसिद्धत्वात् ब्रह्मज्ञानिनोऽप्यस्ति पापलेप इति चेत् । न । अत्र तावत् ब्रह्मात्मतत्त्वविदः पापलेपशङ्काऽपि नोदेति । नाकार्षं न करोमि न करिष्यामीति कालत्रयेऽप्यकर्तृब्रह्मस्वरूपत्वेन निश्चितत्त्वात् । न ह्यकर्तुः पापलेपं मन्दा अपि शङ्कन्ते । कुतः ? अश्लेषविनाशयोः श्रुतत्त्वात् । श्रूयते हि ब्रह्मसाक्षात्कारादूर्ध्वं देहेन्द्रियव्यवहारवशात् सम्भावितस्य पापस्याश्लेषः । "तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" इति । साक्षात्कारात् पूर्वं इह जन्मनि जन्मान्तरेषु च सञ्चितस्य पापसङ्घस्य विनाशः श्रूयते—"तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त" इति । अत एव भगवान् बादरायणः "**तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्**"इत्यधिकरणेनैतत् प्रतिपादयामास । नाभुक्तमित्यादिशास्त्रं तु ब्रह्मज्ञानरहितविषयम् । तस्मान्नास्ति ज्ञानिनः पापलेपः । ननु माभूत् पापलेपः । पुण्यलेपस्तु विद्यते । पुण्यस्य श्रौतत्वेन श्रौतब्रह्मज्ञानेन सहाविरोधादिति-चेत्, न । अकर्त्रात्मवस्तुबोधसामर्थ्यात् पापवत् पुण्येनापि न लिप्यते । पापवत् पुण्यमपि जन्महेतुत्वात् पापसममेवेति पापत्वेनैव श्रुतिः परामृशति—"सर्वे पाप्मानोऽतोनिवर्तन्ते" इति । किञ्च "उभे उ हैवैष एते तरती"ति श्रुतिः पुण्यपापयोरुभयोर्ज्ञानिना तरणं सममेव ब्रूते । अत एव भगवान् बादरायणः "**इतरस्याप्येवं असंश्लेषः पाते तु**" इत्यधिकरणेन ज्ञानिनः पुण्येनापि न लिप्यन्ते—इत्यूचे । अतः मूले दुष्कृतपदं सुकृतस्याप्युपलक्षणमिति व्याख्येयम् ॥

ननु ज्ञानात् पूर्वं सञ्चितपुण्यपापे द्विविधे आरब्धफले च तयोर्द्विविधयोरप्यकर्तृत्वमात्मनः समानम् । तद्बाधश्च समः । ततोऽनारब्धवदारब्धयोरपि ज्ञानोदयसमय एव विनाशः किं न स्यादित्याशङ्क्याह—**प्रारब्धाय समर्पितं स्ववपुरिति** । प्रारब्धाय प्रारब्धफलाय सुकृताय दुष्कृताय च स्ववपुस्समर्पितं, तत्त्वविदोऽपि आदेहपातमाभासमात्रेण संसारोऽङ्गीकर्तव्य इति फलितार्थः । यदुक्तम् अनारब्धवदारब्धस्यापि नाशः किं न स्यदिति । तन्न । कस्मात् ? श्रुत्यनुभवयुक्तिभ्यः आरब्धफलयोः कर्मणोरविनाशोऽवगम्यते—"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतिः । यथा अनया श्रुत्या तत्त्वविदोऽप्यादेहपातं संसारोऽङ्गीकृतः तथा विद्वदनुभवोऽप्यस्मिन्नर्थे स्फुटः ।

युक्तिश्चोच्यते। यथा तूणनिष्ठेषु बाणेषु धानुष्कस्य स्वीकारपरित्यागयोः स्वातन्त्र्येऽपि मुक्ते बाणे स्वातन्त्र्यं न दृश्यते। स च बाणो वेगे क्षीणे स्वयं पतति। एवं कुलालचक्रभ्रमणमुदाहर्तव्यम्। एवं ब्रह्मज्ञानस्यापि अनारब्धकर्मनाशकत्वे स्वातन्त्र्यमस्तु, न त्वारब्धे कर्मणि, आरब्धस्य प्रवृत्तफलत्वात्। तस्मान्नारब्धफलयोः सुकृतदुष्कृतयोर्नाशः। अत एव भगवान् बादरायणः **"अनारब्धकार्ये एव तु पूर्वे तदवधेरि"**त्यधिकरणेन इममर्थं प्रतिपादयामास। ननु केन तर्ह्यारब्धपुण्यपापयोः क्षयः इति चेत् भोगेनेति ब्रूमः। तथा च विद्वान् भोगेन पुण्यपापे क्षपयित्वा अखण्डसच्चिदानन्दैकरसं अद्वितीयं ब्रह्म प्राप्नोति। तथा च श्रूयते—"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य" इति। "ब्रह्मैव सन् ब्रह्माप्येती"ति च। अत एव भगवान् बादरायणोऽपि एतदसूत्रयत्। **"भोगेन त्वितरे क्षपयित्वा सम्पद्यत"** इति। एतत् भगवत्पादैरेवोक्तम्—

प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत्।
कञ्चित्कालमनारब्धकर्मबन्धस्य संक्षये॥
निरस्तातिशयानन्दं वैष्णवं परमं पदम्।
पुनरावृत्तिरहितं कैवल्यं प्रपिपद्यते॥ इति।—(वा० वृत्तिः)

इतिशब्दो हेतौ। येनैतादृशेन विदुषा स्ववपुः प्रारब्धाय समर्पितं यतः अतः स गुरुरिति मम मनीषेत्यन्वयः। तस्मात् ब्रह्मात्मैक्ये न किञ्चित् बाधकमिति भावः। नन्वेवमपि स्थूलोऽहं कृशोऽहं काणोऽहं बधिरोऽहं बुभुक्षितोऽहं पिपासितोऽहं मन्ताऽहं निश्चेताऽहमिति देहादिरूपेण अनुभूयमानप्रत्यगात्मनः कथं स्वप्रकाशचिदेकरसब्रह्मत्वमिति चेन्न। ममेदं चक्षुः ममेदं श्रोत्रं ममायं प्राणः ममेदं मनः ममेयं बुद्धिरिति देहेन्द्रियादय इदङ्कारास्पदत्वेन अनुभूयन्ते। आत्मा तु देहेन्द्रियप्राणमनोबुद्धिभ्योऽपि भिन्नतया देवतिर्यङ्मनुष्यादिभिः सर्वैः जन्तुभिरहमहमित्यन्तःस्फुटतरमहंप्रत्ययालम्बनत्वेनानुभूयते। अतः इदङ्कारास्पददेहेन्द्रियादीनां घटादिवदात्मत्वाभावेन सिद्धमहमर्थस्यैव प्रत्यगात्मतया तया स्वप्रकाशचिदेकरसब्रह्मत्वम्। तदुक्तम्—

इदंबुद्धिश्च बाह्यार्थे त्वहंबुद्धिस्तथाऽऽत्मनि।
प्रसिद्धा सर्वजन्तूनां विवादोऽत्र न कश्चन॥
इदमर्थे घटाद्यर्थे नात्मत्वं सर्वदेहिनाम्।
अहमर्थे तथात्मत्वमपि सिद्धं स्वभावतः॥ इति।

नन्वहं मनुष्य इत्यादौ मनुष्यत्वादिधर्मयुक्तदेहादिसमानाधिकरणाहंप्रत्ययस्य तद्विषयत्वमनुभवसिद्धमिति चेन्नैष दोषः। चिद्भास्यत्वलक्षणयोगान्निश्चितेदमर्थे शरीरादौ जायमानोऽहंप्रत्ययः स्फटिके रक्तिमबुद्धिवत् भ्रान्तिरेव। अतस्मिन् तद्बुद्धिर्विपर्यय इति तल्लक्षणयोगात्। अपि चान्नपरिणामरूपत्वात् जडं स्थूलशरीरं तावदहंप्रत्ययस्य नालम्बनम्। तदनालम्बनत्वस्य मृत्पिण्डादौ जडे दृष्टत्वात्, अतोऽहंबुद्ध्यनालम्बनत्वात् स्थूलदेहो नात्मा। अत एवेन्द्रियप्राणमनोबुद्धयः स्थूलशरीरवदचिद्रूपत्वेन अहंबुद्ध्यनालम्बनत्वात् नात्मानः। नन्विन्द्रियादीनां चिद्भास्यत्वादस्त्वहंबुद्ध्यविषयत्वम्। बुद्धिस्तु चिद्रूपैव। तस्मात्तदनालम्बनत्वमयुक्तमिति चेत्। न, तस्या उत्पत्तिविनाशधर्मवत्त्वात् घटादिवदचिद्रूपत्वेन अहंप्रत्ययानास्पदत्वं युक्तमेव। नन्वहङ्कारस्य अहंबुद्ध्यालम्बनत्वेन आत्मत्वमस्त्विति चेत्। न। तस्यापि सत्वपरिणामरूपान्तःकरणकार्यतया चिद्भास्यत्वेन जडत्वात् घटादि-

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः ।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ॥ ४ ॥

वदहंप्रत्ययानालम्बनतया नात्मत्वम् । अपि च अहङ्कारस्तावदात्मा न भवति । अहं सुखी अहं दुःखीति सर्वप्रत्ययरूपेण विवर्तमानतया विकारित्वात् शरीरवत् । किञ्च दध्याकारपरिणामिनः क्षीरादेरनित्यत्वं लोकप्रसिद्धम् । तद्वत् सर्वप्रत्ययात्मना परिणममानस्याहङ्कारस्य तथाविधमचेतनत्वं केन निवारयितुं पार्यते । तस्माद्देहेन्द्रियादीनां चिद्भास्यत्वेन घटादिवत् परागर्थत्वात् प्रत्यग्भूतः साक्षी चिन्मात्ररूप एव आत्मा अहंप्रत्ययस्य विषयः, नाचिद्रूपं जडं देहेन्द्रियादिकम् । ननु यदि चिन्मात्ररूप आत्मा अहंबुद्धिविषयः तर्हि तस्य स्वप्रकाशत्वभङ्ग इति चेत् नैष दोषः । सर्वान्तरस्य प्रत्यगात्मनोऽहंप्रत्ययविषयत्वे सत्यप्यसौ स्वयंप्रकाशमान एव भवति । ननु बुद्धिवृत्तिविषयत्वं स्वप्रकाशत्वं च परस्परविरुद्धमिति चेत् । नायं दोषः । प्रत्यगात्मनः सत्यपि बुद्धिवृत्तिव्याप्यत्वे घटकुड्यादिवत्, स्फुरणं तदधिकम् । किं तु स्वच्छां बुद्धिवृत्तिमनुप्राप्य तस्या वृत्तेर्भासकसाक्षिचिद्रूपेणायं अवस्थितः सन् स्वयमेव प्रकाशते । नन्वहमर्थश्चिदात्मा स्वयं प्रकाशमानश्चेदहंवृत्तिस्तर्हि किमर्थेति चेत् । आत्मस्वरूपावरणभूताज्ञाननिवृत्त्यर्थेति ब्रूमः । तथा चोक्तम्—

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ।
स्वयं स्फुरणरूपत्वात् नाभास उपयुज्यते ॥ इति

अज्ञाननिवृत्तिरपि स्वप्रकाशचिन्मात्ररूपेणावशिष्यते । तदुक्तम्—अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः इति ॥ ३ ॥

तस्मात् स्वप्रकाशचिदेकरसः कूटस्थो नित्यः प्रत्यगात्मा अहमर्थः, स च स्वप्रकाशचिदेकरसं ब्रह्मैवेत्यनवद्यमित्यभिप्रेत्याह—**या तिर्यगिति**। तिर्यञ्चः कीटपतङ्गादयः । एतैस्तिर्यगादिसर्वजन्तुभिरहमित्यहंप्रत्ययालम्बनत्वेन अन्तःसर्वान्तरतया स्फुटा प्रकाशान्तरनिरपेक्षतया स्वयंप्रकाशमाना या स्फूर्तिः चिदेकरसः परमात्मा गृह्यते अनुभूयते । न देहेन्द्रियादयः । कुत इति चेत् । तेषां स्वतो जडत्वेन चिद्भास्यत्वादित्याह—**यदिति**। स्वतोऽचेतनाः हृदयाक्षदेहविषयाः यद्भासा यस्य स्वप्रकाशचिदेकरसस्यात्मनो भासा प्रकाशेन भान्ति । 'तस्य भासा सर्वमिदं विभाती'ति श्रुतेः । तदुक्तम् —

अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ।
देहेन्द्रियमनःप्राणाः सोऽहमित्यवधारय ॥ इति ।

ननु यद्ययमात्मा स्फुटतरमहंप्रत्ययगम्यः स्यात्तर्ह्ययत्नेन सर्वे जन्तवः किमिति न मुक्ताः स्युरित्याशङ्क्याह—प्रत्ययालम्बनत्वेनात्मानं जानन्तोऽप्यसङ्गचिदानन्दस्वरूपत्वेन चिद्भास्याज्ञानपटलावृताः विविच्य न जानन्ति । यथा आदित्यावभास्याभ्रावृताक्षो जन्तु अर्कं विघनमिवाद्धा विविच्य न जानाति । किं तु घनच्छन्नं निष्प्रभमेव जानाति । तद्वदहंप्रत्ययास्पदत्वेन जानन्तोऽपि असङ्गचिद्रूपत्वेनात्मानं न जानन्ति । तथा चोक्तम्—

तमहंप्रत्ययव्याजात् सर्वे जानन्ति जन्तवः।
तथापि शिवरूपेण न विजानन्ति मोहिताः॥ इति।

एतदभिप्रायेणाह—**भास्यैः पिहितार्कमण्डलनिभामिति**। निभां सदृशामित्यर्थः। तस्माद्देहेन्द्रियादिविलक्षणतया स्फुटतराहमनुभवगम्या तत्साक्षिणी या स्फूर्तिः चिदेकरसः परमात्मा तां स्वप्रकाशचिदेकरसमात्मानं सदा अनन्यव्यापारतया भावयन् स एवाहमिति तदेकाकारवृत्तिसन्तानं कुर्वन्नित्यर्थः। तदुक्तम्—

सावधानतया नित्यं स्वात्मानं चैव भावयेत्।
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत्॥ इति।

अयमेव सम्प्रज्ञातसमाधिरित्युच्यते। तं भगवान् **पतञ्जलिः** सूत्रयामास—**तत्र प्रत्ययैकतानता** एकविषयप्रवाहः। स च द्विविधः विच्छिद्य विच्छिद्य जायमानः सन्ततश्चेति। तावुभौ क्रमेण ध्यानसमाधी भवतः। तदुभयं दर्शितम्—

चित्तैकाग्र्याद्यतो ज्ञानमुक्तं समुपजायते।
तत्साधनमतो ध्यानं यथावदुपदिश्यते॥
विलाप्य विकृतिं कृत्स्नां सम्भवव्यत्ययक्रमात्।
परिशिष्टं च सन्मात्रं चिदानन्दं विचिन्तयेत्॥ इति।
ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिं विना।
सम्प्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः॥ इति।

तत्साधनमुपदर्शयन्नाह—**योगीति**। योगश्चित्तवृत्तिनिरोधस्तद्वान् योगी। योगशब्दो मौनादेरप्युपलक्षणम् तथा च स्मर्यते—

मौनं योगासनं योगस्तितिक्षैकान्तशीलता।
निःस्पृहत्वं समत्वं च सप्तैतान्येकदण्डिनः॥ इति

अथवा योगो जीवब्रह्मैक्यज्ञानम्। तद्वान् योगी। तथा च स्मर्यते—

वृत्तिहीनं मनःकृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते॥ इति।

नन्वनेन ज्ञानस्य भावनासाधनत्वमुक्तं भवतीति चेत्। बाढम्। "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः" इत्यनया श्रुत्या ज्ञानानन्तरं भावनायाः प्रतिपादित्वात्। ततः किमित्यत आह—**निर्वृतमानसः इति**। निर्वृतिः स्वरूपसुखं तद्वन्मानसं यस्य स तथोक्तः। तथा च विदुषो निरुद्धाशेषवाग्व्यापारमनोवृत्तितया विदिततत्त्वतया वा निरन्तरं निर्विघ्नेन भावनानुवृत्तौ परिपूर्णस्वप्रकाशचिदेकरसब्रह्मानन्द आविर्भवतीति भावः। तथा चोक्तम्।

शान्तसन्देहदौरात्म्यं गतकौतुकविभ्रमम्।
परिपूर्णतरं चेतः पूर्णेन्दुरिव राजते॥
परिप्राप्तविवेकस्य त्यक्तसंसारसंस्थितेः।
चेतसस्त्यजतो रूपमानन्दो हि विवर्द्धते॥ इति।

हिशब्दो हेतौ। हि यस्मात् यो निरुद्धमनाः स्फूर्तिं भावयन्नास्ते स तस्मात् सुखितमानसः गुरुरिति मम मनीषेत्यन्वयः। इत्थं जीवब्रह्मैक्यं सुष्ठु प्रतिपादितमिति भावः॥ ४॥

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृताः
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित् स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ५ ॥

॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचितं मनीषापञ्चकं समाप्तम् ॥

प्रत्यगात्मनः परमप्रेमास्पदत्वेन परमानन्दब्रह्मता सुघटत इत्याह—यस्य स्वप्रकाशचिदेकरसस्यात्मनः सुखमेव सौख्यं स्वार्थे ष्यञ्प्रत्ययः । तदेवाम्बुधिरिवाम्बुधिः सर्वत्रैकरसत्वात् । तस्य लेशलेशतः इमे शक्रादयो निर्वृताः सुखिनो भवन्ति । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"ति श्रुतेः । यस्मिन् नित्यसुखाम्बुधौ नित्यनिरतिशयानन्दैकरसे ब्रह्मणि गलितधीः गलिता निमग्ना तद्भावमापन्ना धीश्चेतो यस्य स तथोक्तः, स्वप्रकाशचिद्घनसदानन्दैकरसवस्तुमात्रत्वेनावस्थितस्वान्त इत्यर्थः । अयमेवासम्प्रज्ञातसमाधिरिति सङ्गीयते । तथा च तं समाधिमसूत्रयत् पतञ्जलिः—"तदेवात्ममात्रनिर्भासं स्वरूपशून्यमिव समाधिरि"ति । तथा चोक्तम्—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।
या सम्प्रज्ञातनामासौ समाधिरभिधीयते ॥ इति ।

इत्थं यः कश्चित् परिपूर्णपरमानन्दपयोनिधौ प्रलीनमनस्कः स तु परिपूर्णपरमानन्दस्वरूपत्वात् तत् स्वरूपं ब्रह्मैव न ब्रह्मवित् भेदाभावात् । तथा च श्रूयते—"स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवती"ति । स्मर्यते च—

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित् स्वयम् ॥ इति ।

अत एव सुरेन्द्रवन्दितपदः । सुरेन्द्रैरिन्द्रादिभिः भूतिकामैर्मनुष्यैश्च वन्दिते पादौ यस्य स तथोक्तः । तथा च श्रूयते—"तस्मादात्मज्ञं ह्यर्चयेत्भूतिकामः" इति । एतदेवाभिप्रेत्योक्तम्—

विचारेण परिप्राप्तविवेकस्योदितात्मनः ।
अनुकम्प्या भवन्त्येते ब्रह्मविष्णिवन्द्रशङ्कराः ॥ इति ।

अथवा सुरेन्द्रवन्दितपदः । सुरेन्द्रैः ब्रह्मादिभिः वन्दितं अहमित्यपरोक्षेणानुभूतं पदं स्थानं ब्रह्मस्वरूपं यस्य स तथोक्तः । अत एवेन्द्रवाक्यं श्रूयते च—"प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वे"ति । श्रुत्यन्तरे नारदं च प्रति ब्रह्मवाक्यं श्रूयते—शान्तममलमद्वयानन्दविज्ञानघन एवास्मि तदेव मम धामेति । एतदेवाभिप्रेत्योक्तम्—

निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ इति ।

इत्येतादृशस्स गुरुरिति मम मनीषेत्यन्वयः । उक्तार्थे आदर्तव्यतां दर्शयितुमाह—नूनमिति । इयता प्रबन्धेन यत्प्रतिपादितं तत्सर्वं निश्चितमेवेत्यर्थः ।

॥ इति श्रीसदाशिवब्रह्मेन्द्रयोगिविरचितं मनीषापञ्चकविवरणं समाप्तम् ॥

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितं

मनीषापञ्चकम्

श्रीबालगोपालेन्द्रमुनिविरचितमधुमञ्जरीटीकोपेतम्

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञाऽपि यस्यास्ति चेत्
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम॥ १॥

श्रीमद्यतीन्द्र[मानम्य]नाथस्य जगन्नाथमुनिं गुरुम्।
मनीषापञ्चकव्याख्या तन्यते मधुमञ्जरी॥

तत्रादौ कथा निरूप्यते—

कदाचिच्छङ्कराचार्यः काशीं प्रति पुरीं ययौ।
तस्य ज्ञानपरीक्षार्थं कश्चिद्देवस्समागतः॥
चण्डालरूपी तं दृष्ट्वा गच्छ गच्छेति चाब्रवीत्।
तथोक्तवन्तमाचार्यं स देवः पुनरब्रवीत्॥

तथाहि—

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात्।
द्विजवर! दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति॥

अन्नमयेति—अस्यायमर्थः-अद्यते यज्जनैः तदन्नम्। अनुभवन्ति च भूतानि यत्तदन्नम्। अद भक्षणे इति धातोः अन्नशब्दस्योत्पन्नत्वात्। "अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते इति" इति श्रुतेश्च। तदन्नमयः तत्प्रधानः, तद्विकारो वा स्थूलदेहः अन्नमय इत्युच्यते। तस्मादन्नमयाच्चण्डालत्व-जातिविशिष्टाद्विप्रत्वजातिविशिष्टाद्वाऽन्नमयमुक्तलक्षणं स्थूलदेहमन्यतरजातिविशिष्टं दूरीकर्तुं दूरतः परिहृत्य गन्तुं, हे द्विजवर! "जन्मना जायते शूद्रः कर्मणा जायते द्विजः। वेदाध्यायी भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः॥ इति स्मरणात्। द्विजानां-द्विजन्मनां कर्मिणां मध्ये वरः श्रेष्ठः अत्यन्तकर्मिन् इत्यर्थः। गच्छ गच्छेति वचसा वाञ्छसि अभिलषसि। मनःपूर्वकत्वात् वाग्व्यापारस्य, 'यद्धि मनसा ध्यायति तद्वाचा वदति' 'वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्' इत्यादिश्रुतिभ्यो

वाग्व्यापारस्य मनोव्यापारपूर्वकत्वं सिद्धम् । यदुक्तं भाष्यकृता **श्रीविष्णुदिव्यसहस्रनामभाष्ये** 'मनसा वाऽग्रे सङ्कल्पयत्यथ वाचा व्याहरति' । 'यद्धि मनसा ध्यायति तद्वाचा वदति' इति श्रुतिभ्यां स्मरणं ध्यानं च नामकीर्तन एव अन्तर्भूतमिति । किं ब्रूहीति काकुस्वरेणाक्षेपः । पक्षान्तरमवलम्बयति—**अथवेति** । अथवा उत, चैतन्यमेव–चेतनमेव चैतन्यं न तु भिन्नः चेतनधर्मः । चेतनस्याद्वितीयत्वेन व्यक्तिभेदस्यानङ्गीकारेण जातेरनङ्गीकारात् । तच्च चैतन्यं कूटस्थरूपं प्रतिबिम्बरूपं अवच्छिन्नरूपमेव, वा नान्यत् । तादृशादेव चैतन्यात्पूर्वोक्तोभयजातिविशिष्टस्थूलदेहान्तर्वर्तिनः आत्मनो दूरीकर्तुं वाञ्छसि किं ब्रूहि पूर्ववदनुषज्यते ।

किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवाटीपयः
पूरे वाऽन्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाऽम्बरे ।
प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ
विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेदभ्रमः ॥

किं गङ्गेति । गङ्गाम्बुनि ब्रह्मावर्तक्षेत्रे काश्यादिपुण्यनगरप्रान्ते देवतामनोहारिणी विष्णुपदोद्भवा भागीरथी जाह्नवीति ह्यपरपर्यायनाम्नी विलसति गङ्गा । तस्याः सर्वपापक्षयकरं परम्परया मोक्षप्रापकं च यदम्बु जलं तस्मिन् । अम्बरमणौ अम्बरे नभसि मणिरिव दीप्यतेऽतिशयेन विराजमानत्वादम्बरमणिः सूर्यः, तस्मिन् बिम्बिते प्रतिबिम्बिते सति प्रतिच्छायया दृश्यमाने सति इति यावत् । तथैव चण्डालवाटीपयःपूरे । चण्डालाः श्वपचा तेषां वाटी वीथी तस्या यत्पयःपूरं, चर्मक्लेदनादिना दुर्गन्धं दुर्मलिनं जलं तस्मिन् बिम्बिते सतीत्यनुषज्यते । अन्तरं भेदोऽस्ति किमित्याक्षेपः उभयत्रापि योज्यः । नान्तरमनुभूयते विद्वदविद्वत्साम्येनेत्याक्षेपाभिप्रायः । एवं प्रतिबिम्बपक्षाङ्गीकारे भेदभ्रमस्यानवकाशं प्रदर्श्यावच्छिन्नपक्षेऽपि तं दर्शयति—**काञ्चनेति** । काञ्चनेन सुवर्णेन निर्मिता घटी कुम्भः काञ्चनघटी। मृदा प्रसिद्धया गन्धादिगुणवत्या निर्मितः कुम्भः मृत्कुम्भः। काञ्चनघटीमृत्कुम्भयोः, ताभ्यामवच्छिन्नमाच्छादितं अम्बरं नभः यत्तस्मिन् अम्बरेऽन्तरमस्ति किं इत्याक्षेपः । नास्त्येवेति तात्पर्यम् । अत्रोभयपक्षयोः प्रतिबिम्बयोरवच्छिन्नयोर्वा बिम्बेनानवच्छिन्नेन प्रतिबिम्बाभ्यां अवच्छिन्नाभ्यां बिम्बस्यानवच्छिन्नस्य प्रतिबिम्बयोरवच्छिन्नयोर्वा परस्परं न कदाचिद्भेदगन्धस्यावकाशः । व्यवहारभेदस्योपाधिपरामर्शमन्तरेणाविभाव्यमानत्वाद्विचाराभावजीवनस्य द्वैतमिथ्याभ्रमस्य विचारवद्भिः न वस्तुत्वमवसीयते । किन्तु विचारविकलैरेवेत्यतो विचारवता भवता कथमुच्यते गच्छ गच्छेत्यभिप्रायः ।

सम्प्रति दृष्टान्ते सोपाधिकयोः अन्योऽन्यमनुपाधिकेन उपाधिभ्यां (तस्य च) अनुपाधिकस्य च भेदाभावेऽपि उपाधिभूतयोरार्यावर्तादिपुण्यापुण्यक्षेत्रयोः अथ च तत्स्थगङ्गादिपुण्यापुण्यजलयोः भेदस्य विद्यमानत्वात् दार्ष्टान्तिकेऽपि विप्रत्वाविप्रत्वजातिविशिष्टयोः स्थूलदेहयोः तत्संस्कारतदभावविशिष्टयोः अन्तःकरणयोश्च भेदस्यानुभूतत्वाद्विप्रत्वजातिविशिष्टतत्संस्कारयुक्ततद्देहतदन्तर्वर्त्यन्तःकरणाभ्यां तज्जातिरहिततत्संस्कारशून्यदेहतदन्तःकरणयोः दूरीकरणेच्छा युक्तैवेति वदता शङ्कित इव पुनरप्यध्यस्तप्रपञ्चविधुरे परमात्मनि विज्ञाते न किञ्चिदन्यद्विद्यत इति 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिश्रुतिमवष्टभ्य सर्वात्मकत्वमात्मनोऽनुभवन्नुपाधिद्रष्ट्रापि तद्दूरीकरणेच्छा न घटिष्यत इति प्रथमं विकल्पं परिहरति प्रातिलोम्येन—**प्रत्यगिति** । मिथ्याऽध्यस्तसर्वप्रपञ्च-

वैलक्षण्येनाञ्चति प्रकाशते इति प्रत्यक् परमात्मा, स च, वस्तु अनध्यस्तात्मस्वभावत्वे सति कल्पित-समस्तवस्त्वधिष्ठानभूतः। तस्मिन् प्रत्यग्वस्तुनि। किञ्च निर्गतः प्रपञ्चरूपः तरङ्गः यस्मात्। सहजानन्दावबोधाम्बुधौ सहजः स्वभावः, आनन्दः सुखं, अवबोधः स्फुरणं, स्वभावभूतः न केनापि निर्वर्तितः। आनन्दश्चासाववबोधश्चेति सहजानन्दावबोधः। स एव अम्बुधिरिव अम्बुधिरपर्यन्तत्वात्। तस्मिन् निस्तरङ्गसहजानन्दावबोधाम्बुधौ प्रत्यग्वस्तुनि अहमहमित्यनुभूयमाने सति इति शेषः। विप्रोऽयं द्विजातिरध्ययनशीलः, श्वपचोऽयं चण्डालः पशुघातकः इतिः, इयत्तापरिच्छेदशून्येऽयं विभेदभ्रमः द्वैतभ्रान्तिः कः कुतस्सम्भवति, न कुतोऽपीत्यर्थः प्रत्यगेकरसस्य वस्तुनः निष्प्रपञ्चत्वोक्तेरिति भावः।

एवं केवलपारमार्थिकदृष्टिमवलम्ब्याक्षिप्तस्सन्नाचार्यः अयं देवः तारकोपदेष्टा पूर्णपुरुषः विश्वेश्वरो भवितुमर्हतीति निश्चित्य, यथोक्तमेवं तत्, एतादृशदृष्टिमत्सु भवादृशेषु न अस्माकं चण्डालत्वादिप्रतीतिरित्यभिप्रेत्य जाग्रदित्यादिभिः पञ्चभिः श्लोकैः स्वानुभवं निरूपयति। तत्र तावच्चतुर्षु वेदेषु यानि प्रसिद्धानि 'प्रज्ञानं ब्रह्म', 'अहं ब्रह्मास्मि', 'तत्वमसि', 'अयमात्मा ब्रह्म', इत्येवंरूपाणि क्रमेण ऋग्यजुस्सामाथर्वणोपनिषद्गतानि महावाक्यानि अर्थतोऽनुक्रामति जाग्रदित्यादिना—

अस्यायमर्थः—यस्यापि कस्यचित्पुरुषविशेषस्य दृढप्रज्ञाऽस्ति चेत्स पुरुषः चण्डालोऽस्तु, द्विजो वा अस्तु, गुरुरित्येषा मम मनीषेत्यन्वयः। अत्र सैवाहं न च दृश्यवस्तु इति प्रज्ञायाः प्रकारः उक्तः। स्फुटतरेति सर्वप्रसिद्धिद्योतनार्थम्। जानामीत्यादिसंव्यवहारेषु प्रज्ञानस्य विजृम्भमाणत्वात्प्रज्ञानानुभवविहीनस्य लोष्टवन्नरसमाकृतेः शास्त्रार्थविचारे अनधिकाराच्च। अथवा स्फुटतरेति संविदोऽनावृतत्वमुच्यते। तस्याः सर्वाधिष्ठानतया सर्वप्रकाशकत्वेन आवरणाज्ञानस्यापि भासकत्वात्। 'तमेव भान्तमनुभाति सर्वम्' इत्यत्र श्रुतौ सर्वशब्देन आवरणस्यापि विवक्षितत्वात्। चैतन्यप्रसिद्धिद्योतनन्तु यच्छब्देन भवति। ननु यच्छब्देन चैतन्यस्य प्रसिद्धिः विवक्षिता चेत्तर्हि सा प्रसिद्धिः क्वेत्याकाङ्क्षायामाह—जाग्रत्स्वप्नसुषुप्तिष्विति। इन्द्रियैरर्थोपलब्धिः जागरितम्। करणेषु उपसंहृतेषु जागरितसंस्कारजप्रत्ययः सविषयः स्वप्नः। सर्वप्रकारकज्ञानोपसंहारो बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिरित्येवंलक्षणका जाग्रदाद्यवस्थाः प्रसिद्धाः। तासु प्रसिद्धास्ववस्थासु संविदपि प्रसिद्धा।

नन्वेवं शास्त्रकृतपरिश्रमाणां संवित्प्रसिद्धिरस्तु। अतिरिक्तानां कथमिति चेदुच्यते—शब्दान्तरेण व्यवहृतत्वादिति। संवित्, प्रज्ञानं, बोधः, साक्षी, कूटस्थः, स्वयमात्मा इत्येवंप्रकारकैः शब्दैः व्यवहर्तुं असंस्कृता असमर्था अपि देशभाषादिसाङ्केतिकशब्दैः आत्मानं चैतन्यरूपं सर्वसंव्यवहारसाधकत्वेन व्यवहरन्ति। ज्ञापकं च तेषां वर्तते विजानामीत्यादि। तत्र विजानामीत्यादिव्यवहारो बोधमूलक इत्यनुमानादिना प्रमाणेनाविजानन्तोऽपि प्रसिद्धाः जानन्त्येव। इदानीं ज्ञानमस्ति व्यवहारोऽप्यस्ति, इदानीं तु ज्ञानं नास्ति व्यवहारोऽपि नास्तीति अन्वयव्यतिरेकज्ञानं विवेकिनां गुरुमुखात्सिद्धमपि अविवेकिनामनुभवत एव सिद्धम्। तद्यथा चन्द्रमा भगवत ईश्वरस्य हृदयं नेत्रमित्यादिरूपेण शिष्टैर्विज्ञातोऽपि मूढैर्ज्ञात एव स्वप्रकाशत्वेन शिशिरकरत्वेन मण्डलाद्याकारेण। एवमेव संवित्स्वतःसिद्धप्रकाशेत्यादिना लिङ्गसिद्धकान्त्यादिविशेषानुभवविवेकेनाविज्ञाताऽपि संविद्व्यवहारसाधकत्वप्राधान्येन विज्ञाता भवति। तस्माद्विवेकविकलानामप्यात्मसंवित्प्रसिद्धिरस्तीति बोध्यं

व्यवहारबलेनेत्यभिप्रेत्याह—**उज्जृम्भत इति**। उत् अधिकं यथा तथा जृम्भते उल्लसति व्यवहार-हेतुतया प्रकाशत इत्यर्थः। यद्वा उदपि जृम्भत इति हेतुः। संवित्प्रसिद्धौ विद्वत्स्वविद्वत्सु च अहमिति सर्वदा भानात्। विद्वांसो हि वयं स्म इति जानन्ति अविद्वांसोऽपि तथा। किन्तु प्रकारान्तरेण अत एव विद्वदविद्वद्भेदः।

जाग्रदित्यारभ्य उज्जृम्भत इत्यन्तेन इयता ग्रन्थसन्दर्भेण 'प्रज्ञानं ब्रह्म' इति महावाक्यस्थ-प्रज्ञानशब्दस्य अर्थः उक्तो भवति। अधुना ब्रह्मशब्दस्य अर्थमाह—

ब्रह्मा चतुर्मुखः आदिः येषां ते ब्रह्मादयः। पिपीलिका कीटविशेषः अन्त येषां ते पिपीलि-कान्ताः। ब्रह्मादयश्च पिपीलिकान्ताश्च ब्रह्मादिपिपीलिकान्ताः प्राणिनः। तेषां तनवः शरीराणि तासु। जगतः प्रपञ्चस्य साक्षिणी साक्षादव्यवधानेन ईक्षणकर्त्रीति हेतोः प्रोता अनुगततया वर्तमाना या प्रसिद्धा संवित् (जाग्रदित्यादौ) व्याख्याता एव।

ब्रह्मशब्दस्य परिपूर्णत्वमर्थमुक्त्वा तेन प्रत्यगात्मन एकत्वमभिवदति—**सैवाहमिति**। सैव-प्रसिद्धैव संवित्, अहं–अहंपदलक्षितः, अहंप्रत्ययव्यवहारयोग्यः चिदात्मा। न च दृश्यवस्तु। दृशा व्याप्यत इति दृश्यं जगत्, तद्वस्तु, जगतो वस्तुत्वं कल्पितसम्बन्धेन परमार्थवस्तुनि विद्यमानमुप-चर्यते। जगतः कल्पितत्वेन वस्तुतो वस्तुत्वाभावेऽपि व्यवहारसत्यत्वाङ्गीकाराद्योग्यवस्तुत्वमस्तीत्य-भिप्रायः। तदहं न भवामि, दृश्यवस्तुनो जडत्वात्परिच्छिन्नत्वाच्चेति दृढप्रज्ञा, दृढा संशयासम्भावना-दिभिः अबाधिता प्रज्ञा-मतिः, अज्ञानां देहादिप्रज्ञेव यस्य कस्यचिदपि पुरुषविशेस्य श्रुत्याचार्यप्रसाद-महिम्ना अस्ति विद्यते चेत्-यदि, स तु पुरुषः चण्डालः पशुघातकः अस्तु-भवतु। अथवा द्विजः-जात्या विप्रः अस्तु-भवतु। गुरुः-सर्वज्ञो भगवानिति। 'ज्ञानी त्वात्मैव मे मतम्' इति स्मृतेः, 'तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः' इत्यादिश्रुतेश्च। एषा-एतादृशो मम मनीषा मदीया बुद्धिः, मम अनुभव इति यावत्।

इदमत्र कृतं–यस्तु पुरुषधौरेयः 'जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते' इति ग्रन्थेनोक्तप्रज्ञानशब्दार्थं बुद्ध्वा एतस्यार्थस्य 'या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी' इति इयता ग्रन्थेनोक्तब्रह्मशब्दार्थत्वं विज्ञाय एतद्विज्ञानस्य फलभूतं 'सैवाहं न च दृश्यवस्तु' इति इयता ग्रन्थेनोक्तवाक्यार्थानुभवं कुर्वन् स्थितप्रज्ञो भूत्वा सदा समाहितस्सन् वर्तेत, न तस्मिन्मम चण्डालत्वादिविपरीतज्ञानं, किन्तु ब्रह्मत्वमतिरेव 'ब्रह्मविद्ब्रह्मैव भवति' इति श्रुतेरिति। यद्यपि सर्वमात्मेति विज्ञानात् श्वपचत्वादिप्रतीतिः न पारमार्थिकी। तथापि व्यवहारसाङ्कर्यानापत्तये 'व्यवहारे भट्टनयः' इति न्यायाद्भावनया स्वात्मनः सर्वात्मकत्वमनुभवन्क्रियया यावत्प्रारब्धं द्वैत-व्यापारे यथापूर्वं यथाशास्त्रं विदुषा वर्तितव्यं इति च 'लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि' इति स्मृतेराचार्यस्य अभिप्रायान्तरं विज्ञायते।

ननु 'चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मम मनीषा' इति कथमभियुक्तैः वक्तुमुचित-मिति चेन्न। आक्षेप्तुः देवस्य चण्डालवेषधारित्वादाक्षेपस्यापि 'विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेदभ्रमः' इत्येवंरूपत्वादुक्तस्य चोक्त्यनुसारित्वात्। अथ च परमार्थवस्तुन उपनिषदेकसमधि-गम्यत्वेन वेदाधिकारिणामेव तदनुभवः, तथापि यश्च कश्चन योगभ्रष्टो "गहना कर्मणो गति"रिति

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया सेशं मया कल्पितम् ।
इत्थं यस्य दृढा मतिस्सुखतरे नित्ये परे निर्मले
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ २ ॥
शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना ।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥ ३ ॥

वचनात् किञ्चित्कर्मंशेषतया चण्डालदेहधार्यपि भवेन्नाम । तस्मिञ्जन्मनि न तस्याध्यापनापेक्षा, जन्ममात्रेणैव प्रारब्धकर्मणो नष्टत्वात् । भूतपूर्वगत्या ब्रह्मानुभवस्य सिद्धत्वात् न तस्मिन् चण्डालत्वादिभ्रमः । 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति स्मृतेः । 'अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः' इत्यादिश्रुतेश्च ॥ १ ॥

इदानीं यजुर्वेदोपनिषद्गत 'अहं ब्रह्मास्मीति' महावाक्यार्थं अभिवर्णयति—**ब्रह्मैवाहमिति** । यस्य मतिः सुखतरे नित्ये परे निर्मले दृढा स तु पुरुषः चण्डालोऽस्तु द्विजो वास्तु मम गुरुः इत्येषा मनीषेत्यन्वयः । इत्यादिविशेषणैः विशेषिते परे किमिति मतिर्दृढेत्याकाङ्क्षायामाह—**ब्रह्मैवाहमित्यादिना** । अहं अहंशब्दप्रत्ययाभ्यामुपलक्षित आत्मा ब्रह्मैव परिपूर्णपरमात्मैव । **किञ्चेदं सकलं** समस्तं जगत् चेतनाचेतनात्मकं चिन्मात्रविस्तारितं चिन्मात्रे चिदेकरसे ब्रह्मणि विस्तारितं प्रपञ्चितम् । केन विस्तारितमित्याशङ्कायामाह—**सर्वं चैत**दिति । एतत् परिदृश्यमानं अशेषं ब्रह्मादीश्वरसहितं सर्वं जगत् त्रिगुणया त्रिगुणात्मिकया अविद्यया मया अध्यक्षेण कल्पितं रचितम् । इत्थमेवं प्रकारेण निश्चित्येति शेषः । दृढप्रज्ञा दृढबुद्धिः, असम्भवनादिभिः न बाधितेत्यर्थः । यस्य वा कस्यचित्पुरुषवरस्यास्ति विद्यते चेत् इत्यनेन ज्ञाननिष्ठायाः दुर्लभत्वमुक्तम् । स तु चण्डालोऽस्त्वित्यादि स्पष्टम् ॥ २ ॥

अधुना सामशाखोपनिषद्गततत्त्वमसीति महावाक्यस्यार्थमाह—**शश्वदिति** । अखिलजगत्कारणं सत्तामात्रं वस्तु यन्निर्दिष्टं 'सदेव सोम्येदमग्र आसीत्' इत्यादिना, तदेव त्वं न ततो भिन्नोऽसि भेदस्य मिथ्यात्वात्, वस्तुनः एकरूपत्वादित्युपदेष्टुराचार्यस्य वाचा वचसा ब्रह्म परिपूर्णं वस्तु निरन्तरं स्वात्मनोऽभिन्नं निश्चित्य निश्चयेन ज्ञात्वा, अखिलं समस्तं जगत्, शश्वत् सर्वदा नश्वरमेव, न तु नित्यमिति, नित्यं सर्वदा विमृशता आलोचयता अत एव निर्व्याजशान्तात्मना निर्व्याजः निष्कपटः शान्तः उपरतः आत्मा अन्तःकरणं यस्य तेन, भूतं अतीतं भावि आगामि च यत् दुष्कृतं दुःखानुभवकारणं पापं संविन्मये अहं ब्रह्मास्मीति ज्ञानस्वरूपे पावके अग्नौ प्रदहता प्रकर्षेण दहनं कृतवता येन पुरुषधौरेयेण ब्रह्मविन्मुख्येनेति यावत् । स्वं स्वकीयं वपुः शरीरं प्रारब्धाय अवश्यंभाविफलाय कर्मणे

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः ।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ॥ ४ ॥

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृताः
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित् स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥ ५ ॥

॥ इति श्रीशङ्करभगवत्पादाचार्यविरचितमनीषापञ्चकं समाप्तम् ॥

समर्पितं, प्रारब्धाधीनं कलेवरं कृतम् । तस्य जीविते मरणे वा न स्वयं बुद्धिविक्रियते इति भावः । स तु चण्डालोऽस्तु द्विजो वास्तु गुरुरित्येतदनुषञ्जनीयम् । शिष्टं स्पष्टार्थम् ॥ ३ ॥

सम्प्रति 'अयमात्मा ब्रह्म' इत्याथर्वणशाखोपनिषद्गतमहावाक्यस्य अर्थमाह—या तिर्यगिति । तत्र तावदयमात्मा ब्रह्मेति वाक्यस्थब्रह्मशब्दार्थमाह—या प्रसिद्धा स्फूर्तिः स्फुरणं, चैतन्यमिति यावत् । तिर्यङ्नरदेवताभिः तिर्यग्भिः पशुभिः नरैः मनुष्यैः देवताभिः दैवतैश्च अहमिति अहं-प्रत्ययव्यवहारयोग्यतया अन्तः विज्ञानमयशब्दवाच्यायां बुद्धौ स्फुटं अनावरणं यथा तथा गृह्यते अनुभूयते । यद्भासा यस्याः स्फूर्तेः भासा प्रकाशेन हृदयाक्षदेहविषयाः हृदयं हृदि हृद्गोलके अयनं अस्येति हृदयं मनः । अक्षाणि इन्द्रियाणि ज्ञानकर्माख्यानि, देहः स्थूलः । विषयाः शब्दाद्याः वचनाद्याश्च एते सर्वे स्वतः स्वभावतः अचेतनाः जडाः अपीति अपिशब्दो द्रष्टव्यः । भान्ति प्रकाशन्ते चेतना इवेत्यर्थः । पुनर्भास्यैः प्रकाश्यैः हृदयाक्षदेहविषयैः पिहितार्कमण्डलनिभां पिहितं आच्छादितं मेघैः यदर्कमण्डलं सूर्यमण्डलं तन्निभां तत्सदृशीं स्फूर्तिं व्याख्यातां सदा नित्यं योगी (निर्वृतमानसः) जितेन्द्रियः भावयन् अहमिति ध्यायन् इति (आत्मशब्दार्थो व्याख्यातः) या स्फूर्तिः तिर्यङ्नर-देवताभिः अहमित्यन्तःस्फुटं गृह्यत इति ब्रह्मणो रूपमुक्तम् । यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः इत्यात्मनो रूपमुक्तम् । तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्निति हि ब्रह्मात्मनोरेकत्वमुक्तम् । यच्छब्दद्वयेन स्फूर्तिसमष्टिव्यष्ट्युपाधिविशिष्टं लक्षयित्वा तच्छब्देनैकान्वयेन तस्य योजितत्वात् । एवं निर्वृतमानसः मोक्षसुखयुक्तमानसो हि प्रसिद्धं यः स गुरुरित्यादि स्पष्टम् । अथवा हिशब्दो हेत्वर्थः । यस्मान्निर्वृतमानसः तस्माद्गुरुरिति ॥ ५ ॥

एवं महावाक्यचतुष्टयस्य जीवब्रह्मैक्यपरत्वमभिवर्ण्य तन्निष्ठस्य गुरुत्वमपि व्याख्याय अधुना फलितमाह—यत्सौख्याम्बुधीति । यत् प्रसिद्धं विद्वत्सु सौख्यं सुखं अम्बुधिः समुद्र इव समुद्रः अपर्यन्तत्वात् । 'एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । तस्य सौख्याम्बुधे-

लेशलेशतः सूक्ष्मात्सूक्ष्मतराल्लेशमात्रादित्यर्थः। इमे प्रसिद्धाः शक्रादयः इन्द्रादयः, ब्रह्मबृहस्पतिप्रभृतयः आदिशब्देनोच्यन्ते। निर्वृताः मुक्ताः आनन्दिनो जाता इत्यर्थः। यत्सुखं चित्ते अन्तःकरणे नितरां अत्यन्तं प्रशान्तं कलनं चलनं यस्मिंस्तत्तथा। तस्मिन्सति लब्ध्वा प्राप्य अपरोक्षतया अहमित्यनुभूयेत्यर्थः। स मुनिः मननशीलः निर्वृतः मुक्तो भवतीत्यर्थः। यस्मिन्योगिप्रत्यक्षगम्ये प्रसिद्धे नित्यसुखाम्बुधौ सुखमेवाम्बुधिः सुखाम्बुधिः। नित्यश्चासौ सुखाम्बुधिश्चेति नित्यसुखाम्बुधिः। सुखस्य विषयजनितस्य वृत्त्यधीनतया क्षणिकत्वेऽपि अविषयजनितस्य वृत्त्यधीनत्वाभावान्नित्यत्वं, अत एव अपरिच्छिन्नत्वं चेति विज्ञेयम्। तत्र तस्मिन्नित्यसुधाम्बुधौ गलिता भ्रष्टा विलीनेत्यर्थः। धीः बुद्धिः ब्रह्माकारवृत्तिरिति यावत्, यस्य सः तथा स ब्रह्मैव ब्रह्मस्वरूप एव, न ब्रह्मवित् ब्रह्म वेत्तीति ब्रह्मवित् स न भवति, वृत्तेरुपरतत्वात्। वृत्त्यधीनं हि वेद्यत्वं वेदितृत्वं च। यः एतादृशः कश्चित् इत्यनेन ब्रह्मविन्निर्विकल्पसमाधिमान् लोके दुर्लभतर इति गम्यते। सर्वंसिद्धो ब्रह्मविद्वरिष्ठः सुरेन्द्रवन्दितपदः, सुरा देवाः तेषां इन्द्रः स्वामी शतमखः तेन वन्दितं नमस्कृतं पदं पादः यस्य स तथा। नूनं सत्यं, अस्मिन्नर्थे न संशयः। एवं मनीषा मम इति स्पष्टम्।

मनीषापञ्चकस्यैषा कृता टीका मनोहरा।
बालगोपालेन्द्रनाम्ना मुनिना मधुमञ्जरी॥

॥ इति श्रीबालगोपालेन्द्रमुनिविरचितमधुमञ्जरी समाप्ता ॥

श्रीशङ्करभगवत्पादाचार्यविरचितः

आत्मज्ञानोपदेशविधिः

श्रीआनन्दगिर्याचार्यविरचितटीकोपेतः

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितः

आत्मज्ञानोपदेशविधिः

श्रीआनन्दगिर्याचार्यविरचितटीकोपेतः

अथ प्रथमः पटलः

अथात्मज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षवे श्रद्दधानाय यतये वीतरागाय,

---

अथ प्रथमः पटलः

विधूतविविधानन्दकल्पनं कल्पनास्पदम् ।
अमन्दानन्दसन्दोहं वन्देऽहं पुरुषोत्तमम् ॥
यस्य प्रसादमासाद्य सद्गतिं बहवो गताः ।
तमहं प्रत्यहं वन्दे शुद्धानन्दपदं गुरुम् ॥

आत्मज्ञानाख्यं प्रकरणमशेषोपनिषदर्थंसारसङ्ग्राहकं प्रारभमाणो भगवान् भाष्यकारः चिकीर्षितप्रकरणाप्रत्यूहपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय मङ्गलाचरणं वृद्धाचारप्रमाणकं कुर्वन्—

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥"

इति स्मृतिमनुसृत्याथशब्दोच्चारणरूपं मङ्गलाचरणमादौ सम्पादयति—**अथेति** । न चायमथशब्दो विशिष्टाधिकारिणमानन्तर्योक्तिद्वारा समर्पयितुमर्हति, तस्य वक्ष्यमाणतया पौनरुक्त्यप्रसङ्गात् । न चास्याधिकारार्थत्वम्, वाक्यार्थेऽन्वयायोगात् । न च प्रकृतादर्थादर्थान्तरार्थत्वम्, प्रकृतानिरूपणात् । न च हृदयाद्यवदानेष्विव क्रमार्थत्वम्, क्रमवतोऽभावात् । तेन पारिशेष्यादस्य मङ्गलार्थत्वमेव युक्तम् । तदर्थस्य च वाक्यार्थत्वान्नान्वयानुपपत्तिः । न चेदमधिकारेऽपि तुल्यम्, तस्य पृथगुक्तरुक्तत्वादिति भावः । एवमोङ्कारोच्चारणवत् अथशब्दोच्चारणकृतमङ्गलाचरणः ग्रन्थमारभमाणः विषयाद्यनुबन्धमादर्शयन् उद्देश्यं प्रतिजानीते—**आत्मज्ञानेति** । आत्मनो निरुपचरितस्वरूपस्य प्रतीचो ज्ञानमित्युक्त्या प्रकरणविषयत्वमस्य द्योत्यते । तेन विषयविषयिभावः सम्बन्धोऽपि तस्य सूचितो वेदितव्यः । ज्ञानशब्दप्रयोगात् जिज्ञासूनामिष्टत्वात् ज्ञानस्य प्रयोजनत्वं ध्वनितम् । तस्य **उपदेशविधिः** उपदेशप्रकारः । "आचार्यवान् पुरुषो वेद" (छा० ६-१५-२) इति श्रुतेः आचार्योपदेशमन्तरेणात्मज्ञानं लब्धुमशक्यमिति दर्शयितुमुपदेशग्रहणम् । उपदेशश्च गुरुसम्प्रदायः आचार्योपदेशमन्तरेणात्मज्ञानमुपपादयितुमलमधिकारिभेदात् । यद्यपि गुरूपदेशमात्रादुत्तमाधिकारी तत्त्वं प्रतिपत्तुं प्रभवति तथापि मन्दमध्यमयोः न तथा सम्भवतीति सर्वाधिकारिणोऽनुरोद्धुं प्रकार-

आत्मलाभात् परलाभाभावात्। द्रष्टुर्दृश्योऽन्य इति प्रसिद्धो लोके। अथ क आत्मेति? देहस्तावदात्मा न भवति रूपादिमत्त्वेनोपलभ्यमानत्वात् घटादिवत्। यथा घटादयो

भेदवाची विधिशब्दः। एतेन "तस्य ज्ञानमुपदेशः" (पू० मी० १-१-५) इत्युपदेशशब्दस्य विधिपर्यायत्वात् उपदेशविधिरिति पौनरुक्त्यमिति प्रत्युक्तम्। तं विशेषेण, अतिविशदतया प्रकथयिष्यामो येन संशयादेरनवकाशत्वमित्यर्थः। अभिधेयाद्यनुबन्धत्रयमपेक्षितमुपक्षिप्तम्। सम्प्रत्यधिकार्यनुबन्धमुपक्षिपति—**मुमुक्षव इति**। न हि मोक्षापेक्षामन्तरेण तदुपायज्ञाने पुरुषोऽधिक्रियते। "श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य परं पारं तारयतु" (छा० ७-१-३) इति प्रक्रमदर्शनात् "ब्रह्मविदाप्नोति परम्" (तै० २-१-१) इत्यादिवचनाच्च संसारं परित्यज्य ब्रह्मप्रेप्सा विशेषणमधिकारिणो भवतीत्यवगम्यते। न च तस्यापेक्षिते मोक्षे तदुपाये ज्ञाने तदन्तरङ्गबहिरङ्गहेतुषु तदुपदेशे तत्कर्तरि चाचार्ये श्रद्धामन्तरेणापेक्षितमोक्षौपयिके ज्ञानेऽधिकारो युज्यते। "श्रद्धत्स्व सोम्य" (छा० ६-१२-३) "श्रद्धावित्तो भूत्वा" (बृ० ४-४-२३) "श्रद्धावान् लभते ज्ञानम्" (भ० गी० ४-५२) इत्यादिश्रुतिस्मृतिप्रामाण्यात् फलतदुपाययोः श्रद्दधानस्यैवाधिगमात्। न च पुत्राद्येषणात्रयपरित्यागाभावे तत्परवशस्य प्रकृतेऽधिकारः सेद्धुमर्हति। आत्मानमेव लोकमिच्छन्तः प्रव्रजन्तीति ज्ञानाधिकारिणि पारिव्राज्यविधानाच्च "शान्तो दान्त उपरतस्तितिक्षुः" (बृ० ४-४-२३) इति च तस्मिन्नेव शमादिभिः सहोपरतिशब्दितकर्मपरित्यागश्रवणात्। न चैहिकामुष्मिकार्थभोगविरागादृते प्रकृते ज्ञाने अधिकारः सम्भवति "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" (मु० १-२-१२) इति चाधिकारिविशेषणत्वेन वैराग्यं श्रूयते। तदेवमधिकारिणे साधनचतुष्टयविशिष्टायात्मज्ञानमुपदेष्टव्यम्। "तेषु हि सत्सु ब्रह्म जिज्ञासितुं शक्यते ज्ञातुं च" इति (सू० भा० १-१-१) दर्शनादित्यर्थः।

ननु प्रयोजनमिष्टलक्षणमिष्टम्। तच्चाभ्युदयः निश्श्रेयसं चेति प्रसिद्धम्। आत्मज्ञानाच्च केचिदुद्वेगभाजो दृश्यन्ते। तथा च कथमात्मज्ञानं प्रकरणस्य प्रयोजनत्वेन प्रदर्शितमिति तत्राह—**आत्मलाभादिति**। आत्म[त्मा]लाभस्य[अ]ज्ञानत्वेन अनर्थत्वात् तल्लाभस्य ज्ञानात्मनः तन्निमित्तत्वेन पुरुषार्थत्वात् तस्यैव निश्श्रेयसत्वात् तस्मात्परस्य निरतिशयस्य लाभस्य अभावात्, अभ्युदयस्य ततोऽर्वाचीनत्वेन पुरुषार्थाभासत्वात् "आत्मलाभान्न परं विद्यते" (आ० ध० सू० १-८-२) इति स्मृतेः आत्मज्ञाना(दन)धिकृतानां तत्र समधिकाभिरुचिदर्शनात् तदस्य प्रयोजनमिति वचनमुचितमेवेत्यर्थः।

नन्वात्मनो नित्यलब्धत्वादलाभाभावात्, अज्ञानात्तदलाभाभिमाने ज्ञानस्यैव तल्लब्धित्वात् ज्ञानोपायानभिधाने कुतो ज्ञानसिद्धिरित्याशङ्क्य द्रष्टृदृश्यविवेकात्मकं ज्ञानोपायमुपदिदिक्षुः आदौ प्रसिद्धमर्थं निर्दिशति—**द्रष्टुरिति**। वदेदत्ताद्दृष्टुः सकाशात् दृश्यो घटोऽन्यो भवतीति कृत्वा लोकव्यवहारमेव निमित्तीकृत्य द्रष्टुः दृश्यविवेकात्मको ज्ञानस्योपचारः प्रसिद्धोऽस्तीत्यर्थः। ननु द्रष्टृशब्देनात्मा उच्यते। स च देहादिष्वन्यतमत्वात् प्रसिद्धिमुपगतो न व्युत्पाद्यतामपेक्षते। तथा चात्मज्ञानमुपदेष्टुमश्लिष्टा प्रवृत्तिरिति मन्वानश्चोदयति—**अथेति**। देहादिव्यतिरिक्तमात्मानं वक्तुं देहस्यानात्मत्वमनुमिनोति—**देहस्तावदिति**। देहविषयाहंप्रत्ययस्य तु गतिरग्रे वक्ष्यते। रूपादिमत्त्वादिपदं यो रूपादिमानुपलभ्यमानश्च सोऽनात्मा यथा घटादिरिति व्याप्तिं व्यनक्ति—**यथेति**।

रूपादिमन्तश्चक्षुरादिकरणैरुपलभ्यन्ते एवं देहोऽपि रूपादिमान् चक्षुरादिकरणैरुपलभ्यते। यथा दाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तो दाहकः प्रकाशकोऽग्निः तथा दृश्यात् देहात् द्रष्टा व्यतिरिक्तः आत्मा सिद्धः। एतस्मादपि कारणात् देहव्यतिरिक्तः आत्मा, स्वापमरणादिदर्शनात्। यस्मिन् काले देहं संव्याप्य वर्तते आत्मा काष्ठादिवत् तदा देहो व्यवहारयोग्यो भवति। यदा देहादपसर्पति तदा देहः काष्ठादिसदृशो भवति। तस्माद्देहव्यतिरिक्त आत्मा सिद्धः।

चक्षुरप्यात्मा न भवति रूपग्रहणसाधनत्वात् प्रदीपवत्। यथा प्रदीपेन करणेन

व्याप्तिः पक्षधर्मतेत्युभयमनुमानाङ्गमङ्गीक्रियते। तत्र व्याप्तिमुक्त्वा पक्षधर्मतां हेतुद्वयस्योपन्यस्यति—**एवमिति**। न चोपलभ्यत्वमात्मन्यपीत्यनैकान्तिकत्वमिति युक्तम्, तस्य वृत्तिव्याप्यत्वेऽपि फलत्वेन फलव्याप्तत्वानभ्युपगमात्; फलव्याप्यत्वस्य च उपलभ्यमानत्वशब्देनाभिलापादित्यवसेयम्। देहस्यानात्मत्वमनुमाय तद्व्यतिरिक्तस्यात्मत्वमनुमातुं कथयति—**यथेति**। यो दाहकः प्रकाशक. वा स दाह्यात्प्रकाश्याच्च व्यतिरिच्यते यथा काष्ठादेरग्निरिति विषयविषयिणोः व्यतिरेकसिद्धिरित्यर्थः। सम्प्रत्यनुमानमाह—**तथेति**। विमतो द्रष्टा दृश्याद्भिद्यते, द्रष्टृत्वात्, देवदत्तवत्। यद्वा देहःस्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वात्, घटवत्। अथ वा देहः स्वव्यतिरिक्तप्रकाशप्रकाश्यः, प्रकाश्यत्वात्, काष्ठादिवत्। आत्मा वा स्वप्रका(शा)श्याद्भिद्यते, प्रकाशकत्वात्, अग्निवदित्यर्थः।

तत्रैवानुमानान्तरमाह—**एतस्मादिति**। तदेव कारणं दर्शयति—**स्वापेति**। स्वापमरणमूर्च्छासु सत्यपि देहे गमनादिव्यवहाराभावात् जागरितादौ च तद्दर्शनात् आगन्तुकव्यापारत्वात् पराधीनमस्य तद्वत्त्वं गम्यते। देहः स्वव्यतिरिक्तव्यापाराधारः, कादाचित्कव्यापारवत्वात्, रथादिवदित्यर्थः। ननु देहस्य स्वसत्ताकाले स्वपरान्यतरव्यवहारव्यभिचारिणो न युक्तमागन्तुकव्यापारत्वमिति हेत्वसिद्धिमाशङ्क्य परिहरति—**यस्मिन्नित्यादिना**। यथा हि काष्ठनिष्ठो वह्निः सर्वतः तद्व्याप्त्या दाहपाकादिव्यवहारयोग्यतामुपगतो दृश्यते न पुनरसौ तत्र सत्तामात्रेण व्यवहारयोग्योऽङ्गीक्रियते तदा काष्ठस्यापि दाहादिव्यवहारयोग्यतोपपद्येत, तथा यत्र जाग्रदवस्थायामात्मा देहव्याप्तिं तस्मिन्नहमभिमानरूपां कृत्वा व्यवतिष्ठते तदा देहः स्वयमभिवदनादिव्यवहारयोग्यः सम्पद्यते। यत्र च स्वापादौ देहादावात्माहमभिमा(नचरीत्याह।) [नं परित्यज्य ब्रह्म ?] रूपतामुपगच्छति तदा देहोऽभिवदनादिव्यवहारयोग्यो न भवति। न हि काष्ठादेः तथाविधव्यवहारयोग्यता उपलभ्यते। यत्तु[तत्तु] देहस्यागन्तुकमेवेति नास्ति हेत्वसिद्धिरित्यर्थः। न चोक्तानामनुमानानां अमानत्वमभिधानीयम्; तत्र हेत्वभिधानानभिधानयोः तदयोगादिति मत्वा प्रगुक्तानामनुमानानां फलमुपसंहरति—**तस्मादिति**। केचित् इन्द्रियाणामात्मत्वम् 'अन्धोऽहम्' इत्यादिप्रत्ययमाश्रित्याश्रयन्ते। तत्र चक्षुषो ममप्रत्ययविषयत्वात् केवले च तस्मिन्नहंप्रत्ययाभावादन्धत्वादिविशिष्टे च तत्र तत्प्रत्ययस्य भ्रमादपि सिद्धेः न तस्यात्मत्वमित्यनुमानेन साधयति—**चक्षुरपीति**। रूपग्रहणं करणसाध्यम् क्रियात्वाच्छिदिक्रियावत् इत्यनुमानात् परिशेषतो रूपोपलब्धिसाधनत्वेन चक्षुः सिध्यतीति हेतुसाधनार्थं रूपग्रहणविशेषणम्। उपकरणेऽपि प्रदीपे साधनशब्दितं करणत्वमात्रमस्तीति मन्वानो दृष्टान्तमाह—**प्रदीपवदिति**। यत्करणं तन्नात्मा यथा प्रदीप इति व्याप्तिं साधयति—**यथेति**। व्याप्तस्यं हेतोरसिद्धिमुद्धर्तुं पक्षधर्मतामाह—

रूपमुपलभ्यते, तथा चक्षुरादिकरणेन रूपमुपलभ्यते। एवमेवेतराण्यपि करणानि। मनोऽप्यात्मा न भवति दृश्यत्वात् करणत्वाच्च प्रदीपवत्। बुद्धिरप्यात्मा न भवति दृश्यत्वात् करणत्वाच्च प्रदीपवदेव। प्राणोऽप्यात्मा न भवति, सुषुप्ते चैतन्याभावात् प्राणस्य, इतरस्मिन् काले भृत्यस्वामिनोरिव सङ्कीर्णयोर्न ज्ञायते कस्येदं चैतन्यमिति। सुषुप्ते तु पुनः विज्ञानरहितः प्राण उपलभ्यते। करणोपरमाद्विज्ञानाभावः प्राणस्येति चेत् न,

---

तथेति। चक्षुषि दर्शितन्यायं श्रोत्रादिष्वतिदिशति—**एवमेवेति**। न हीन्द्रियाणां प्रत्येकमात्मत्वमवकल्पते ममप्रत्ययविरोधात्; अहंप्रत्ययस्य च तेष्वन्यथासिद्धेरुक्तत्वात्। न च ममात्मेतिवत् औपचारिकस्तेषु ममप्रत्ययोऽपीति युक्तम्, मुख्यत्वे बाधकाभावात्; आत्मनि च ममप्रत्ययस्यात्मशब्दविरोधादौपचारिकत्वध्रौव्यात्। न च तेषां तत्र करणत्वेनाङ्गीकृतानामात्मत्वमुपपद्यते, प्रदीपादिष्वात्मत्वादर्शनात्। न च बहुषु तेषु प्रत्यभिज्ञानं प्रकल्पते। न चैकशरीरारूढत्वात्तेषु प्रत्यभिज्ञानमविरुद्धमिति श्रद्धेयम्; एककुम्भारूढेषु चैत्रमैत्रादिषु तदनुपलम्भात्; तस्मान्नेन्द्रियाणामात्मत्वमित्यर्थः।

केचित्तु मनसोऽहंप्रत्ययविषयत्वात् अहंप्रत्ययालम्बनस्य चात्मत्वात् तदेवात्मेति मन्यन्ते। तान्प्रत्याह—**मनोऽपीति**। पूर्ववदहंप्रत्ययस्य ममप्रत्ययप्रहतस्य प्रामाण्यानुपपत्तिरिति भावः। बौद्धास्तु बुद्धिरेवात्मेत्याचक्षते। तान्प्रत्युक्तम्—**बुद्धिरपीति**। सा चेद्दृश्या न सिद्ध्येत्। स्वप्रकाशत्वे तस्या जन्माद्ययोगादविप्रतिपत्तिः; अदृश्यत्वे यथार्थसिद्धिः; तस्याश्च कर्तृत्वे व्यतिरिक्ता बुद्धिः सिद्ध्येत्; कर्तुरतिरिक्तकरणापेक्षत्वात्, चक्षुरादीनां च निश्चायकसाधनकरणव्यतिरेकेण प्रवृत्त्ययोगात्, करणत्वे प्रदीपवदनात्मत्वमविवादमित्यर्थः।

हैरण्यगर्भास्तु प्राणमात्मानं प्रतिपद्यन्ते। तान्प्रत्याह—**प्राणोऽपीति**। तस्यापि ममप्रत्ययविषयत्वेन दृश्यत्वादात्मत्वानुपपत्तिः। "प्राणेन रक्षन्नवरं कुलायम्" (बृ० ४-३-१२) इति करणत्वाङ्गीकरणाच्च श्रुतिविरोधे चागमस्याप्रामाण्यादित्यर्थः। प्राणस्यानात्मत्वे हेत्वन्तरमाह—**सुषुप्त इति**। न हि तस्यामवस्थायां प्राणे व्यापारवति भात्यपि चैतन्यमुपलभ्यते; न च तस्मिन्भात्येव चैतन्यानुपलब्धितस्तस्यात्मत्वे युक्ता; तेन नासावात्मेत्यर्थः। ननु सुषुप्तविशेषणादवस्थान्तरे प्राणस्य चैतन्यमनुमतमिति प्रतिभाति। दृश्यते हि दक्षिणेनाक्ष्णा न पश्यतीत्युक्ते वामेनाक्ष्णा पश्यतीति। तत्राह—**इतरस्मिन्निति**। जागरितादौ चैतन्याधारे सन्देहसम्भवात् असन्देहार्थं सुषुप्तग्रहणम्। दृश्यते हि खल्वेकस्मिन्नेव प्रदेशविशेषे समवेतयोर्भृत्यस्वामिनोः नानाविधपदातिवाजिगजच्छत्रचामरपताकादिपरिवारपरिवृतयोरयं नरपतिरिति निर्धारणासिद्धौ कस्येदमिति सन्दिह्यमानं; तथेहापि संशयसम्भवाद्युक्तमसन्देहार्थं विशेषणम्; न पुनरवस्थान्तरे चैतन्याद्यनुज्ञानार्थमित्यर्थः। ननु सुषुप्तिविशेषणे कथं प्राणस्य चैतन्यराहित्यं निर्धार्यते; तत्राह—**सुषुप्ते त्विति**। तदापि प्राणोपलम्भेऽपि चैतन्यानुपलम्भात् तस्याचेतनत्वं निश्चितमित्यर्थः। चैतन्यस्यैव प्राणस्य सुषुप्तौ विज्ञानहेतूनां श्रोत्रनेत्रादिकरणानामुपसंहाराद्विज्ञानाभावो न त्वचेतनत्वादिति शङ्कते—**करणेति**। यदि करणादि प्रति प्राणः स्वामी स्यात्तदा तस्मिन् तद्व्यापाराविष्टे भृत्यस्थानीयानां करणानामुपरमो नोपपद्येत। न हि नरपतौ परेण नरपतिना सह सन्धिविग्रहादौ व्याप्रियमाणे तदीयपुरुषा निर्व्यापारा निर्वृण्वन्ति। ततश्च चेतनस्यैव प्राणस्य करणोपरमाधीनं विज्ञानाभाववचनमनुचितमिति परिहरति—**नेत्यादिना**।

स्वामिनि व्याप्रियमाणे करणोपरमाभावात् राजपुरुषवत्। अत एव न प्राणस्यैतानि करणानि; यः स्वापेनोपरतः तस्यैतानि करणानि। यदासौ बहिर्निर्गम्य करणान्यधितिष्ठति तदा सर्वाणि करणानि स्वविषयेषु वर्तन्ते। यदा जाग्रत्स्थितिनिमित्तं कर्मोद्भूतं भवति तदा स्वापादुपरतो भवति तत्क्षये सर्वाणि करणानि गृहीत्वा बुद्ध्युपाधिसम्पर्कजनितविज्ञानेन स्वप्नं सुषुप्तं वा गच्छति। एवं स्थानत्रयमनवरतं गच्छति। कर्मनिमित्तं चेदं गमनम्। स्वप्नजागरिते गच्छति पुनः स्थानद्वयनिमित्तकर्मोद्भूतश्रमापनयनाय सुषुप्तमपि गच्छति।

सुषुप्ते करणोपरमात् प्राणस्य चानुपरतत्वात् न तस्य करणस्वामित्वमित्याह—**अत एवेति**। तर्हि करणानां स्वतन्त्रत्वासम्भवात् करणस्वामित्वमेष्टव्यमित्याशङ्क्याह—**य स्वापेनेति**। करणात्मना बुद्धेरवस्थानं स्वापोऽभिलप्यते तेन उपरतः दर्शनस्पर्शनादिविशेषविज्ञानविरही योऽवतिष्ठते तस्य विज्ञानात्मनः श्रोत्रादीनि करणानि न स्वतन्त्राणि करणत्वव्याघातात्। तथा च विज्ञानकरणस्वामीत्यर्थः। स्वापेनोपरतस्य करणस्वामित्वमित्यत्रान्वयव्यतिरेकौ प्रमाणयन्नादावन्वयमाचष्टे—**यदेति**। सुषुप्तौ हि पुरुषो यस्मिन्काले करणात्मकमन्तः करणं ततोऽपकृष्य बाह्यविषयाभिमुखमापाद्य स्वमपि तद्द्वारा बहिर्मुखो भूत्वा बुद्धिद्वारेण तत्तद्विषयाभिमुखानि श्रोत्रादीनि करणान्यधिष्ठाय तिष्ठति। तस्मिन् करणानि सर्वाणि प्रतिनियतेषु शब्दादिषु प्रवृत्तानि तत्तदाकारान् बुद्धिपरिणामान् दर्शनश्रवणादिशब्दितान् उत्पाद्य पर्यवस्यन्ति। तथा चात्माधिष्ठितबुद्ध्यधिष्ठितानि करणानि श्रवणादिहेतवो भविष्यन्तीत्यात्मा करणस्वामी सिद्ध्यतीत्यर्थः। कदा पुनरात्मा बहिर्निर्गत्य बुद्धिद्वारा करणान्यधितिष्ठतीति तत्राह—**यदेति**। यदैतस्मिन् काले जागरितप्रापकं धर्माधर्माख्यमुद्भवति तदा पुरुषः सुषुप्तरूपात् प्रच्युतो भवतीत्यर्थः। आत्मनि सुषुप्तरूपं परित्यज्य करणान्यधिष्ठाय व्यापारायोन्मुखीभूते तानि प्रवृत्तिभाञ्जि भवन्तीत्यन्वयो दर्शितः। सम्प्रति व्यतिरेकं दर्शयति—**तत्क्षय इति**। तस्य जागरितस्य तद्धेतुकर्मणः तन्निमित्तोभयविधकरणाधिष्ठातृत्वस्य च क्षये सति जागरितवासनावासितत्वेन चित्रपटवदवस्थितबुद्धिरूपोपाधिसम्पर्कवशादुत्पन्नेन बुद्ध्यवच्छिन्नचैतन्याभासलक्षणेन विज्ञानेन करणभूतेन सर्वाणि करणानि गृहीत्वा व्यापाररहितानि कृत्वा स्वप्नं गच्छति। तथैवाज्ञानोपाधिकेन चैतन्याभासात्मकेन विज्ञानेन बुद्ध्युपाधिकमपि विज्ञानमुपसंहृत्य सुषुप्तं वा अयमात्मा प्रतिपद्यते "तदेषां प्राणानां विज्ञानेन विज्ञानमादाय" (बृ० २-१-१७) इत्यादिश्रुतेः। क्रमनियमव्यावृत्त्यर्थो वाशब्दः। तथा च करणे स्वात्मनोऽधिष्ठातृत्वाभावे तेषां[न]प्रवृत्तिरित्यर्थः। मोक्षात्प्रागवस्थायां सदैवायमात्मा स्थानत्रयं क्रमाक्रमाभ्यां गच्छतीत्युपसंहरति—**एवमिति**। किमर्थमस्य स्थानत्रयस्य गमनं किन्निमित्तं चेति शङ्कमानं प्रत्याह—**कर्मेति**। चशब्दात् मिथ्याज्ञानकामादि कथ्यते। एतेन कर्मफलोपभोगार्थं गमनमित्यर्थादुक्तमित्यवसेयम्। ननु "अनन्वागतं पुण्येनानन्वागतं पापेन" (बृ० ४-३-२२) इत्यादिश्रुत्या सुषुप्ते कर्मतत्फलाभावोऽभिलप्यते। तथा च कथं कर्मनिमित्तं स्थानत्रयगमनमुक्तमिति, तत्राह—**स्वप्नेति**। कथं तर्हि निमित्तमन्तरेण सुषुप्तं प्रतिपद्यते ? न हि तत्र कर्मनिमित्तमस्ति; तत्राह—**पुनरिति**। यथा स्वप्नजागरितानुकूलकर्मबलात् तत्फलोपभोगार्थं स्थानद्वयं गच्छति तथा तदुपभोगायतनासादितश्रमसम्भवात् तन्निवृत्तये सुषुप्तमपि प्राप्नोति। न च तत्र किञ्चिदपि कर्मनिमित्तमस्ति, अनन्वागतवचनविरोधात्। न च विषयविषय्याकारेण स्फुटतर-

प्राणोऽपि तत्कर्मवशादेव शरीरं परिपालयन् वर्तते स्वप्नसुषुप्त्योर्मृतभ्रान्तिपरिहाराय। अहमित्यपि चात्मा न भवति सर्वैरात्मत्वेनाभिमतोऽपि प्रत्यगात्मविवेकरहितैः, दृश्यत्वात् घटादिवत्, व्यभिचारात्, सुखदुःखाद्यनेकसंसारधर्मविशिष्टत्वाच्च, कृशस्थूलादिधर्मविशिष्ट-देहवत्। यद्येवं देहादिष्वनात्मसु आत्मत्वाशङ्का कुत इति चेत्। द्रष्टुर्दृश्यविवेकाभावात्।

॥ इत्यात्मज्ञाने प्रथमः पटलः ॥

कर्मतत्फलाभावविषयमेतदिति वाच्यम्, नियामकाभावात्। न हि सुषुप्ते कर्म वा तत्फलं वा प्रमाणतो दृश्यते। न च कारणाभावात् तत्प्राप्तेरनुपपत्तिः, अवस्थाद्वयसञ्चारसञ्जातश्रमवशादुपाधि-भूतबीजभावप्राप्तेरविरोधात्। अज्ञातब्रह्मप्राप्तेश्च स्वाभाविकत्वादिति भावः। ननु प्राणस्य करणान्तर्भावात् तेषूपरतेषु प्राणोऽपि(त)कस्मान्नोपरमते? तथा च स्वापादेः करणावस्थातो विशेषो न स्यात् इत्यत आह—**प्राणोऽपीति**। चेतनस्य हि कर्मफलोपभोगाय शरीरमारब्धम्। तस्मात्प्राणाप-सर्पणे स्वापादौ तस्य श्ववायसादि(तिरिति)भिस्ततोऽपकर्षणे कर्मफलोपभोगायोगात्(त्मको)मृतोऽय-मिति भ्रा(न्तौ त)न्तत्त्वपरिहारद्वारा शरीरपरिपालनाय प्राणस्य प्रवृत्तत्वात् उपरतेष्वपि करणेषु नासावुपरन्तुमर्हति; न च प्राणस्य करणान्तर्भावः शङ्कितुं शक्यते; "न वायुक्रिये पृथगुपदेशात्" (ब्र० सू० २-४-९) इति न्यायविरोधादित्यर्थः। दृश्यत्वादकरणत्वादचेतनोपभोगोपकरणत्वाच्च प्राणो नात्मेत्युक्तम्।

अपरे पुनः 'अहं जानामि' इत्यहङ्कारे निरुपचरितमहंप्रत्ययमुपलभमानाः तथैवात्मत्व-मभ्युपयन्ति सर्वे चाहंप्रत्ययालम्बनमहङ्कारमेवात्मानमनुमन्यन्ते। तत्राह—**अहमित्यपीति**। ये हि प्रत्यगात्मानमहङ्कारसाक्षिणमहमित्यत्रानिर्दंचिद्धातुमितरस्मादिदमं(च्छात्म्या)शादहङ्कारान्निकृष्य निश्चेतुं नोत्सहन्ते तैः सर्वैर्लौकिकैर्वादिभिश्चात्मत्वेनाभिमतोऽपि नासावात्मा भवितुमर्हतीत्यत्र हेतु-माह—**दृश्यत्वादिति**। आत्मनि च दृश्यत्वं पुरस्तादेव निरस्तम्। विमतो नात्मा व्यभिचारित्वात्, कुलालादिवत्। प्रसिद्धं चात्मनि सुषुप्त्यवस्थायामनुभूयमाने तदनुभवितरि नाहमुल्लेखोऽस्ति इत्यहमो व्यभिचारित्वमिति मत्वाऽऽह—**व्यभिचारादिति**। इतश्चाहङ्कारो नात्मा, कादाचित्कधर्मवत्वात् धर्मत्वाद्वा सम्प्रतिपन्नवदित्याह—**सुखेति**। सुखदुःखरागद्वेषादिभिः अनेकैस्संसारात्मभिः धर्मैरहं सुखीत्यादिना विशिष्टत्वमहमो दृष्टम्। अतश्च स नासावात्मा इति निश्चीयते, आत्मनः सर्वधर्म-राहित्यश्रवणात्। न हि देहस्य कार्श्यकार्ष्ण्यस्थौल्यादिधर्मविशिष्टस्य आत्मतेत्युपदिष्टम्। भूमविद्यायां अहङ्कारादेशात्पृथगात्मादेशानुक्रमणादहङ्कारस्यानात्मत्वमवगमितम्। तस्माद्देहादीनामहङ्कार-पर्यन्तानामनात्मत्वेन आत्माविद्याकल्पितत्वं सिद्धमित्यर्थः। देहादीनामनात्मत्वानुमानानि तेष्वहं-प्रत्ययप्रतिहतत्वान्न प्रामाण्यं प्रतिपत्तुं प्रभवन्तीति प्रत्यवतिष्ठते—**यद्येवमिति**। देहादयो दृश्यास्त-द्व्यतिरिक्तो द्रष्टेति विवेकानुदयादयसि दहनव्याप्ते दहतीति प्रत्ययवद्देहादिषु चैतन्यव्याप्तेषु अहं-प्रत्ययसम्भवात् न विरुद्धानि प्रागुक्तान्यनुमानानीति परिहरति—**द्रष्टुरिति**।

देहादेरहमन्तस्य श्रुतिन्यायानुराधतः।
धियोऽन्यथात्वादात्मत्वभानादज्ञानकल्पना॥

॥ इत्यात्मज्ञानटीकायां प्रथमः पटलः ॥

अथ द्वितीयः पटलः

अथ स आत्मा क इति ? उक्तेभ्यः सर्वेभ्यो व्यतिरिक्तेभ्यः अन्तरतमः आकाशवत् सर्वगतः सूक्ष्मो नित्यो निरवयवो निर्गुणो निरञ्जनो गमनागमनादिरहितोऽहङ्कारममकारेच्छाप्रयत्नरहितः स्वयंज्योतिःस्वभावः अग्न्युष्णवत् सवितृप्रकाशवच्च, आकाशादिभूतरहितः बुद्ध्यादिकरणरहितः प्राणादिवायुभेदरहितः सत्वादिगुणरहितः अशनायापिपासाशोकमोहजरामरणप्राणबुद्धिशरीरधर्मरहितो यः सर्वप्राणिहृदि स्थितः सर्वबुद्धेर्द्रष्टा स आत्मेति ।

अथ द्वितीयः पटलः

देहादीनामनात्मत्वे आत्मा तद्व्यतिरिक्तः पृथङ्नासीत् । इदानीं तमेव प्रतिपादयितुं तस्याप्रसिद्धत्वान्न प्रतिपादनं सुकरमित्याक्षिपति—**अथेति** । ये तावदात्मनो व्यतिरिक्ता देहादयोऽहङ्कारान्ता दर्शिताः, तेभ्यः सर्वेभ्योऽन्तरतमोऽयमात्मा तस्य सर्वान्तरत्वश्रुतेरित्युत्तरमाह—**उक्तेभ्य इति** । तर्हि तस्य बुद्ध्यादिवदन्तरवस्थितस्य परिच्छिन्नत्वं प्राप्तम्; नेत्याह—**आकाशवदिति** । "स पर्यगात्" इत्यादिश्रुतेः न तस्य परिच्छिन्नत्वाशङ्का सम्भवति, सावयवत्वानात्मत्वादिप्रसक्त्या च तदनुपपत्तिरित्यर्थः । सर्वकरणदेशेष्वपि विद्यमानत्वात् तैरस्य कस्मादुपलम्भो न भवेदित्याशङ्क्य "सूक्ष्माच्च सूक्ष्मतरम्" इत्यादिश्रुतिमाश्रित्योभयेन्द्रियागोचरत्वमुक्तम्—**सूक्ष्म इति** ।

वैनाशिकास्तु प्रतिक्षणविनाशित्वमात्मनो मन्यन्ते । तान्प्रत्यबाधितप्रत्यभिज्ञया स्थायित्वमास्थायोक्तम्—**नित्य इति** । दिगम्बरास्तु आत्मानं नित्यमपि सावयवं सङ्गिरन्ते । तदयुक्तम्; सावयवस्य घटादिवदनित्यत्वप्रसङ्गात् इत्याह—**निरवयव इति** । वैशेषिकादयस्तु बुद्ध्यादिगुणाधिकरणमात्मानमातिष्ठन्ते; तन्न; 'केवलो निर्गुणश्च' इति श्रुतेः अन्तःकरणस्य तद्धर्मित्वश्रवणादित्याह—**निर्गुण इति** । आत्मनः स्वतो नाशाभावेऽपि हेतुपरागान्नाशो भविष्यतीत्यतो निर्गुणत्वेऽपि सदोषत्वमित्याशङ्क्यासङ्गागममङ्गीकृत्य सङ्गिरन्ते—**निरञ्जन इति** । तस्य गमनागमनादिक्रियाशक्तिमत्त्वमाङ्क्य निष्क्रियत्वश्रुतिमाश्रित्याह—**गमनेति** । केचित्पुनरहङ्कारादीनामात्मधर्मत्वमङ्गीकुर्वते । तान्प्रत्यस्थूलादिश्रुतिमनुसृत्याह—**अहंकारेति** । केचित्तु जडत्वमात्मनो मन्यन्ते । तान् प्रति "अत्रायं पुरुषः स्वयंज्योतिः" इत्यादिश्रुत्या परिहरति—**स्वयमिति** । यथाग्नेरुष्णस्पर्शस्वभावोऽभिमतः, यथा च प्रकाशः सवितुः स्वभावःस्वीकृतः तथात्मा स्वयमेव ज्योतिःस्वभावोऽभ्युपगन्तव्यः, श्रुतेरित्यर्थः । पृथिवीमयादिश्रुतेरात्मनो भूतसम्बन्धमाशङ्क्यानाकाशमित्यादिश्रुतेरेवमित्याह—**आकाशादीति** । पृथिवीमयादिश्रुतिस्तु सोपाधिकविषयत्वान्न प्रकृतप्रतिकूलेति भावः । "अवागमनोऽचक्षुरश्रोत्रम्" इत्यादिश्रुत्या करणसम्बन्धं धुनीते—**बुद्ध्यादीति** । निर्गुणश्रुतिमेवानुसृत्य गुणत्रयसम्बन्धं प्रत्यादिशति—**सत्वादीति** । "अप्राणो ह्यमनाः" इत्यादिश्रुत्या प्राणसम्बन्धोऽपि नास्तीत्याह—**प्राणादीति** । अशनायादिधर्मत्वात् आत्मनो न प्राणादिसम्बन्धवैधुर्यमित्याशङ्क्य "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" इति श्रुत्योत्तरमाह—**अशनायेति** । यथोक्तस्यात्मनो बुद्धिस्थत्वेन सन्निहिततरत्वं "स वा एष आत्मा हृदि" इत्यादिश्रुत्या दर्शयति—**यस्सर्वेति** । "एष हि द्रष्टा" इत्यादिश्रुत्या द्रष्ट्रात्मना हृदयेऽवस्थानं कथयति—**सर्वबुद्धेरिति** । यस्य प्रतिपादनाय प्रक्र(न्तः)मः कृतः सोऽयमात्मा कूटस्थचिद्धातुः उपपादितोऽस्माभिरित्युपसंहरति—**इतीति** । ननु स्वे महिम्नीति

सर्वबुद्धिविशिष्टतयोपलभ्यमानत्वात् सर्वप्राणिहृदि स्थितः इत्युच्यते, न पुनःसर्वगतस्य निरवयवस्यात्मनो बुद्ध्याधारत्वं सम्भवति। यथाऽऽकाशस्य न कश्चित्पदार्थ आधारो भवति।

कथमहङ्कारममकारेच्छाप्रयत्नरहितस्य आत्मनो द्रष्टृत्वमिति ? द्रष्टृत्वं नाम दर्शनक्रियां करोतीत्यर्थः। यदि दर्शनक्रियां करोति द्रष्टा आत्मा तदा अशेषबुद्धिद्रष्टृत्वं नोपपद्यते। विरोधात्। यथा देवदत्तस्य क्रमानुरोधेन युतायुतसिद्धकरणादिसव्यपेक्षया गमनादिक्रियाकर्तृत्वं, नोभयप्रकारकरणसम्बन्धरहितस्याविक्रियस्य दृग्रूपस्यात्मनो दर्शनादिक्रिया स्यात्। यस्य तु पुनः करणादिसव्यपेक्षद्रष्टृत्वं तस्याल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वं अद्रष्टृत्वं अन्यथाद्रष्टृत्वञ्च स्यात् परिणामित्वात्, करणादिसव्यपेक्षत्वाच्च चित्तवत्, नैवमात्मनोऽल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वं अद्रष्टृत्वं अन्यथाद्रष्टृत्वञ्चेष्यते। विक्रिया

श्रुतेः स्वमहिमप्रतिष्ठस्य कथं सर्वहृदयस्थत्वं,] तत्राह—**सर्वबुद्धीति**। सर्वहृदयस्थबुद्धिविशिष्टतया तत्साक्षित्वेन स्फुरणादौपचारिकमात्मनो हृदि स्थितत्वमिति स्वमहिमप्रतिष्ठितत्वमविरुद्धमित्यर्थः। सम्भवति मुख्ये हृदिस्थितत्वे किमित्यौपचारिकं तदुक्तमित्याशङ्क्य श्रुतिसमधिगतस्वमहिमप्रतिष्ठितत्वविरोधान्नैवमित्याह—**न पुनरिति**। न हि हृदयप्रतिष्ठबुद्ध्याधारत्वमात्मनो मुख्यमाख्यातुं युक्तम्, सर्वगतत्वात्, द्रव्यत्वे सति निरवयवत्वाद्वा गगनवदित्यर्थः। तत्र दृष्टान्तं स्पष्टयति—**यथेति**। यत्पुनरुक्तम्—आत्मा प्रयत्नादिरहितः सर्वबुद्धेर्द्रष्टेति, तत्र चोदयति—**कथमिति**। प्रयत्नादिरहितस्य द्रष्टृत्वे काऽनुपपत्तिरित्याशङ्क्याह—**द्रष्टृत्वमिति**। तद्धि दर्शनक्रियाकर्तृत्वम्; कर्तृत्वं च कारकाप्रयोज्यत्वे सति कारकप्रयोक्तृत्वम्; ततश्च कर्ता प्रयत्नरहितश्चेति विरुद्धमित्यर्थः। दर्शनक्रियाकर्तृत्वं द्रष्टृत्वमित्यत्रैव दोषान्तरमाह—**यदीति**। दर्शनक्रियाकर्तृत्वपक्षे युगपदशेषबुद्धितद्वृत्तिद्रष्टृत्वानुपपत्तिरित्यत्र हेतुमाह—**विरोधादिति**। निरवयवस्यात्मनोऽपर्यायेण विरुद्धानेकपरिणामायोगादित्यर्थः। यदि पुनरात्मा निरवयवोऽपि परिणमते तदा क्रमेणैव परिणमेत्। परिणामिनो निरवयवस्य दुरुपपादनत्वादिति मत्वा परिणामे दृष्टान्तमाह—**यथेति**। [युत]सिद्धं करणं कुठारादि। तद्धि देवदत्तात्पृथगेव लब्धात्मकम्। अयुतसिद्धं करणं करचरणादि। न हि तस्य देवदत्तमनपेक्ष्य स्वतन्त्रतया सिद्धिरस्ति। तदुभयापेक्षया क्रमानुरोधेन तद्वतो गमनभेदादिक्रियासु कर्तृत्वं दृष्टम्। दृश्यते हि कदाचित् पृथगेव सिद्धकठोरकुठाराद्यपेक्षया काष्ठादिहेतुत्वम्; कदाचिच्चापृथगेव सिद्धचरणाद्यपेक्षया गमनादिकर्तृत्वम्; न पुनरेकदैवोभयविधकरणापेक्षया नानाविधक्रियासु तस्य कर्तृत्वधीरित्यर्थः। अस्तु तर्हि प्रत्यगात्मनोऽपि विविधकरणसव्यपेक्षस्य दर्शनादिक्रियासु क्रमेण कर्तृत्वं, नेत्याह—**नोभयेति**। प्रत्यगात्मनोऽपि चिन्मात्रत्वेन कूटस्थासङ्गस्वभावस्य विविधकरणसम्बन्धायोगान्न क्रमद्रष्टृत्वोपपत्तिरित्यर्थः। यदि तस्यापि क्रियावत्त्वं करणसापेक्षत्वं चेष्यते, तत्राह—**यस्येति**। यथा चित्तस्य विक्रियावत्त्वात् करणापेक्षत्वाच्च कतिपयद्रष्टृत्वादि दृष्टं तथाऽऽत्मनोऽपि विक्रियादिमत्त्वे कतिपयद्रष्टृत्वादि दुर्वारमापतेदित्यर्थः। करणादीत्यादिपदमर्थादिसंग्रहार्थम्। नन्वात्मनोऽल्पविषयद्रष्टृत्वादि नानिष्टं तथैव द्रष्टृत्वादिति तन्न, अनङ्गीकारादित्याह—**नैवमिति**। अनङ्गीकारे हेतुमाह—**विक्रियेति**। "निष्कलं निष्क्रियं शान्तम्" इत्यादिशास्त्रान्न तस्य विक्रिया स्वीक्रियामर्हति। न चाविक्रियस्य द्रष्टृत्वमेष्टुं शक्यते; तस्य च कार्यकरणं निमित्तनिरपेक्ष(त्व)म्,

अभावात् कारणादिनिमित्तनिरपेक्षत्वाच्च चित्तप्रदीपवदेव। कथं बुद्ध्यात्मनोः संयोग इति। उच्यते। सूक्ष्मत्वात् स्वच्छत्वान्निरवयवत्वाच्चोभयोः। तत्र शुद्धप्रकाशस्वरूप आत्मा स्फटिकमणिवच्च बुद्धिरप्रकाशस्वरूपा सती प्रकाशसन्निधिमात्रेण प्रकाशस्वरूपा च भवतीति बुद्ध्यात्मनोः संयोग इत्युच्यते, न तु पुनरमूर्तयोर्बुद्ध्यात्मनोः जतुकाष्ठवत् संश्लेषः सम्भवति। अनन्यापेक्षत्वाच्च द्रष्टृत्वस्य। यथाऽहङ्कारममकारेच्छाप्रयत्नरहितस्य प्रकाशस्वरूपसन्निधिसत्तामात्रेण वर्तमानस्यादित्यस्य प्रकाशकत्वमध्यारोप्यते अन्यैः प्रकाश्याभि-

---

न तस्य कार्यं करणं चेत्यादि श्रुतेरवगम्यते। न च तस्याल्पविषयद्रष्टृत्वादि सिद्ध्यति "यः सर्वज्ञः सर्ववित्" इति श्रुतेरित्यर्थः। तत्र व्यतिरेकदृष्टान्तमाह—**चित्तेति**। यथा चित्ताख्यस्य प्रदीपस्य क्रियावत्वात् करणापेक्षत्वाच्च कतिपयद्रष्टृत्वमिष्टं न तथात्मनः सम्भवतीत्यर्थः। आत्मनो निरवयवत्वात् करणाद्यपेक्षत्वात् अहङ्कारादिरहितत्वाच्च क्रमाक्रमाभ्यां द्रष्टृत्वादित्याक्षेपो दर्शितः। सम्प्रति सर्वबुद्धिविशिष्टतयोपलभ्यमानत्वादित्यत्र बुद्ध्यात्मनोर्विशेषणविशेष्यभावस्य मूलत्वेन संयोगमुक्तमाक्षिपत्ति—**कथमिति**। न हि मूर्तामूर्तयोः बुद्ध्यात्मनोः जतुकाष्ठयोरिव संयोगः सङ्गच्छते। न च कार्यकरणद्रव्ययोः सम्बन्धान्तरं विशेषणविशेष्यत्वानुकूल्यमवलम्बते, दण्डदेवदत्तयोरदर्शनादित्यर्थः। आक्षेपद्वये प्राप्ते प्रथमं द्वितीयमाक्षेपं परिहरति—**उच्यत इति**। बुद्ध्यात्मनोर्वस्तुतः संयोगासम्भवेऽपि सम्भवत्येवाध्यासिकः सम्बन्ध इत्यर्थः। उक्तं सम्बन्धमेव व्यक्तीकर्तुं बुद्ध्यात्मनोः सादृश्यं दर्शयति—**सूक्ष्मत्वादिति**। अस्ति हि बुद्ध्यात्मनोरुभयविधेन्द्रियागोचरत्वम्; अस्ति च स्फटिकमणिवदुभयोः अतिस्वच्छत्वमात्मनश्च निरवयवत्वमविवादम्। बुद्धेस्तु सावयवत्वेऽपि घटादिवैलक्षण्यात् (तदुक्तमस्तयो)तयोरस्ति सम्बन्धयोग्यतेत्यर्थः। तथापि नासङ्गस्यात्मनो बुद्ध्या सह सम्बन्धो वास्तवः सिद्ध्यतीत्यभिसन्धाय प्रागुक्तं बुद्ध्यात्मनोराध्यासिकं सम्बन्धं प्रकटयति—**तत्रेत्यादिना**। तयोः सादृश्ये सति आत्मनः शुद्धचितोऽजडत्वात् बुद्धेश्च स्फटिकवदतिस्वच्छत्वेऽपि जडत्वादजडात्मव्याप्त्या प्रकाशव्याप्तेरध्याससिद्धा तयोः सङ्गतिरित्यर्थः। यथा जतुकाष्ठयोरग्निसंयोगद्वारा वस्तुसंश्लेषोऽस्ति न तथा बुद्ध्यात्मनोः मूर्तामूर्तयोः वास्तवः सम्बन्धः सेद्धुमर्हति मिथो विरुद्धत्वादिति व्यावर्त्यं कीर्तयति—**न पुनरिति**। अमूर्तयोः मूर्तामूर्तयोरित्यर्थः। बुद्ध्यात्मनोः सम्बन्धाक्षेपं परिहृत्यात्मनो द्रष्टृत्वाक्षेपं परिहरति—**अनन्यापेक्षत्वादिति**। अशेषबुद्धितद्वृत्तिसाधकत्वं कूटस्थचिन्मात्रत्वमात्मद्रष्टृत्वमिष्टम, न तु दर्शनक्रियाकर्तृत्वम्; अतो द्रष्टृत्वस्यान्यत्राकरणप्रयत्नादौ निरपेक्षत्वादिति। अन्यथा द्रष्टृत्वादेश्चात्मनि नित्यज्ञप्तिस्वभावे सर्वज्ञे सम्भावयितुमशक्यत्वान्न द्रष्टृत्वाक्षेपः सम्भवतीत्यर्थः। कथं पुनस्तृजन्तेन द्रष्टृशब्देन कर्तृवाचिना प्रयत्नादिनिरपेक्षकूटस्थचिन्मात्रत्वं विवक्षितमित्याशङ्क्य दृष्टान्तमाह—**यथेति**। आदित्यस्य हि करणप्रयत्नादौ निरपेक्षस्य विक्रियारहितेन प्रकाशेन प्रकाश्येपु विषयेषु सन्निधिमात्रेण प्रकाशकत्वं प्रतिपन्नम्। प्रयत्नादिद्वारा तस्य प्रकाशस्वभावस्य प्रकाशकत्वायोगादित्यर्थः। दृष्टान्तमुपसंहरति—**एवमिति**। पूर्वोक्तेन प्रकारेण प्रकाशस्वभावस्य प्रकाश्येष्वर्थेषु सन्निधानतावन्मात्रे वर्तमानो यस्सविता तस्य प्रकाशकत्वं प्रकाश्यार्थाभिव्यक्तिमपेक्ष्य द्रष्टृभिरारोप्यते। मुख्यवृत्त्या प्रकाशकर्तृत्वस्य प्रकाशरूपे तस्मिन्नसम्भवादित्यर्थः। उक्तदृष्टान्तानुसारेणात्मनोऽपि प्रयत्नादिशून्यस्यं नित्यचैतन्यस्वभावस्य तेनैव स्वरूपभूतेन चैतन्येन बुद्धितद्वृत्तिसाक्षिणो द्रष्टृत्वं दृश्यबुद्ध्याद्यभिव्यक्त्यपेक्षया उपचर्यते। दृग्रूप-

व्यक्त्यपेक्षया। एवमेव सर्वविक्रियारहितस्यात्मनो दृग्रूपस्य चैतन्यस्वरूपेणाव्यतिरिक्तेन सर्वप्रत्ययसाक्षिणो द्रष्टृत्वं उपचर्यते दृश्याभिव्यक्त्यपेक्षया। अन्यथा द्रष्टृत्वाभावात्तस्य।

कथं सर्वविक्रियाविशेषरहितस्यात्मनः कर्तृत्वमिति। उच्यते। भ्रामकवत्। यथा भ्रामकः स्वरूपसन्निधिसत्तामात्रेण लोहस्य प्रेरको भवति एवमेव सर्वविक्रियाविशेषरहितोऽप्यात्मा कारकावभासको भवति। तत्र कारकावभासकत्वं नाम—बुद्ध्यादीनि करणानि कारकाण्युच्यन्ते। तानि चैतन्यावभासितानि स्वविषयेषु प्रवर्तन्ते। तत्रैवं सति सर्वविक्रियाविशेषरहितस्यात्मनः कर्तृत्वमुपचर्यते। एवमात्मानं कथं बुद्ध्या विजानीयादिति। तन्न शक्यते वक्तुं बुद्धेरवभासकत्वात्, आदित्यज्योतिरिव यथा आदित्यो रूपेण न प्रकाश्यते एवमात्मा न दृश्यते बुद्ध्या? एतस्मादप्यात्मा न दृश्यते बुद्ध्या, बुद्धेः

स्यात्मनो दर्शनक्रियाकर्तृत्वलक्षणद्रष्टृत्वासम्भवादित्युदाहरणनिष्ठमर्थं दार्ष्टान्तिके योजयति—**एवमेवेति**।

आत्मनः सर्वविक्रियाविशेषविरहित्वेन कूटस्थद्रष्टृत्वं चेत् "कर्ता शास्त्रार्थवत्त्वात्" इत्यत्र कर्तृत्वं तस्योक्तमयुक्तमापतेदिति शङ्कते—**कथमिति**। भ्रामकमणेः सन्निधिमात्रेण लोहप्रेरकत्ववदात्मनः विकारमन्तरेण सन्निधिमात्रेण कारकावभासकत्वं कर्तृत्वम्; तदिदमौपचारिकं कर्तृत्वमुपेत्य "यथा च तक्षोभयथा" इति न्यायेन परिहरति—**उच्यत इति**। दृष्टान्तं विवृणोति—**यथेति**। दृष्टान्तनिमित्तमर्थं दार्ष्टान्तिके निवेशयति—**एवमेवेति**। भ्रामकस्य लोहप्रेरकत्वे सन्निधिविशेषवदात्मनि कर्तृत्वोपचारे किं निमित्तमित्याशङ्क्याह—**तत्रेति**। आत्मनि कारकेषु यदवभासकत्वं तद्धि तस्मिन् कर्तृत्वोपचारे निमित्तमित्यर्थः। उक्तमेव प्रपञ्चयन् प्रथमं कारकाणि व्याकरोति—**बुद्ध्यादीनीति**। क्रियां कुर्वत् कारणं कारकं बुद्ध्यादीनि च तत्तन्नानाविधक्रियाकर्तृत्वाद्भवन्ति कारकाणीत्यर्थः। तेषां जडत्वेन स्वतो भानाभावात् चैतन्यसन्निधिमात्रेण भानभाजिनां प्रत्येकं विषयेषु प्रवृत्तिशक्तिः भवतीत्याह—**तानीति**। कारकवर्गे चैतन्यसन्निधानादेव भासमाने प्रवृत्तिशक्तिर्भागिनी। एवं सत्यात्मनो निर्विकारस्यैव कर्तृत्वमध्यारोप्यते। दृश्यते हि सन्निधानमात्रेण लोहप्रवृत्तौ भ्रामकस्य प्रेरकत्वारोपणमिति फलितमाह—**तत्रेति**। आत्मनः सर्वविक्रियाविशेषरहितत्वे 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुत्याऽस्य बुद्धिदृश्यत्वमनुपपन्नं स्यादिति चोदयति—**एवमिति**। श्रुतिविरोधो बुद्धिविषयत्वाभावे सत्यात्मनश्चोद्यते, किं वा तस्य बुद्धिविषयत्वं साध्यते? नाद्य इत्याह—**करणेति**। अद्वितीयात्माकारेण जायमानबुद्धिपरिणामस्याकारसमर्पकत्वात्, तज्जन्यस्फुरणातिशयाभावेऽपि तदधीनाज्ञाननिवृत्ति(मतश्चिदा)मत्या बुद्ध्या दृश्यत्वोपचारेण न श्रुतिविरोधचोद्यमवतरतीत्यर्थः। द्वितीयं दूषयति—**बुद्धेरिति**। न बुद्ध्या विषयीकरणमिति शेषः। तत्र दृष्टान्तमाह—**आदित्येति**। दार्ष्टान्तिकेन सह दृष्टान्तं प्रपञ्चयति—**यथेत्यादिना**। आत्मा बुद्धिप्रकाश्यो न भवति, तदवभासकत्वात्; यो यदवभासकः स न तत्प्रकाश्यो भवति, यथा आदित्यो रूपप्रकाशकः तत्प्रकाश्यो न भवतीत्यर्थः। किञ्च बुद्धिरात्मप्रकाशिका न भवति, वेद्यत्वात्, घटादिवत् इत्याह—**एतस्मादिति**।

वेद्याया वेदितृत्वानुपपत्तेः । यदि तस्या अपि वेद्याया वेदितृत्वं स्यात् वेद्यता न स्यात् समत्वात् प्रकाशयोरिवेति ।

॥ इति द्वितीयः पटलः ॥

अथ तृतीयः पटलः

तत्र जाग्रत्स्वप्नसुषुप्तान्युपन्यस्यन्ते बुद्धेरवस्थाविशेषाः । तेषां परित्यागार्थमात्मविशुद्धिप्रतिपादनाय च। तत्र जागरणम्—चक्षुरादीनि करणान्यादित्याद्यनुगृहीतानि स्वविषयेषु प्रवर्तन्ते । तत्र बुद्धिरपि करणव्यापारमनुभवति । तत्र प्रत्यगात्मचैतन्यावज्वलितोभयात्मिकाऽपि द्रष्टृदृश्याकाराऽपि परिणमते । तत्र प्रत्यगात्मेति कस्मादात्मा

आत्मवद्बुद्धेरपि वेदितृत्वे प्रदीपयोरिव समानस्वभावत्वाद्बुद्ध्यात्मनोर्वेद्यवेदितृभावानुपपत्तिरिति पक्षमनूद्य प्रतिक्षिपति—**यदीत्यादिना** ।

चिद्धातोस्सन्निधेरेव दृश्यबुद्ध्यादिदर्शनात् ।
तदज्ञेयत्वतो ज्ञप्तिमात्रमात्मेति सुस्थितम् ॥

॥ इति द्वितीयः पटलः ॥

अथ तृतीयः पटलः

समस्तविशेषशून्यं कूटस्थचैतन्यमात्रं प्रत्यगात्मतत्त्वमित्युक्तम् । इदानीमात्मन्यवस्थात्रयभाजि भासमाने कथं यथोक्तलक्ष्मत्वसिद्धिरित्याशङ्क्य तस्मिन्नवस्थात्रयस्फुरणमन्तःकरणाध्यविवेकनिबन्धनमिति प्रतिपादयितुं प्रक्रमते—**तत्रेति** । बुद्धेरन्तःकरणस्यावस्थात्मकानि जाग्रत्स्वप्नसुषुप्तानि प्रत्यगात्मनि बुद्ध्यविवेकाद्भवन्तीति तस्मिन् व्यपदिश्यमानानीत्यर्थः । स्वगतानि तानि कस्मादात्मनिष्ठत्वेन कथ्यन्ते ? यथाप्रथनमात्मनिष्ठान्येव किमिति न भवेयुरित्याशङ्क्याह—**तेषामिति** । जागरितादीनामवस्थारूपाणां विशेषाणां परित्यागसिद्धये बुद्ध्युपाधिकत्वं तेषामुपन्यस्यते । अन्यथा चैतन्यवत्परित्यागायोगादित्यर्थः । तेषामौपाधिकत्वोपवर्णनस्य प्रयोजनान्तरमाह—**आत्मेति** । यद्यवस्थात्रयमात्मनि भासमानमुपाध्यध्यारोपितमिष्यते विशुद्धिरात्मनः सिद्ध्यति, स्वतोऽवस्थात्रयसम्बन्धाभावात् । अतश्चावस्थात्रयस्यौपाधिकत्वप्रतिपादनमर्थवदित्यर्थः । आत्मनोऽवस्थात्रयातीतत्वस्थापनार्थमवस्थात्रयं विवृण्वन्नादौ जाग्रदवस्थां प्रस्तौति—**तत्रेति** । तासामवस्थानां मध्ये जाग्रदवस्था कीदृशीत्यपेक्षायां तत्प्रदर्शनं प्रथमं कर्तव्यमित्यर्थः । चक्षुरादिभिरिन्द्रियैः तदधिष्ठातृदेवतानिमित्ते रूपाद्यर्थेषु प्रवृत्तैस्तत्तदर्थोपलब्धिर्जाग्रन्नाम इन्द्रियैरर्थोपलब्धिर्जागरितमित्यङ्गीकारात् इत्याह—**चक्षुरादीनीति** । तस्यां खल्ववस्थायां बुद्धेरेव द्रष्टृत्वमित्याशङ्क्य निराचष्टे—**बुद्धिरिति** । विज्ञानक्रियाशक्तिमती बुद्धिः साभासाऽपि तस्यामवस्थायां प्रागुक्तचक्षुरादिकरणद्वारेण रूपादिविषयाकारपरिणामरूपं षड्व्यापारं प्रतिपद्यमाना द्रष्टृत्वव्यावृत्तकरणपक्षपातिनी भवतीत्यर्थः । चक्षुरादिदृष्टान्तार्थोऽपिशब्दः ।

कथं पुनः बुद्धिः जडा सती विषयाकारपरिणामं प्रतिपत्तुं प्रभवति ? न हि घटस्य घटाकारपरिणामत्वमुपलभ्यते, तत्राह—**प्रत्यगात्मेति** । बुद्धेः जडत्वेऽपि प्रत्यगात्मभूतचैतन्याभासव्याप्तिरस्ति,

विशेष्यते ? व्यभिचारिणामनात्मत्वख्यापनार्थम् । तत्र बुद्ध्यादीनि करणानि घटादिवत् दृश्यभूतान्यपि बाह्यापेक्षया तारतम्यक्रमेण प्रत्यगात्मसंयोगादात्मानो भवन्ति । उदकस्याग्निसंयोग इवोष्णत्वं; न त्वात्मनः तत्संयोगादनात्मत्वं सम्भवति उदकसंयोग इवाग्नेरनुष्णत्वं न त्वात्मनः प्रत्यगात्मत्वं कदाचिदपि व्यभिचरति आत्माभ्यन्तरवस्त्वन्तराभावात् बुद्ध्यादीनामिव ; अत आत्मा प्रत्यगात्मेति विशेषणार्थः । एवं सत्यव्यभिचारित्वमात्मनः ख्यापितं भवति ।

बुद्धाविवाहंप्रत्ययस्य तस्मिन्नभावादित्यर्थः । उभयात्मकेत्यस्य व्याख्यानं द्रष्टृदृश्यमिति चैतन्याभासव्याप्तायाः बुद्धेरहमिति परिणामो द्रष्ट्राकारो भवति; तस्याश्च रूपादिदृश्याकारेण परिणामान्तरं चक्षुरादिद्वारकमिष्टम्, तदुभयविधपरिणामद्वारेण प्रमातृप्रमाणप्रमेयादिव्यवहारः सर्वोऽपि निर्वहतीत्यर्थः । यदुक्तम् 'प्रत्यगात्मावज्वलिता धीः' इति तत्र प्रत्यगात्मेति विशेषणस्य प्रयोजनं पृच्छति—**तत्रेति** । प्रकृतं वाक्यं सप्तम्या परामृश्यते । न हि फलविकलं विशेषणं प्रयोक्तुं युक्तम् "सम्भवे व्यभिचारे च विशेषणमर्थवत्" इति न्यायात्; अन्यथाऽतिप्रसङ्गात् इत्यर्थः । विशेषणस्य प्रयोजनवत्त्वं प्रतिजानीते—**व्यभिचारिणामिति** । के ते व्यभिचारिणः येषामनात्मत्वं ख्यापयितुमिष्यते, तत्राह—**तत्रेति** । व्यभिचार्यव्यभिचारिप्रसङ्गे सतीति यावत् । करणानि व्यभिचारीणीति शेषः । ननु तेषां घटादिवत् दृश्यत्वादात्मत्वशङ्कैव नोपजायते । तदा च तदनात्मत्वख्यापनमस्याकिञ्चित्करमिति, तत्राह—**घटादिवदिति** । यद्यपि देहादयोऽहङ्कारपर्यन्ता दृश्यभूता घटादिवदवतिष्ठन्ते तथापि प्रत्यगात्मना संयोगादात्मत्वशङ्काभाजो भवन्ति । दृश्यते हि देहस्य बाह्यघटाद्यपेक्षया प्रत्यगात्मसंयुक्तस्याहंप्रत्ययालम्बनत्वेनात्मत्वम् ! तदपेक्षया चान्तराणामिन्द्रियाणां प्रत्यगात्मसंयोगिनां धर्मविशेषवतां अहंप्रत्ययविषयाणामात्मत्वम् । एवं पूर्वपूर्वापेक्षयोत्तरोत्तरस्य मनोबुद्ध्यादेरात्मचैतन्यव्याप्तस्यात्मत्वं तरतमभावेनाशङ्क्यते । लोहपिण्डस्याग्निसंयोगादग्नित्वशङ्कासमुन्मेषदर्शनादित्यर्थः । अनात्मनामपि बुद्ध्यादीनामात्मचैतन्याभासव्याप्तेरात्मत्वशङ्का समुन्मिषतीत्यत्र दृष्टान्तमाह—**उदकस्येति** ।

बुद्ध्यादीनामनात्मनामात्मसम्बन्धादात्मत्वं प्रतिभाति चेदात्मनोऽपि बुद्ध्याद्यनात्मसम्बन्धादनात्मत्वं किं न प्रतिभायादित्याशङ्क्य दृष्टान्तेन निराचष्टे—**न त्विति** । वह्नेः स्वसत्तायां कदाचिदपि शैत्यभाक्त्वाभाववत् अनात्मसंयोगेऽपि नानात्मत्वमात्मा प्रतिपद्यते वह्नेरपि सलिलसम्बन्धेन शैत्यप्रसङ्गादित्यर्थः । बुद्ध्यादीनामापेक्षिकप्रत्यक्त्ववदात्मनोऽपि प्रत्यक्त्वमापेक्षिकं स्यादित्याशङ्क्याह—**न त्वात्मन इति** । प्रत्यगात्मत्वमात्मनो निरुपचरितमित्यत्र हेतुमाह—**आत्मेति** । यथा बुद्ध्याद्यपेक्षयाऽऽत्माभ्यन्तरो गृह्यते न तथाऽऽत्मापेक्षया किञ्चिदभ्यन्तरं वस्त्वन्तरमस्ति प्रमाणाभावात्; तस्य च सर्वान्तरत्वश्रुतेः; अतस्तस्य निरुपचरितं प्रत्यक्त्वमित्यर्थः । बुद्ध्यादीनामुपचरितप्रत्यगात्मत्वभाजामपाकरणार्थं **प्रत्यगात्मेति**। निरुपचरितप्रत्यगात्मत्वमात्मनि विशेषणमुपसम्पन्नमित्युपसंहरति—**अत इति** । विशेषणस्योक्तं फलं अतः शब्देन परामृश्यते । बुद्ध्यादीनां बाह्यानां मिथः स्वरूपतश्च व्यभिचारित्वम् । आत्मनस्तु सर्वान्तरस्य सन्निधिमात्रेण सर्वावभासकस्य निरुपचरितं प्रत्यक्त्वमिति स्थिते फलितमाह—**एवं चेति** । बुद्धेर्द्रष्ट्राकारत्वं दृश्याकारत्वं चेति परिणामद्वयमधस्तादावेदितम् ।

तत्र प्रत्यगात्मचैतन्यावज्वलिता द्रष्ट्राकाराऽपि परिणमते तप्तलोहवत्, दृश्याद्युपरक्ता विषयाकारा द्रुतताम्रादिवत्। तत्रैवं सति तदुभयसाक्षिणः कालाकाशवत् सर्वगतस्याविक्रियस्य दृग्रूपस्य आत्मनो जागरणमिव भवति। अथ पुनः सा धीः रूपाद्याकारवासिता रूपाद्यन्तरेण पुष्पपेटिकेव अविद्याकामकर्मभिः प्रेर्यमाणा संस्काररूपा दृश्यत्वेन व्यवतिष्ठते। तद्दर्शिनः स्वप्न इव भवति तदनुकारित्वादात्मनो जलचन्द्रवत्।

अथ पुनः सा धीः स्फुरणरहिता वासनारूपेण स्वरूपशून्येव चैतन्यग्रस्ता सामान्यरूपेण व्यवतिष्ठते। तत् सुषुप्तमिव भवति वटकणिकायामिव वटवृक्षः।

॥ इति तृतीयः पटलः ॥

तत्रावान्तरविशेषं दर्शयति—**तत्रेति**। अनात्मनां व्यभिचारित्वमात्मनश्चाव्यभिचारित्वमिति स्थिते सत्यनात्मनि बुद्धौ उक्तपरिणामद्वयं तदनात्मत्वव्यक्तीकरणार्थं वक्तव्यमित्यारम्भे प्रथमं द्रष्ट्राकारं परिणामं विवृणोति—**प्रत्यगात्मेति**। यथा वह्निव्याप्तं तप्तं लोहं वह्न्याकारं भजते तथा प्रत्यगात्मभूतचैतन्यव्याप्तमन्तःकरणं अहमिति द्रष्ट्राकारभाग्भवतीत्यर्थः। बुद्धेरेव विषयाकारं परिणामं परिदर्शयति—**दृश्यादीति**। आदिशब्देन दर्शनं परामृश्यते। यथा हि मूषायान्निषिक्तं द्रुतताम्रादि मूषाकारं भजते तथा वृत्तिद्वारेण दृश्येषु संसृष्टा धीर्विषयाकारिणी भवतीत्यर्थः। बुद्धेरुभयविधपरिणामवत्त्वे फलितमाह—**तत्रेति**। तस्मिन्नन्तःकरणे प्रागुक्तरीत्या परिणामद्वयवति सति द्रष्ट्राकारस्य दृश्याकारस्य च परिणामद्वयस्य तद्वतश्च साक्षिभूतप्रत्यगात्मनो मिथ्याभूतं जागरितं भवतीति सम्बन्धः। तस्य मिथ्यात्वे हेतुमाह—**कालेति**। आत्मनः सर्वगतत्वात् निरवयवत्वेन विक्रियायोग्यत्वाच्च परिणामपरिस्पन्दयोः असम्भवादारोपितमेव तस्मिन् जागरितमित्यर्थः। किञ्च चिद्रूपत्वादात्मनो न तस्मिन् दर्शनार्था विक्रिया प्रकल्पते। ततश्च तस्मिन्नध्यस्तं जागरितमित्याह—**दृग्रूपस्येति**।

एवमात्मन्यारोपितं जागरितं निरूप्य स्वप्नं निरूपयति—**अथेति**। जाग्रन्निमित्तकर्मक्षयानन्तरं पुनः स्वप्ननिमित्तकर्मोद्भवे सति जागरितशब्दितविज्ञानविनाशजनितसंस्कारसहकृतमन्तःकरणमविद्यादिप्रेरितं विषयसम्बन्धमन्तरेणैव विषय्याकारेण संस्कारसामर्थ्यादवभासते। यथा पुष्पवासनावासिता पुष्पपुटिका विनैव पुष्पं पुष्पगन्धं जनयति, तथैवेदमन्तःकरणमन्तरेण विषयमुक्तविधं सदात्मनः स्वयं ज्योतिषो दृश्यतामापद्यते। तद्दर्शनमस्यात्मनः स्वप्नत्वेन कथ्यते। करणेषूपरतेषु जागरितसंस्कारजनितं सविषयं विज्ञानं स्वप्न इत्यङ्गीकारादित्यर्थः। अन्तःकरणादिकरणधर्माणामात्मन्यध्यारोपणे हेतुमाह—**तदनुकारित्वादिति**। आत्मन्यन्तःकरणाध्यासादात्मनस्तद्धर्मानुकारित्वात् तज्जागरणे जागरणम्, तदीयस्वप्ने च स्वप्नस्तत्र भाति "ध्यायतीव लेलायतीव" इति श्रुतेरित्यर्थः। आत्मनि स्वतो जागरिताद्यभावे दृष्टान्तमाह—**जलेति**। यथा घटशरावादिजलगतचलनमेव चन्द्रचलनं न तु पृथक्तस्य चलनमस्ति तथात्मन्यपि बुद्धिधर्मानुसारित्वं द्रष्टव्यमित्यर्थः।

सम्प्रति सुषुप्तं कथयति—**अथेति**। अवस्थाद्वयनिमित्तकर्मनिवृत्त्यनन्तरं तत्र निरन्तरसञ्चारसमुद्भूतप्रभूतश्रमवृत्तौ सत्यां प्रकृता धीर्जागरितात्मना च स्फुरणरहिता चैतन्येनाज्ञातेन ग्रस्ता स्वात्मन्यन्तर्भाविता स्वरूपशून्येव व्यवतिष्ठते। चैतन्येन स्वात्मन्यन्तर्भावितत्वे धियः स्वरूपशून्यत्वमेव मोक्षदशायां युक्तम्। तथा च इवशब्दो वृथेत्याशङ्क्य विशिनष्टि—**सामान्यरूपेणेति**। सामान्यं

अथ चतुर्थः पटलः

तत्र चिन्मात्रस्वरूप आत्मा कार्यकरणाविद्याकामकर्मविनिर्मुक्तः सलिलवत् स्वच्छः स्वात्मस्थो भवति। एतानि बुद्धेरवस्थाविशेषणानि नात्मनः, आत्मनोऽविक्रिय-

---

सर्वकार्यसाधारणं साभासमज्ञानमव्याकृतं तत्तादात्म्येन बुद्धेरवस्थानमात्मन्यारोपितं सुषुप्तमित्यर्थः। कारणात्मना धियोऽवस्थाने किमित्युपलम्भो न भवेदित्याशङ्क्याह—**वटकणिकायामिति**। यथा वटवृक्षो वटकणिकायां(किं) प्रागपि जन्मनो वर्तते, नरविषाणवदसतो जन्मायोगात्, तथापि नोपलभ्यते। तथेहापि कारणात्मनाऽवस्थितमन्तःकरणमनभिव्यक्तनामरूपत्वान्नाभिव्यक्तिभाग्भवतीत्यर्थः।

स्थानानां कल्पना यस्मिन्न बुद्धिद्वारा प्रसाधिता।
तदस्त्यकल्पितं ब्रह्म द्वैताभावोपलक्षितम्॥

॥ इति तृतीयः पटलः॥

अथ चतुर्थः पटलः

अन्तःकरणविशेषणभूतमवस्थात्रयमन्तःकरणाध्यारोपणादात्मन्यध्यारोपितं प्रतिभातीत्युक्तम्। इदानीमारोपितावस्थात्रयविनिर्मुक्तमद्वितीयमात्मतत्त्वं प्रतिपादयितुं प्रारभते—**तत्रेति**। अवस्थात्रयप्रतिभानं प्रत्यगात्मनि परोपाधिकृतमिति स्थिते सति प्रत्यगात्मा चिन्मात्रस्वभावात्सिद्ध्यतीत्यर्थः। प्रत्यगात्मन्यवस्थात्रयस्य स्वाभाविकत्वाभावेऽपि कथं तस्य चिन्मात्रत्वसिद्धिरित्याशङ्क्य परमार्थतोऽवस्थात्रयतत्कारणसम्बन्धवैधुर्यादित्याह—**कार्येति**। कार्यं स्थूलशरीरप्रधानं जागरितं, करणं तदुपलक्षितलिङ्गशरीरप्रधानं स्वप्नस्थानं, अविद्या स्थानद्वयकारणं सुषुप्ताख्यमज्ञानं, कामकर्मणी मिथ्याज्ञानसहिते जागरितादिस्थानद्वयस्य निमित्तभूते। (तथ्यो)....तैरयमात्मा विनिर्मुक्तोऽभ्युपगम्यते। "न तस्य कार्यं करणं च विद्यते" "अतमोऽवाय्वनाकाशं" "अतिच्छन्दा अपहतपाप्मा" इत्यादिश्रुतेः। तथा च यथोक्तेभ्यो जडेभ्यो वैलक्षण्यादात्मनो युक्तं चिन्मात्रत्वमित्यर्थः। तस्यैव नित्यशुद्धत्वमाह—**सलिलवदिति**। अवस्थाद्वयतद्धेतुनिर्मोकादेवात्मनोऽत्यन्तनैर्मल्यं लभ्यते। न हि सलिलं द्रव्यान्तरसम्पर्काभावे स्वाभाविकं स्वाच्छ्यमपहाय स्थातुं पारयति "सलिल एको द्रष्टा" इत्याद्या श्रुतिरमुमर्थमप्रत्यूहमाहेत्यर्थः। अवस्थात्रयासम्भवात् अत्यन्तनैर्मल्याच्चात्मनः स्वमहिमप्रतिष्ठासिद्धिरित्याह—**स्वात्मस्थ इति**। अवस्थात्रयस्य जडस्यैवाधेयत्वादात्मनः तदसम्बन्धोक्तेः "स्वे महिम्न" इति च श्रुतेः आधारान्तरनिरपेक्षतेत्यर्थः। बुद्ध्युपाध्यधीनं पराधीनमपि इदमवस्थात्रयं जडस्यैवाधेयत्वादात्मनः पारमार्थिकं किमित्यात्मनि न भवतीत्याशङ्क्याह—**एतानीति**। यानि बुद्धेरवस्थारूपाणि विशेषणानि जागरितादीनि तानि बुद्धिसम्बन्धादपि परमार्थतो नात्मनः पारमार्थिकी भवितुमर्हन्तीत्यत्र हेतुमाह—**अविक्रियत्वादिति**। विक्रियावति पदार्थे स्यादपि कदाचिदौपाधिकम्। दृश्यते हि कार्पासादावलक्तकादिरससंस्कृतबीजप्रसूते वास्तवमेव लौहित्यम्। अविक्रिये पुनरात्मनि अनाधेयातिशये बुद्ध्युपाधिकृतमवस्थात्रयं न पारमार्थिकं भवितुमर्हति, उपाधेरपि

त्वात् । एतानि परित्यज्य तुरीय आत्मेति प्रतिपत्तव्यः । अत्र तुरीयत्वं नाम सुवर्णघनवद्विज्ञानघनत्वं, तथापि चैतन्यस्वरूपसन्निधिमात्रेण साक्षिमात्रत्वं तत् न स्थानान्तरमात्मप्रतिपत्तिभावात्, शून्यत्वप्राप्तेः, कल्पितानाञ्च निरास्पदत्वानुपपत्तेः ।

कथमेतान्यात्मविशुद्धिप्रतिपत्तिहेतूनि भवन्ति । एतेषु हि सत्सु आत्मविशुद्धिरवगम्यते । कथमवगम्यत इति । उच्यते । एतेषु त्रिष्वपि स्थानेषु द्रष्टृत्वाव्यभिचारात् । सुषुप्ते व्यभिचरतीति चेत्; न, तत्रापि दृश्यमेव निवारयति सर्वो लोकः । कथं, नाहमत्र

कल्पितत्वादित्यर्थः । आत्मा तर्हि कथं प्रतिपत्तव्यः स्यादित्याशङ्क्याह—**एतानीति** । बुद्धिविशेषणानि जागरितादीनि प्रकृतानि रज्जुसर्पवदात्मनि कल्पितानि, न वस्तुभूतानीति परित्यज्यात्मा तुरीयो जागरितादिस्थानत्रयरहितो भवतीति प्रतिपत्तव्यतामाचरतीत्यर्थः ।

ननु तुरीयत्वस्य चतुर्थपर्यायत्वादवस्थात्रयरूपावान्तरसंख्यायास्तत्र निवेशादात्मनोऽवस्थात्रयविनिर्मुक्तत्वमसिद्धमित्याशङ्क्याह—**तत्रेति** । सप्तम्या प्रत्यगात्मोच्यते । न हि तुरीयशब्देन प्रत्यगात्मनि काचिदवस्था विवक्ष्यते । निरस्तसमस्तावस्थाविशेषणं स्वप्रकाशविज्ञानतावन्मात्रमित्यविद्याकल्पितावस्थात्रयाभावापेक्षया संख्यासामान्याभावेऽपि तुरीयमित्युपचारोपपत्तिरित्यर्थः । यदि यथोक्तविज्ञानघनं तत् तर्हि व्यतिरिक्तत्वमेवात्मनो युक्तं तस्यावस्थात्रये सति प्रतिभानाभावादित्याशङ्क्याह—**तथाऽपीति** । अवस्थात्रये भ्रान्त्यैव तुरीयस्य स्फुरणाभावेऽपि सन्निधिमात्रेणावस्थात्रयसाक्षित्वमेव तुरीयस्वरूपं न स्थानान्तरं अनात्मभूतमित्यत्र हेतुमाह—**आत्मेति** । कूटस्थबोधातिरिक्तस्य ज्ञेयत्वादिना घटादिवदनात्मत्वात् कूटस्थबोधस्यापि प्रत्यगात्मत्वाभावे तदसिद्धेः तदधीनसिद्धिकमन्यदपि न सिद्ध्यति । न हि प्रत्यगात्मनि प्रतिपत्तारमन्तरेणानात्मजातं स्वतोऽन्यतो वा सेद्धुमलम् । तथा च सर्वस्य शून्यत्वप्रसङ्गात् तुरीयं विज्ञानघनमेवात्मस्वरूपमविद्यावशादवस्थात्रये यथावदप्रतिपन्नं तिष्ठतीत्यर्थः ।

भवतु सर्वशून्यत्वमिति शून्यवादिनो मन्यन्ते । तान्प्रत्याह—**कल्पितानां चेति** । समस्तस्यैव द्वैतप्रपञ्चस्य दृश्यत्वदजडत्वादिना रज्जुसर्पवत् कल्पितत्वादकल्पितमजडबोधमात्मानमन्तरेणानुपपत्तेरात्मापि ज्ञप्तिस्वभावोऽभ्युपेयः । न हि निरधिष्ठानकल्पना कल्पते । न च शून्यस्यास्याधिष्ठानत्वमारोपितानुवेधाभावात्तदनुविद्धस्यैवाधिष्ठानत्वात् । न च बाधोऽवधिं विना नेत्येव सम्भवति । तस्मात् कल्पनाधिष्ठानत्वेन तद्बाधावधित्वेन चाजडमात्मतत्त्वमास्थेयमित्यर्थः । अवस्थात्रयकथनं तत्परित्यागार्थमिति प्रतिज्ञातं समर्थितम् । यदुक्तमवस्थात्रयोपवर्णनमात्मविशुद्धिप्रतिपादनायेति, तदाक्षिपति—**कथमिति** । एतानि हि स्थानानि स्वयमशुद्धिरूपत्वादात्मनो विशुद्धिप्रतिपत्तौ नैव कारणानि भवितुमर्हन्ति । न हि स्वयमशुद्धस्यान्यत्र शुद्धिहेतुत्वमुपलब्धमित्यर्थः । तेषामशुद्धिरूपत्वेऽपि सत्स्वेव तेष्वात्मनो विशुद्धेरवगतेः युक्तं तद्विशुद्धिप्रतिपत्तिहेतुत्वमित्यर्थः । अवस्थात्रयस्य व्यभिचारेऽपि व्यभिचाराभावादात्मनः शुद्धतेत्ययुक्तं न किञ्चिन्मया चेतितमेतावन्तं कालमिति स्वापानन्तरं द्रष्टृत्वाभावपरामर्शदर्शनादात्मनोऽपि स्वापे व्यभिचारप्रतीतेरिति शङ्कते—**सुषुप्त इति**। स्वापेऽपि दृश्यतत्सम्बन्धयोरेव व्यभिचारो न स्वरूपदृष्टेरित्युत्तरमाह—**नेत्यादिना**। तत्र प्रमाणं पृच्छति—**कथमिति** । अनुभवं प्रमाणयति—**नाहमिति** । अत्र हि 'सुषुप्ते न किञ्चिदहमुपलब्धवान्'

सुषुप्ते किञ्चिदप्युपलब्धवानिति न दृष्टिम्। तस्यास्तर्हि सर्वत्र अव्यभिचारात्। अत एव कूटस्थनित्य आत्मा सिद्धः स्वत एव न प्रमाणान्तरापेक्षया। आत्मनश्चेत् प्रमाणापेक्षा सिद्धिः कस्य प्रमातृत्वं स्यात्। यस्य प्रमातृत्वं स एवात्मेति निश्चीयते। नन्वागमेनात्मा परिच्छिद्यते। न। आगमोऽप्यात्मन्यध्यारोपितातद्धर्मनिवर्तनद्वारेण ब्रह्मात्मनोरेकत्वप्रतिपत्तिं प्रति मानत्वं प्रतिपद्यते। निर्ज्ञातपदार्थद्वयस्यानिर्ज्ञातार्थाभिव्यञ्जकमेतत्, स्वतः सिद्धत्वादात्मनः। सोऽहमिति स्मृत्या प्रतिसन्धानात् पुण्यापुण्यसम्बन्धाभावात्

इति दृश्यविषयं तद्ज्ञानाभावमात्रमुत्थितो जन्तुरनुभवति, न स्वरूपाभावमपि नाहमनुभवाभावात्। "पश्यन्वै तन्न पश्यति" इति श्रुतेः इत्यर्थः। आत्मस्वभावदृष्टेः सुप्ते व्यभिचाराभावे फलितमाह—**तस्यास्तर्हीति**। तर्हि तस्यां सुषुप्त्यवस्थायामात्मस्वरूपदृष्टेरुपदिष्टया विधया व्यभिचाराभावे तथैव तस्याः सर्वत्र व्यभिचाराभावात् कूटस्थत्वे सति नित्यता शुद्धता च सिद्धा, परिणामित्वे क्षीरादिवद्व्यभिचारित्वप्रसङ्गात्; अशुद्धत्वे च स्थानत्रयान्तर्भाविन व्यभिचारित्वतादवस्थ्यादित्यर्थः।

नन्वव्यभिचारित्वेन कूटस्थनित्यत्वाद्यनुमाने तद्वेद्यत्वात् "एतदप्रमयं ध्रुवम्" इत्यादिश्रुतिविरोधः स्यादित्याशङ्क्याव्यभिचारित्वादिलिङ्गस्यात्मन्यारोपितव्यभिचारित्वादिनिरासद्वारा सम्भावनामात्रहेतोः निरपेक्षतया निश्चायकत्वाभावादतिरिक्तानुभवानपेक्षस्वरूपप्रकाशेन कूटस्थनित्यता सिद्धेत्याह—**अत एवेति**। लिङ्गस्य सम्भावनामात्रहेतुत्वादेव न प्रमाणापेक्षाऽऽत्मनः सिद्धिरित्यक्षरार्थः। तस्य प्रमाणगम्यत्वे दूषणमाह—**आत्मनश्चेदिति**। आत्मनोऽपि घटादिवत् प्रमेयत्वेऽपि प्रमात्रन्तराभावात् तस्य च प्रमेयत्वेन समाप्तस्य प्रमातृत्वायोगात् तदभावे प्रमाणप्रमेयप्रमितीनामप्यसम्भवात् न प्रमाणेनात्मसिद्धिरित्यर्थः। प्रमेयात्मनो व्यतिरिक्तस्य प्रमातृत्वान्नोक्तो दोषोऽस्तीत्याशङ्क्याह—**यस्येति**।

प्रमाणान्तराप्रमेयत्वेऽपि तस्यागमगम्यत्वमौपनिषदत्वादेषितव्यं इत्याशङ्कते—**नन्विति**। आत्मनो विषयत्वाभावादागमेनापि परिच्छिद्यमानत्वं नास्तीति परिहरति—**नागमोऽपीति**। परिच्छिनत्ति आत्मानमित्यध्याहारः। कथं तर्हि तद्धितश्रुत्या वेदान्तैकवेद्यत्वमात्मनः दर्शितमिति, तत्राह—**आत्मनीति**। आत्मन्यारोपितकर्तृत्वादिकारणीभूताज्ञाननिवर्तकब्रह्मात्मैकत्वाकारबुद्धिवृत्तिजनकत्वेन तत्त्वंपदार्थयोरैकरस्यप्रतिपत्तौ प्रमाणभावमागमोऽनुभवतीत्यर्थः। तत्र हेतुमाह—**निर्ज्ञातेति**। शोधिततत्त्वं पदार्थंस्याधिकारिणः शास्त्रमन्तरेणाज्ञातं ब्रह्मात्मैकत्वमर्थमभिव्यञ्जयत् तत्त्वमस्यादिवाक्यमुक्तेन प्रकारेण प्रमाणमज्ञातज्ञापकं प्रमाणमित्युपगमात्। अतः शास्त्रप्रामाण्यं ब्रह्मात्मैकत्वाकारबुद्धिवृत्तिजनकत्वद्वारेण अज्ञानतदुत्थानर्थनिवर्तकत्वादेष्टव्यम्; न तु फलरूपे फलजनकं शास्त्रमित्यर्थः। आत्मनि शास्त्रस्य फलजनकत्वे प्रमाणत्वाभावे हेहुमाह—**स्वतःसिद्धत्वादिति**। "अत्रायं पुरुषः स्वयंज्योतिः" इति श्रुतेरात्मनः स्वयमेव फलरूपत्वात् न तत्र फलमुत्पाद्य शास्त्रं प्रमाणीभवतीत्यर्थः। पूर्वोक्तहेतुपरामर्शद्वारा प्रकरणार्थमुपसंहरति—**सोऽहमित्यादिना**। अवस्थात्रयेऽपि सोऽहमित्यभिज्ञया प्रतीचो द्रष्टृत्वाव्यभिचारस्योपदिष्टत्वादवस्थात्रयस्य च मिथोव्यभिचाराद्व्यभिचारिणः स्थानत्रयादात्मनोऽव्यभिचारिणो व्यतिरिक्तत्वं प्रागुक्तं युक्तमेवेत्यर्थः। तत्रैव हेत्वन्तरमाह—**पुण्येति**। "अनन्वागतं पुण्येनानन्वागतं पापेन" इत्यादिश्रुतेरात्मनः तदुभयसम्बन्धाभावाधि-

स्थानत्रयव्यतिरिक्तत्वं नित्यत्वं शुद्धत्वं मुक्तत्वं बुद्धत्वं अविक्रियत्वं अलुप्तदृक्स्वरूपत्वं एकत्वं चात्मनः स्वानुभवेनैव मम सिद्धमिति जानाति विद्वान्। आचार्यप्रसादादज्ञान-निद्राप्रबुद्धः संसारविनिर्मुक्तो विद्वान्। एष आत्मज्ञानोपदेशविधिः।

एवं ज्ञात्वा कृतकृत्यो भवति नान्यथेत्येवं वेदान्तानुशासनं वेदान्तानुशासन-मिति।

॥ इति चतुर्थः पटलः ॥

॥ इति श्रीशङ्करभगवत्पादाचार्यविरचितः आत्मज्ञानोपदेशविधिः समाप्तः ॥

गमादवस्थात्रयातिरिक्तत्वं युक्तमेवोक्तमित्यर्थः। यदावस्थात्रयातिरिक्तत्वमात्मनः सिद्धं तदा तस्य नित्यत्वमपि सिद्धमेवावधेयम्, अवस्थात्रयस्यैवानित्यत्वादाकाशवच्च तस्य नित्यत्वश्रुतेरित्याह--**नित्यत्वमिति**। नित्यत्वे शुद्धत्वमपि सिद्धम्; अन्यथा नित्यत्वानुपपत्तेः "शुद्धमपापविद्धम्" इति श्रुतेरित्याह--**शुद्धत्वमिति**। अवस्थात्रयस्यैवाशुद्धत्वात्ततो व्यतिरिक्तत्वाच्च शुद्धत्वं सिद्धयतीत्यर्थः। कार्येणात्मनः तादात्म्यैक्ययोरसम्भवमभिधाय कारणेनापि तस्य तादात्म्यासम्भवं सङ्गिरते--**बुद्धत्वमिति**। जडादवस्थात्रयादतिरेकाच्च बुद्धत्वमवगम्यते; विज्ञानघनादिश्रुतेश्च तदधिगति-रित्यर्थः। इदानीं कारणेनैक्याभावमात्मनो दर्शयति--**मुक्तत्वमिति**। बुद्धात्मनोऽवस्थात्रयादति-रेकाच्चैतदधिगन्तव्यम्। अविद्याकामकर्मपारतन्त्र्याभावे पुरुषस्यासङ्गागमावगतेः कूटस्थत्वं हेतुमाह--**अविक्रियत्वमिति**। विक्रियावतोऽवस्थात्रयादतिरेकात् "निष्कलं निष्क्रियम्" इति श्रुतेश्चैतदुपपन्नमित्यर्थः। यदुक्तमात्मनो बुद्धत्वं तदुपपादयति—**अपरिलुप्तेति**। "न हि द्रष्टुः दृष्टे-र्विपरिलोपो विद्यते अविनाशित्वात्" इति श्रुतेः। तत्परिलोपे च साधकान्तरस्यान्वेष्यत्वात् तस्यैव दृग्रूपत्वसम्भवात् विज्ञानानन्दादिश्रुतेश्च। अनेकस्मादवस्थात्रयादतिरेकादेव सिद्धमेकत्वमपीत्याह—**एकत्वं चेति**। उक्तात्मस्वरूपे शास्त्रयुक्तिसमन्विते विद्वदनुभवमपि समुच्चिनोति--**स्वानुभवेनेति**। यदैवंभूतात्मवस्तु विद्वान् प्रतिपद्यते तर्हि केन प्रकारेण पुरुषस्य विद्वत्ता सिद्ध्यतीत्याशङ्क्याह--**आचार्येति**। आचार्येण शास्त्रदर्शितविशेषणवताऽनुगृहीतो यदैव बोध्यते नासि त्वं देहादिसङ्घतो नापि संसारी किन्तु यदशेषोपनिषत्प्रतिपाद्यमद्वितीयसच्चिदानन्दैकतानं ब्रह्म तदेव त्वमसि इति तदा विद्वानापद्यते। यदा चैवं तदैवाज्ञानलक्षणाया निद्रायाः प्रतिबुद्धः तत्प्रसूतकर्तृत्वादिसमस्तसंसार-विनिर्मुक्तो जीवन्मुक्तो भवतीत्यर्थः। आचार्योपपादिततत्त्वमस्यादिवाक्यप्रसूतसम्यग्ज्ञानसमानकालैव विदुषो मुक्तिः तस्य प्रारब्धाभासवशाज्जीवन्मुक्तरूपेण वार्तमानिकदेहपातान्तरं विदेहकैवल्यमवश्यं-भावीत्युक्तम्। इदानीं परं प्रकृतमुपसंहरति--**एष इति**। अयमेव पूर्वाचार्यपरम्परागतो मोक्षोपाय-ज्ञानोपदेशप्रकारो नान्यादृशोऽस्तीत्यर्थः। यद्यपि पूर्वेषां भागधेयभागिनां यथोक्तादुपदेशादात्म-ज्ञानोदयद्वारा कैवल्यं लब्धुं शक्यते तथापि नैदंयुगीयानामल्पभाग्यानामित्याशङ्क्याह—**एवमिति**। अद्यत्वेऽपि देवो मनुष्यो वा प्रदर्शितेन मार्गेण ज्ञात्वा निःश्रेयसं प्रतिपद्यते, नान्यथा कर्मादि-साधनान्तरेणेत्यर्थः। तत्र प्रमाणमाह--**एवं वेदान्तेति**। "तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" "तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय।" "अथ मर्त्योऽमृतो

भवत्यत्र ब्रह्म समश्नुते" इत्यादिवेदान्तवाक्यमत्र प्रमाणमित्यर्थः। पदाभ्यासस्य प्रकरणपरिसमाप्तिफलत्वात् इतिशब्देन शास्त्रार्थस्य सर्वस्यैवात्र संक्षिप्योक्तत्वात् वक्तव्यावशेषाभावात् अशेषमतिविशदमिति सूचयति।

संसारगरलध्वंसिसुधाधाराभिवर्षिणी ।
आत्मज्ञानानुगा टीका टीकतां पुरुषोत्तमम् ॥

॥ इति चतुर्थः पटलः ॥

॥ इति श्रीआनन्दगिर्याचार्यविरचितं विवरणं समाप्तम् ॥

श्रीशङ्करभगवत्पादाचार्यविरचितम्

उपदेशपञ्चरत्नम्

श्रीसदाशिवविरचितपञ्चरत्नकारिका-

श्रीबालकृष्णानन्दसरस्वतीविरचितकिरणावली-

टीकाद्वयोपेतम्

उपदेशपञ्चरत्नम्

श्रीशङ्करभगवत्पादाचार्यविरचितम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतां
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम् ।
सद्विद्वानुपसेव्यतामनुदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २ ॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षःसमाश्रीयतां
दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहंमतिरुज्झयतां बुधजनैर्वादस्समुत्सृज्यताम् ॥ ३ ॥

क्षुद्व्याधिश्च चिकित्स्यतामनुदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन सन्तुष्यताम् ।
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यताम् ॥ ४ ॥

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्माऽऽत्मना स्थीयताम् ॥ ५ ॥

•

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितम्

उपदेशपञ्चरत्नम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतां
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥

श्रीसदाशिवविरचिताः पञ्चरत्नकारिकाः

रामेन्द्रस्वामिनं वन्दे सच्चिदानन्दविग्रहम् । मुमुक्षूणामभयदं ब्रह्मात्मैक्यप्रदं गुरुम् ॥ १ ॥
तत्कृपालेशतो वाणीं पवित्रीकर्तुमुद्यतः । सदाशिवः करोतीमाः पञ्चरत्नस्य कारिकाः ॥ २ ॥

अत्रेदमभिधीयते—

इह तु ब्रह्मचर्याङ्गसाधनेनं द्विजोत्तमः । स्वाध्यायविधिना सम्यक् तदर्थप्रवणो भवेत् ॥ ३ ॥
साङ्गं वेदमधीत्याथ तथोपनिषदामपि । अर्थमापाततो बुद्ध्वा तदनुष्ठानतत्परः ॥ ४ ॥
पारायणाच्चित्तशुद्धिं श्रवणाज्ज्ञानमाप्नुयात् । मननादात्मविज्ञानं भवेद्वेदस्य निश्चितम् ॥ ५ ॥
अर्थशून्या तु या वाणी बह्वनर्थफलप्रदा । अतस्त्येजेद्वाक्प्रसरं सर्वदा मौनवान्भवेत् ॥ ६ ॥

श्रीबालकृष्णानन्दसरस्वतीविरचिता किरणावली

मन्दस्मितमुखाम्भोजं रमालङ्कृतवक्षसम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥ १ ॥
पुण्डरीकाजिनधरं विलसत्फाललोचनम् ।
ज्ञानमुद्राञ्चितकरं दक्षिणामूर्तिमाश्रये ॥ २ ॥
यत्प्रसादलवं प्राप्य प्रत्यूहजलधिं जनाः ।
महारम्भास्तरन्त्येतं विघ्नेशमनिशं नुमः ॥ ३ ॥
यां श्रियं नगजां वाचां देवीमाहुर्विचक्षणाः ।
तां लोकमातरं वन्दे वाग्विभूतिप्रसिद्धये ॥ ४ ॥
यदीयसूत्रविलसच्छास्त्रनावा भवाम्बुधिम् ।
सन्तस्तरन्ति तं वन्दे पाराशर्यमहर्निशम् ॥ ५ ॥

कारिकाः

सर्वेन्द्रियवशीकारो वाङ्मौनं तूपलक्षणम् । फलश्रुतिरपीहास्ति वेदानध्येषितुः परा ॥ ७ ॥
अत्रापि वेदशब्दार्थो नित्य एव परेश्वरः । केचित्प्रवृत्तिहेतुत्वादन्यथा कल्पयन्ति हि ॥ ८ ॥
यावज्जीवश्रुतेस्त्वर्थः सत्वशुद्धिप्रयोजनः । महातात्पर्यमेवेह जिज्ञासायां परं मतम् ॥ ९ ॥
न कर्मणेति श्रुतयो न्यास एवेति वा पराः । अनन्तरं सत्वशुद्धेस्त्यागे सन्ति सहस्रशः ॥ १० ॥
अवान्तरफलापूर्वं रोचनार्थमितीरितम् । आयासबहुले कर्मण्यश्रद्धाविनिवृत्तये ॥ ११ ॥
ऋतौ भार्यामिति वचो रेतोधा इति चापरम् । आनन्तर्यं चाश्रमाणां विद्यतेऽत्रापि वैदिकम् ॥ १२ ॥

किरणावली

यदीयभाष्यकमलस्यन्दमानमरन्दतः ।
विद्वद्भृङ्गस्तृप्तिमेति शङ्करं तमुपाश्रये ॥ ६ ॥
यस्य प्रसादकणिकानौका तारयते नतान् ।
संसारसिन्धुं तं वन्दे सच्चिदानन्दयोगिनम् ॥ ७ ॥
यस्योपदेशमाहात्म्याज्जडा अपि विनिर्गताः ।
संसारबन्धात्तं वन्दे वासुदेवेन्द्रयोगिनम् ॥ ८ ॥
क्वाहं क्व भगवत्पादकृतिगाम्भीर्यजन्मभूः ।
तथाप्यत्रावगाहं मे काङ्क्षते खलु मानसम् ॥ ९ ॥
महतां पक्षपातेन दुस्साध्येप्यर्थकल्पने ।
मम सामर्थ्यमस्त्येव टिट्टिभोऽत्र निदर्शनम् ॥ १० ॥
गुरुपादाम्बुजद्वन्द्वध्याननिर्मलमनसः ।
रचये पञ्चरत्नस्य विवृतिं **किरणावलीम्** ॥ ११ ॥

अथ खलु परमकृपालवो भगवन्तो भगवत्पादाः निखिललोकं संसारदावानलपरिपीतमुपलभ्य आत्मज्ञानामृतमेव तदुपशमनं सुखसाधनं चाहुः । युक्तं च तत् । तस्यैव तन्मूलाविद्यानिवर्तकत्वेन तन्निवर्तकत्वात् । तदेव खलु साधकम्, अन्यस्य तत्साधकत्वानुपपत्तेः । तथाहि—न धर्मः सुखसाधकः । तत्फलस्यानित्यत्वेनासुखत्वात् यो वै भूमा तत्सुखम् नाल्पे सुखमस्तीति भूम्नः सुखत्वम् अल्पस्यासुखत्वं च प्रतिपाद्य यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यमिति भूम्नो नित्यत्वस्य अल्पस्यानित्यत्वस्य च प्रतिपादनात् । "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति कर्मफलस्यानित्यत्वश्रवणात् । "अतोऽन्यदार्तं" इति ब्रह्मव्यतिरिक्तस्य सर्वस्य अनित्यत्वश्रवणाच्च ।

ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" । "अपाम सोमममृता अभूम" इत्यादौ कर्मफलस्यापि नित्यत्वं श्रूयते ततः तस्यापि सुखत्वमस्त्येव । तथा अर्थोऽपि सुखसाधक एव । धर्मादिहेतुत्वात् । कामस्य सुखहेतुत्वं प्रत्यक्षसिद्धमेव । यदि चार्थस्य राजनिमित्तदुःखफलत्वात्, कामस्यापि व्याध्यादिद्वारा दुःखसाधकत्वात्, तयोः सुखहेतुत्वेऽपि विषसम्पृक्तमधुवदनुपादेयता तदा भ्रमात्तयोरुपादानेऽपि धर्मस्योपादानं स्यादेव तत्फलस्य नित्यत्वात् दुःखसम्भिन्नत्वाच्च, श्रुतेरुभय-

कारिका:

तात्पर्यमत्र शृणुत निवृत्तावेव सर्वतः। पर्वादिगमने सा तु निवृत्तिरुपयुज्यते॥ १३॥
तज्जाया इति वेदेऽपि निवृत्तिपरतैव हि। व्यवायाहारनिद्रादिप्रसराद्विनिवार्यते॥ १४॥
यथेष्टाचरणे प्रीतिः पशुवद्गृहिणां भवेत्। सा प्रत्युक्ता तु विधिना नियमेन हितैषिणा॥ १५॥
मैथुनामिषमद्यानां परिसंख्याविधिर्भवेत्। पञ्च पञ्चनखा भक्ष्या इतिवत्तत्र निश्चयः॥ १६॥
केश्चित्त्वपूर्व एवायं विधिरुद्भाव्यते किल। अत्यन्ताप्राप्तितस्तुल्यो ज्योतिष्टोमादिना भवेत्॥ १७॥
विधिस्त्वपूर्व एवायं तन्न सम्मतमत्र तु। मनुष्यपशुदेवादिक्लृप्ततैवात्र युज्यते॥ १८॥
अतः प्रमाणान्तरतोऽप्राप्तिर्नैवात्र सम्मता। अपूर्वे रागतः प्राप्तिरत्र रोगोऽपि वर्तते॥ १९॥
तस्मान्नापूर्वविधिना तुल्यताऽत्र प्रसज्यते। व्रीहीणां प्रोक्षणं यत्तत्प्रमाणान्तरतो न हि॥ २०॥

किरणावली

फलनित्यत्वेऽपि तुल्यत्वात्। धर्मस्यैव ज्ञानोपयोगित्वावश्यंभावेन "तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेन" इति न्यायेन तत्साधकत्वाच्च धर्म एव सुखसाधकः न ज्ञानमिति चेन्न। धर्मस्य सुखसाधकत्वानुपपत्तेः तदेव हि सुखं यन्नित्यं भवति।

नहि धर्मस्य फलं नित्यं भवति, "तद्यथेह कर्मचितो लोकः क्षीयते" इत्यादिश्रुतेः।

ननु कर्मफलस्य नित्यत्वेऽपि श्रुतिरुदाहृता—"अक्षय्यं ह वै चातुर्मास्ययाजिनः" इत्यादिः, सत्यं, न सा स्वार्थं लभते, तया बाधितत्वात्।

न च विनिगमनादिविरहः, श्रुतित्वाविशेषेण प्राबल्यदौर्बल्ययोरुभयत्रापि तुल्यत्वादिति वाच्यम्। अनित्यत्वप्रतिपादकश्रुतेः यद्यत्क्रियाजन्यं तत्तदनित्यमिति प्रत्यक्षदृष्टव्याप्त्युपोद्बलितत्वेन प्रबलत्वात्।

न च नित्यताप्रतिपादकत्वे अनुग्राहकं प्रमाणमस्ति, नित्यताश्रुतेःदीर्घकालमात्रपर्यवसन्नत्वात्। अश्वत्थामादिनित्यतावत्। अनित्यश्रुतेश्चान्यथयितुमशक्यत्वात्। अन्यथाभावस्य कुत्राप्यदर्शनात्।

न च तर्हि नित्यश्रुतेः स्वार्थप्रच्यवादप्रामाण्यप्रसङ्गः। रुच्युत्पादनद्वारा प्रवृत्त्युत्पादकतया तात्पर्यार्थाबाधात्। वाच्यार्थे तात्पर्याभावात्। अन्यथा चातुर्मास्यादावेव सर्वे प्रवर्तेरन्। नान्यत्र। श्रुतिश्चाथर्वणी, स्थूलारुन्धतीन्यायेन "मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा सन्ततानि। तान्याचरथ नियतं सत्यकामा" इति नित्यकर्मफलप्रेप्सोः कर्मकरणमुक्त्वा अनेन कृतेन किं नित्यं फलं भवतीत्याकाङ्क्षायां "एष वः पुण्यः सुकृतो ब्रह्मलोकः" इति ब्रह्मलोकं फलत्वेन निर्दिश्य ततः परं "प्लवा ह्येते अदृढा यज्ञरूपा" इत्यादिना यज्ञादीनामनित्यफलत्वं प्रदर्श्य तत्साधने पुरुषार्थसाधकत्वं मन्यमानस्य "जरामृत्युं ते पुनरेवापि यन्ति" इति संसारं प्रदर्श्य आत्मज्ञानमेव पुरुषार्थसाधनमाह—नास्त्यकृतः कृतेन तद्विज्ञानार्थमित्यादिना। अतो न वा धर्मफलस्य नित्यत्वम्। अतो न सुखसाधनत्वं धर्मस्य, अर्थकामयोस्तु प्रत्युक्तमेव। तथाच श्रुतिः—"नान्यः पन्था विद्यतेऽयनाय" इति एतेषां तत्साधनत्वनिषेधपुरस्सरं "तमेव विदित्वातिमृत्युमेति" इति ज्ञानस्यैव सुखसाधकत्वं दर्शयति। तत्फलस्य च नित्यत्वं प्रागेवोक्तम्। ज्ञानस्य साधनतोक्तिः औपचारिकीत्युत्तरत्र वक्ष्यते। अतस्साधनभूतज्ञानोपायमालोचयमाना भगवत्पादाः प्रस्थानत्रयात्मकं ग्रन्थं निर्मितवन्तस्तदनधि-

कारिका:

तत्रैव प्रोच्यतेऽपूर्वविधिर्मीमांसकैः परः । व्रीहीणां वितुषीभावः खण्डनेन नखेन वा ॥ २१ ॥
प्राप्तो नियम्यतेऽत्यर्थमवहन्तीति वाक्यतः । नैवमत्र तु रत्यादिसुखप्राप्तिः सदा भवेत् ॥ २२ ॥
संस्कारबलतो लोके स्तनपानप्रवृत्तिवत् । पाक्षिकी प्राप्तिरपि सा नास्त्येव परिसंख्यया ॥ २३ ॥
तत्र चान्यत्र च प्राप्तौ परिसंख्याविधिर्भवेत् । सर्वेषामामिषं भक्ष्यं रागतः प्राप्तमञ्जसा ॥ २४ ॥
तत्र पञ्चेति वाक्येन पञ्चैवेति नियम्यते । एवं सौत्रामणीवाक्यं न हिंस्यादिति चापरम् ॥ २५ ॥
निवर्तयेद्यथा शास्त्रमादरेणाविपश्चितम् । पूर्वकाण्डेऽपि सङ्कोचः कृत एवं हितावहः ॥ २६ ॥

किरणावली

कारिणां केषाञ्चित्संसारदारिद्र्यनिर्दहनाय तर्काकुलवीचीकलितात्पूर्वपक्षग्राहसमाकीर्णात्सिद्धान्तगम्भीरात्प्रस्थानत्रयपयोराशेः पञ्चरत्नमद्भुतमाददुः । तत्स्वभावतः सरलमपि केषाञ्चिन्मन्दमतीनां तदर्थाविष्करणाय प्रयतामहे। शास्त्रस्य तत्त्वबुभुत्सुकथारूपत्वात्तदेकदेशभूतस्यास्य तत्प्रकरणत्वात् प्रकरणस्य बालाधिकारतया बालस्य च जन्मान्तरकृतसुकृतमहिम्ना तज्जन्मकर्तव्यजिज्ञासासम्भवात्तादृशमेवावनतं शिष्यं गुरुरुपदिशति, सोपानारोहणन्यायेन पुरुषार्थसाधनानि क्रमेणोपदिदिक्षुः—वेदो नित्यमधीयतामित्यादिना—बालस्य आदितः कर्तव्यं दर्शयति—**वेद इति**। सार्थवादमन्त्रविधिकलापः। ब्राह्मणस्यापि विधिरूपत्वात्साङ्ग इति शेषः। अङ्गाध्ययनं विना ज्ञानानुपपत्तेः। अर्थज्ञानस्यानुष्ठानोपयोगित्वेनावश्यकत्वात्सूचयति मूलकारोऽध्ययनस्य ज्ञानपर्यन्तत्वं **स्वनुष्ठीयतामिति,** अर्थज्ञानाभावे सुष्ठ्वनुष्ठानानुपपत्तेः। अङ्गानि-शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति श्रुतिगृहीतानि, वेद इत्येकवचनं सामस्तवेदाध्ययनस्याभावेऽपि एकस्य वाऽध्ययनमावश्यकमिति सूचयितुम्।

"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्" ।

"अविप्लुतब्रह्मचर्यः" इति वचनादेकस्याध्ययनमिति स्वकुलीनादागतस्येति द्रष्टव्यम्। नित्यं=सर्वदा-विहितकाल इति शेषः। विहितेतरकाले निषेधात्।

आचार्यमष्टमी हन्ति शिष्यं हन्ति चतुर्दशी।
उभौ पञ्चदशी हन्ति प्रतिपत्पाठनाशिनी॥
मद्बोधने मच्छयने मदङ्गपरिवर्तने।
स्वाध्यायं न प्रकुर्वीत मन्वादिषु युगादिषु॥ इत्यादिवचनात्।

अधीयतां त्वयैवेति शेषः। अन्यत्रापि क्रियापदेषु त्वयेत्यध्याहार्यम्। श्रुतिश्च-स्वाध्यायोऽध्येतव्य इति अध्ययनकर्तव्यतां दर्शयति। ततश्चाधीताङ्गाद्वेदात्तदर्थज्ञानं जातं, ततो मम किं स्यादित्याकाङ्क्षमाणं शिष्यं प्रत्याह—**तदुदितं कर्म स्वनुष्ठीयतामिति**। तेनाधीतेन वेदेनोदितं विहितं कर्तव्यतया प्रतिपादितमिति यावत्। विहितं च द्विविधम्। प्रत्यक्षविधिविहितं अनुमेयविधिविहितं च। अर्थवादोन्नेयविधिविहितस्यापि सत्वात्। कर्म नित्यनैमित्तिकप्रायश्चित्तरूपं काम्यकर्मत्यागस्य काम्ये मतिस्त्यज्यतामित्युक्तत्वात्। नित्यं च कर्म द्विविधम्। श्रौतं स्मार्तं च। आद्यं अग्निहोत्रादि द्वितीयमौपासनादि च। नैमित्तिकं स्कन्नहोमोपरागस्नानादि। प्रायश्चित्तं च नैर्ऋतपश्वालम्भनादि

कारिका:

किमुतोत्तरमीमांसाराद्धान्ते तद्विशेषिणा ॥

त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् । त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥ २७ ॥
एवं वर्णाश्रमप्रोक्तं कर्म नित्यादिकं च यत् । तदेव साङ्गं कुर्वीत येन यज्ञः प्रसीदति ॥ २८ ॥
फलाभिसन्धिरहितमहंकर्तृत्ववर्जितम् । ॐ तत्सदिति निर्देशपूर्वकं कर्म आचरेत् ॥ २९ ॥
कारकः कर्म करणं सम्प्रदानं तथैव च । सर्वमोमिति सञ्चिन्त्य भक्त्या सर्वेश्वरेऽर्पयेत् ॥ ३० ॥
एवमन्यानि कर्माणि लौकिकान्यपि सर्वदा । ईश्वरायार्पयेद्विद्वान्येन बन्धाद्विमुच्यते ॥ ३१ ॥
सर्वकामपरित्यागे मतिं कुर्याद्दृढां तथा । तद्यथेत्यादिवचसा क्षयिष्णुत्वावलोकनात् ॥ ३२ ॥

किरणावली

स्वनुष्ठीयताम् । सुष्ठु अनुष्ठानं च कर्मणां साङ्गतयाऽनुष्ठानमेव । अङ्गवैकल्ये च कर्मणां सुष्ठुत्वानुपपत्तेः । श्रुतिश्च कर्मकर्तव्यतां दर्शयति—"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इति । एवमुक्तं भवति । साङ्गवेदाध्ययनानन्तरं तदर्थज्ञाने सति विद्वत्तायाः सम्पादितत्वादुद्वाहानन्तरं विशिष्टकुलप्रसूतेन त्वया अर्थिना समर्थेन सता साङ्गं कर्मानुष्ठेयमिति ।

ननु साङ्गकर्मानुष्ठानेन मम किमित्यत आह—**तेनेशस्य विधीयतामपचितिरिति** । तेन साङ्गमनुष्ठितेन कर्मणा ईशस्य = परमेश्वरस्य अपचितिः = पूजा विधीयताम् = विधानेन क्रियताम् । इति यावत् ।

ननु यज्ञादिकर्म स्वर्गाद्यर्थं भवति । "ज्योतिष्टोमेन स्वर्गकामो यजेत ।"

सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥

इति श्रुतिस्मृतिभ्याम् । अतस्तस्य कथं पूजार्थत्वं अन्यार्थस्यान्यार्थत्वानुपपत्तेः ।

न च नित्यानां कर्मणां निष्फलत्वात्स्वर्गाद्यर्थत्वानुपपत्तिः श्रुतिस्मृती च रुच्यर्थे पूर्णाहुतिवाक्यवत् । न च "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।" इति न्यायेन नित्यस्यापि प्रयोजनवत्त्वम् तदभावे प्रवृत्त्यनुपपत्तेरिति वाच्यम् । अकरणे प्रत्यवायश्रवणेन तन्निवृत्त्यर्थतया तत्र प्रवृत्तेरिति वाच्यम् ।

तर्हि तन्निवृत्त्या प्रयोजनवत्त्वेन निष्प्रयोजनत्वाभावाच्छ्रुतिस्मृतिसिद्धकार्यभावस्य स्वर्गादिः प्रयोजनत्वावश्यम्भावाच्च । पूर्णाहुतिवाक्यसिद्धस्य सर्वकामादेरितरकर्मसु यत्ननिवृत्त्यापादकतया इतरकर्मविधिवैयर्थ्यापादकत्वान्न प्रयोजनमिति चेन्न । यूपाद्यर्थस्य खदिरादेः वीर्याद्यर्थत्ववदत्रापि स्वर्गाद्यर्थस्य यागादेः पूजार्थत्वाविरोधात् ।

अपि च पूजा नाम नार्चा, अपितु फलत्यागः । एवं च यज्ञफलभूतस्य स्वर्गादेरीश्वरमुद्दिश्य स्वत्वत्यागसम्भवान्न पूजार्थत्वानुपपत्तिरिति ।

ननु तदुदितं कर्मेत्यत्र नित्यनैमित्तिकप्रायश्चित्तात्मकं कर्म कर्तव्यमिति प्रतिपादितम् । तदनुपपन्नम् । काम्यानामपि वेदोक्तत्वाविशेषतः कर्तव्यत्वात् । न च काम्यानां बन्धकत्वान्न कर्तव्यता

कारिकाः

प्लवा ह्येत इत्यपीदं श्रुत्युक्तमवलोकयेत् । अनर्थबहुलं दुःखमैहिकामुष्मिकं च यत् ॥ ३३ ॥
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥ ३४ ॥
फलाभिसन्धिरहिते तेऽपि कुर्यात्प्रयत्नतः । स संन्यासीत्यर्जुनाय हरिणोक्तं हितैषिणा ॥ ३५ ॥
निष्कामकर्मानुष्ठानाद्विशुद्धधिषणः पुमान् । ज्ञानानुत्पत्तिहेतूनि सर्वपापानि नाशयेत् ॥ ३६ ॥
ततस्तु दोषदृष्टिः स्यात्संसृतौ दुःखरूपता । सत्वशुद्धेः फलं दृष्टमुद्भवत्येव तत्क्षणात् ॥ ३७ ॥
अशुभे शोभनाध्यासो मनोमालिन्यमेव तत् । न भवेच्छुद्धचित्तस्य विरक्तस्य कथञ्चन ॥ ३८ ॥
परीक्ष्य लोकानित्यादिश्रुतिर्निर्वेदबोधिका । ब्रह्मात्मान्वेषणे बुद्धिस्ततः स्यान्मोक्षकारिणी ॥ ३९ ॥

किरणावली

आभिचारवदिति वाच्यम् । नित्यानामपि कर्मत्वाविशेषेण बन्धकत्वापत्तेः । आभिचारस्यानर्थजनकत्वस्य वेदेनैव प्रतिपादितत्वात् । काम्यानां तदप्रतिपादकत्वेन कर्तव्यत्वोपपत्तेः ।

न च नित्यानामफलत्वान्न बन्धकत्वं काम्यानां तु फलवत्त्वाद्बन्धकत्वं युक्तमेवेति वाच्यम् । चित्रया यजेत पशुकामः, विश्वजिता यजेत स्वर्गकामः इत्यादिवज्ज्योतिष्टोमेन यजेत स्वर्गकामः सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ इत्यादिश्रुतिबलान्नित्येऽपि फलसिद्धेः । इयानेव विशेषः । नित्यानामकरणे प्रत्यवायः । काम्याकरणे स नास्तीति ।

न च नित्यकर्मफलस्येश्वरार्पणसम्भवान्न तद्बन्धकमिति वाच्यम् । काम्येऽपि उक्तन्यायस्य तुल्यत्वात् । तथाच काम्यमपि कर्म अनुष्ठेयमेवेत्यत्राह—**काम्ये मतिस्त्यज्यतामिति।** काम्ये कर्मणीति शेषः । मतिः कर्तव्यताबुद्धिरिति यावत् । अयं भावः—"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन काम्यं कर्म कृत्वा तत्फलस्येश्वरार्पणापेक्षया काम्यकर्माकरणस्यैव युक्तत्वात् । "वीरहा वा एष देवानां योऽग्निमुद्वासयते" "अकुर्वन् विहितं कर्म" इत्यादिश्रुतिस्मृतिभ्यां नित्यनैमित्तिकाकरणेऽनर्थश्रवणेन तन्निवृत्यर्थतया, प्रायश्चित्ताकरणे तदनिवृत्या तेषां कर्तव्यतायां सिद्धायां यादृच्छिकफलस्य ईश्वरार्पणसम्भवादिति ।

ननु अतियत्नसाध्ययज्ञादिफलस्येश्वरार्पणे कृते सिद्धस्य परित्यागात् अन्यस्य कस्यचिदलाभात् "सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिः" इति न्याय आपन्न इत्यत आह—**पापौघः परिधूयतामिति** । तेनेत्यनुवर्तनीयम् । तेन ईश्वरमुद्दिश्य परित्यक्तफलेन कर्मणा पापानां पापफलानामन्तःकरणदोषाणां रागादीनां, ओघः सञ्चयः, परिधूयतां परित्यज्यतामिति यावत् । ईश्वरमुद्दिश्य फलत्यागेन चित्तगतदोषरूपानर्थनिवृत्तेः श्रेयोयोग्यताऽऽश्च सम्भवान्न त्वयोक्तन्यायावतार इति भावः ।

ननु यज्ञादिकर्मणां स्वर्गार्थत्वात्स्वर्गस्य च सुखरूपत्वेन पुरुषार्थत्वात्पुरुषार्थस्य कथं त्यागस्सम्भवतीत्यत आह—**भवसुखे दोषोऽनुसन्धीयतामिति** । भवे = संसारे, यत्सुखं = विषयजं तत्र दोषः अनित्यत्वं-दुःखसंपृक्तत्वं वा, अनुसन्धीयतां = अनुस्मर्यतां इति यावत् । अनित्यत्वं-विषयकालीनत्वाद्विषयाणां चानित्यत्वात् । तथा दुःखसंपृक्तत्वं च वैषयिकसुखार्थं प्रवृत्तस्य व्याध्याद्यनेकदुःखदर्शनात् । न च तस्य उपादेयत्वं सम्भवति विषसंपृक्तमधुवत् । तथाच स्वर्गसुखस्य अल्पवैषयिकत्वेनानित्यत्वादसुरादिनिमित्तपरिभवेन दुःखदर्शनेन तत्संपरीतत्वाच्च तस्य त्यागेन

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।
सद्विद्वानुपसेव्यतामनुदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २ ॥

कारिकाः

आत्मा वा अरे इत्यादि श्रुतिरात्मान्वेषणेन्मुखी । दोषदृष्टिजिहासाभ्यां गृहमेव त्यजेत्पुमान् ॥ ४० ॥
ते यथा वान्तमश्नन्ति श्रौतवाक्यबलेन च । यथैव काकविष्ठायामिति च स्मरणात्सुधीः ॥ ४१ ॥
परिग्रहादिकं सर्वं त्यजेन्निर्वेदतः सकृत् । संन्यासमेव गृह्णीयादरण्ये निवसेद्द्विजः ॥ ४२ ॥
अनन्तरं तु यत्कृत्यमुच्यते तदिहाधुना । चित्तैकाग्र्येण हे शिष्याः शृणुध्वं कथयामि वः ॥ ४३ ॥

श्रीमद्रामेन्द्रशिष्येण शिवेन परमादरात् ।
कारिकाः पञ्चरत्नस्य कृताः स्वज्ञानसिद्धये ॥ १ ॥

॥ इति प्रथमः श्लोकः ॥

ब्रह्मचारिगृहस्थानां वनस्थानां यथैव च । धर्माः प्रोक्तास्तथा न्यासः सोऽप्युक्तस्त्यागमात्रतः ॥ १ ॥
त्यागं नैव प्रकुर्वीत सतां ब्रह्मविदां वने । इत्येवमुच्यते तत्तु श्रूयतां सादरं वचः ॥ २ ॥

किरणावली

भवितव्यम् । एवं च स्वस्य द्रव्यस्य राजादिनिमित्तानर्थे दृष्टे सति सद्ब्राह्मणमाहूय दानवदीशमुद्दिश्य फलस्यापि त्यागसम्भवादिति भावः ।

ननु स्वर्गादिसुखस्यानित्यत्वादिदोषवत्त्वेन तस्य त्यागादन्यस्य कस्यचित्पुरुषार्थस्य अभावात् स्वस्य अकृतार्थत्वमेव स्यादित्याकुलितमन्तेवासिनं प्रत्यात्मैव पुरुषार्थः, अतस्तद्विषयेच्छा त्वया कार्या इत्याह—**आत्मेच्छा व्यवसीयतामिति** । आत्मविषयकेच्छा = स्वस्याभिलाषः व्यवसीयतां = निश्चीयतां—क्रियतामिति यावत् । आत्मनः पुरुषार्थत्वं च सत्यज्ञानानन्दस्वरूपत्वात् । सत्यत्वं च कालत्रयाबाध्यत्वम् । इदं च बाह्यवादिव्यतिरिक्तैः सर्वैरपि स्वीकृतमेव । ज्ञानत्वं च आदित्यादिज्योतिषां तेजसामपि भासकत्वात् । तथाच श्रुतिः—"तस्य भासा सर्वमिदं विभाति" इति । आनन्दत्वं च परमप्रेमास्पदत्वात् । तथाच आत्मनः पुरुषार्थस्य लाभात् न त्वया आकुलतया भवितव्यमिति भावः ।

ननु आत्मविषयकेच्छामात्रेण यदि पुरुषार्थः तर्हि गृहिणोऽपि ममात्मविषयकेच्छायाः सत्वेन पुरुषार्थलाभः स्यादित्यत आह—**निजगृहात्तूर्णं विनिर्गम्यतामिति** । निजं = स्वकीयं, यत् गृहं = वेश्म, तस्माद्विनिर्गम्यताम् = विशेषेण निर्गमनं च सर्वदा आसक्तिराहित्यं बोद्धव्यम् । अयं भावः । न केवलमात्मेच्छामात्रेण पुरुषार्थलाभः । अतिप्रसङ्गापत्तेः । अपितु तद्विचारात् ॥ १ ॥

न च आत्मविषयविचारो गृहासक्तिमतः सम्भवति, गृहिणः पुत्रभार्यादिषु व्याकुलचित्ततयैतद्विषयकविचारासम्भवात् । अतस्त्वया तद्विचारार्थं गृहान्निर्गमः कार्य एवेति । किं च तत्र दुस्सङ्गे

कारिका:

अस्यार्थः—

अरण्यवासिभिस्तत्र यतिभिः सङ्गतो भवेत् । सत्सङ्गाद्वासनात्यागाद्वैराग्यं सुदृढं भवेत् ॥ ३ ॥

ततस्तु भगवद्भक्तिर्भवेदव्यभिचारिणी । अनायासेन बोधाप्तिर्यया भवति केवला ॥ ४ ॥

भगवत्तोषकारीणि शारीरादीनि कानिचित् । तपांसि कुर्याच्छान्तः सन्सर्वदाऽभ्यासतत्परः ॥ ५ ॥

भक्तेर्विरक्तेः प्राबल्यात्कर्माण्यसुदृढं त्यजेत् । ज्ञानाविरोधि शान्त्यादि तत्तु नैव परित्यजेत् ॥ ६ ॥

श्रुतिर्वक्त्यकृतं मोक्षं सर्वधर्मानिति स्मृतिः । सलिङ्गानिति च प्राह भगवाञ्श्रीहरिः स्वयम् ॥ ७ ॥

किरणावली

सति दुष्टानां विषयलोलुपत्वात्तत्सङ्गिनस्तवापि तदासक्तिरेव स्यात् । तथाच आत्मविषयकविचारप्रच्युतेस्तवानर्थ एव प्रसज्येत, तदुक्तं भगवता—

सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥
स्मृतिभ्रंशाद्बुद्धिनाशः बुद्धिनाशात्प्रणश्यति । इति ।

तथाच तत्सङ्गपरित्यागेन सत्सङ्गः त्वया कार्यं इत्याह—**सङ्गः सत्सु विधीयतामिति**—सत्सु सत्पुरुषेषु सङ्गः सम्बन्धः सहवास इति यावत् । विधीयतां = क्रियतामिति यावत् ।

अयमाशयः । अत्र सन्तो नामात्मविषयकविचारवन्तः । एवं च सत्सङ्गेन तवापि तद्विषयकविचारः सुदृढो भवतीति ।

ननु दैवकृतविघ्नबाहुल्ये तद्विषयकविचारे प्रवृत्तिरेव नोदयमासादयेत् । अस्तु वा प्रवृत्तिः तथापि तत्फलं न सिद्ध्येत् । दैवबलाभावे सर्वस्य निष्फलत्वादत आह—**भगवतो भक्तिर्दृढाऽऽधीयतामिति** । भगः—"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसःश्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा" ॥ इति श्लोकोक्तवैराग्यादिषड्रूप इत्युच्यते । सोऽस्यास्तीति भगवान्षड्गुणैश्च सम्पन्नः । परिपूर्णः परमेश्वरः । अनेन भगवत्पादेन ईश्वरस्य सकलान्तरायनिवर्तनसामर्थ्यं द्योतितं भवति । तस्य परमेश्वरस्य भक्तिः तदेकचित्तता । दृढा = निश्चला । आधीयतां = क्रियतामिति यावत् । ततः निश्चलेन भगवद्ध्यानेन सूर्योदयेनेव तमोराशेरन्तरायराशेर्निवृत्तिसम्भवादात्मनि पुरुषार्थत्वनिश्चयवतः तत्साधनात्मज्ञानार्थं तद्विचारे प्रवृत्तिसम्भवादुपासनया प्रसन्नदेवप्रसादबलात्सफलत्वसम्भवाच्च न त्वदुक्तदोषावकाश इति भावः ।

नचेश्वरार्पणकर्मानुष्ठानादेवेश्वरप्रसादसिद्धेःकिमनया भक्त्येति वाच्यम्; अधिकं नैव दूष्यत इति न्यायेन भक्तेरप्युपयोगोपपत्तेः । प्रसादहेतुबाहुल्येन प्रसादाधिक्ये सति विघ्नस्यात्यन्तिकनिवृत्तेः सम्भवाच्चेति भावः ।

ननु रागादिकलुषचित्तस्य पुरुषार्थापुरुषार्थविचाराभावेन तज्ज्ञानाभावात्तत्साधने आत्मविचारे कथं प्रवृत्तिरित्याशङ्क्य कालुष्यनिवृत्त्युपायमाह—**शान्त्यादिः परिचीयतामिति** । शान्तिः = अन्तरिन्द्रियनिग्रहः । आदिशब्देन बहिरिन्द्रियनिग्रहो गृह्यते । इतरेषां साधनानां मूलकारणैव तत्र तत्र प्रतिपादितत्वात् । परिचीयतां = अभ्यस्यतामिति यावत् । तथाच अभ्यासेन शान्त्यादिलाभे कालुष्यनिवृत्तेः पुरुषार्थविचारयोग्यतायाश्च सम्भवात्तत्सिद्ध्यर्थं तद्विचारे प्रवृत्तिरुपपन्नैवेति भावः ।

कारिकाः

आचार्यमुपसृप्याथ कृत्वा तत्पादसेवनम् । श्रुतिराचार्यवान्वेद प्राहोपसदनं प्रति ॥ ८ ॥
उपदेक्ष्यन्ति ते ज्ञानमित्याह भगवानपि । यमोऽपि कठवल्लीषु प्राह प्राप्यवरानिति ॥ ९ ॥
सद्गुरोः सेवया भक्त्या प्रणिपातेन चासकृत् । सद्विद्वत्ते दुर्लभे द्वे विज्ञाय शरणं व्रजेत् ॥ १० ॥
श्रीगुरौ ब्रह्मदृष्ट्या तु साक्षाज्ज्ञानमवाप्यते । आचार्यं मां विजानीयादित्यादि च वचो हरेः ॥ ११ ॥
यस्य देवे परा भक्तिरिति च श्रुतिरब्रवीत् । तस्मै न द्रुह्येदिति च कृतमस्य सदा स्मरेत् ॥ १२ ॥
प्रश्नोपनिषदप्येवमाह हि त्वं हि नः पिता । अविद्यायास्तारयितेत्यादिका बहुशः श्रुतिः ॥ १३ ॥
अहर्निशं गुरोर्ध्यानं तन्नामस्मरणं जपः । शरीरेण च तद्यात्रा कार्या शिष्येण साधुना ॥ १४ ॥

किरणावली

न च पापौघः परिधूयतामित्यत्रैवेश्वरमुद्दिश्य फलत्यागादेव कालुष्यनिवृत्तेः प्रतिपादितत्वात्पुनस्तन्निवृत्यर्थं शान्त्यादिकथनवैयर्थ्यमिति वाच्यम् । ईश्वरार्पणकर्मानुष्ठानेन कालुष्यनिवृत्तौ शान्त्याद्यभ्यासो द्वारमित्यत्रैव तात्पर्यात् ।

अथवा—"पापौघः परिधूयता" मित्यत्र एवं व्याख्येयम्—ननु तदुदितं कर्मेत्यत्र प्रायश्चित्तकर्मादि कर्तव्यमित्युक्तम् । तन्निष्फलमित्यत आह—**पापौघः परिधूयतामिति** । पापानां = प्रमादकृतनिषिद्धकर्मणां, जन्मान्तरार्जितानां वा ओघः = सञ्चयः परिधूयतां = परित्यज्यतामिति । तथाच श्रुतिनिषिद्धकर्मनिवृत्तिफलत्वात्प्रायश्चित्तस्य तत्साधकत्वमेवेति न वैफल्यशङ्कावकाश इति भावः । एवं व्याख्याने च पापशब्दस्य मुख्यार्थः सम्भवतीति ध्येयम् ।

ननु श्रुतिविहितयज्ञादिकर्मस्ववश्यकर्तव्येषु तद्वैकल्यनिमित्तप्रत्यवायभयेन तदासक्तचित्तस्य कथमात्मविचारेऽवकाशः स्यादित्यत आह—**दृढतरं कर्माशु सन्त्यज्यतामिति** । आत्मविचारयोग्यताऽनन्तरमिति शेषः । नित्यनैमित्तिकादिकं सर्वकर्म, दृढतरमपि विहिततया परित्यक्तुमशक्यमपि बहुजन्मसु कृतमपि वा, आशु = शीघ्रतया, विहितं कर्म कथं परित्याज्यमित्यालोचनां परित्यज्यैवेत्यर्थः।

ननु विहितस्य कर्मणः कथं परित्यागः सम्भवति । अकरणे प्रत्यवायश्रवणात् । न च संन्यासविधायकशास्त्रबलात्तस्य त्यागो भविष्यति । अन्यथा तद्विधिवैयर्थ्यापत्तेः इति वाच्यम् । काम्यकर्मत्यागस्यैव संन्यासशब्दार्थत्वात्, तस्य च प्रत्यवायाभावेन परित्यागसम्भवात् । तदुक्तं च भगवता "काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" इति ।

न च कर्मत्यागस्यैव संन्यासशब्दार्थत्वेन काम्यकर्मण एव त्याग इति सङ्कोचे मानाभावः । तर्हि कर्मत्वाविशेषाल्लौकिकव्यापाराणामपि त्यागापत्तेः । न च तेषां त्यागानुपपत्त्या तद्व्यतिरिक्तस्यैव त्यागः संन्यासशब्दार्थ इति वाच्यं । तर्हि प्रत्यवायश्रवणेन नित्यानां कर्मणामपि त्यागासम्भवात् । एवं च कर्मत्यागस्य सङ्कोचे आवश्यके सति काम्यकर्मत्यागस्यैव संन्यासशब्दार्थत्वसम्भवादिति चेन्न । विहितस्यैव कर्मत्वेन सङ्कोचे मानाभावेन च सर्वकर्मत्यागस्यैव संन्यासशब्दार्थत्वाल्लौकिकव्यापारस्य च अकर्मत्वेन तत्त्यागस्याशब्दार्थत्वात् । संन्यासानन्तरं कर्माधिकाराभावेन नित्यादीनामनुष्ठानायोगादधिकारिणैव कर्मणामनुष्ठीयमानत्वात् । तथाहि—"केन भगवन्कर्माण्यशेषतो विसृजामी"ति कर्मत्यागप्रकारं पृष्टवन्तमारुणिं प्रति "तव पुत्रान्भ्रातॄन् बन्ध्वादीञ्छिखां यज्ञोपवीतं यागं सूत्रं अध्ययनं च" इति कर्माङ्गभूतशिखायज्ञोपवीतसूत्राध्ययनानां निषेधं प्रजापतिराह ।

कारिकाः

शिष्यः साधनसम्पन्नो गुणवान्विजितेन्द्रियः। विरक्तोऽमत्सरोऽदम्भी सर्वदा सद्गुरुप्रियः ॥ १५ ॥
नाविरत इति प्राह श्रुतिः शिष्यगुणान्बहून्। अधिकारी मुमुक्षुः सन्गुरुसेवारतो भवेत् ॥ १६ ॥
संसारानलतप्तः सन्पृच्छेदाचार्यमादरात्। को बन्धः का च मुक्तिः का विद्याऽविद्या च का प्रभो ॥ १७ ॥
एकाक्षरं ब्रह्म यच्च स्वामिन्नाचार्यवर्य भोः। अथोपदेशलाभात्तं प्रणवं हि जपेत्सदा ॥ १८ ॥
जपो द्वादशसाहस्रः प्रणवस्य भवेद्यतेः। महावाक्यार्थैकवाक्यतात्पर्यं प्रणवस्य यत् ॥ १९ ॥
अनुसन्धानपूर्वं तु कुर्याज्जपमतन्द्रितः। तदर्थमथ वा पृच्छेद्बृहिर्वृद्धौ प्रयुज्यते ॥ २० ॥

किरणावली

न हि वेदादिरहितस्य काम्ये नित्ये च कर्मण्यधिकारः सम्भवति। न चैवं नित्यकर्मत्यागे प्रत्यवायश्रवणं न स्यात्। यागादित्यागस्य त्वयैव विहितत्वोपपादनादिति वाच्यम्। अविधिपूर्वकत्याग एव प्रत्यवायश्रवणेन, विधिपूर्वकत्यागे तदभावाद्धार्यत्वेन विहितस्य कृष्णविषाणादेश्चात्वाले एव परित्यागस्येव।

न च अग्निष्टोमाद्यङ्गस्य विषाणादेरग्निष्टोमसमाप्तेस्त्यागः सम्भवतीति वाच्यम्। एवमविरक्तस्य यज्ञादिकर्मणां विधानेन विरक्तस्य तत्त्यागसम्भवात्, अधिकारिण एव तदकरणे प्रत्यवायश्रवणेन अनधिकारिणः तदयोगात् ब्राह्मणाधिकारके बृहस्पतिसवे क्षत्रियस्येव। अस्य च लोकाग्नीनुदराग्नौ समारोपयेत् इति अग्निसमारोपणश्रवणेन कलत्रं चेति कलत्रस्यापि परित्यागश्रवणेन अग्निकलत्ररहितस्य यज्ञादावनधिकारात्, गायत्रीं च स्वं च अग्नौ समारोपयेदिति गायत्र्या अप्युपसंहारश्रवणेन सन्ध्याकरणादौ दोषाच्च।

न च यज्ञादिविधिवैयर्थ्यं विधाय तस्य परित्यागश्रवणापेक्षया अविधानस्यैव युक्तत्वादिति वाच्यम्। अविरक्तस्य यत्किञ्चिद्विषयकप्रवृत्तिप्रसक्तौ यज्ञादौ नियम्यमानत्वात्।

न च निषेधे उपनिषदामप्यनध्ययनम्। तस्या अपि अध्ययनत्वादिति वाच्यम्। "न हिंस्यात् सर्वाभूतानि" इति भूतहिंसामात्रं प्रतिषिध्य अग्नीषोमीयं पशुमालभेतेति प्रतिप्रसववदत्रापि स्वाध्यायाध्ययनमात्रं निषिध्य प्रतिप्रसवेन सर्वेषु वेदेषु 'आरुणमावर्तयेदुपनिषदमावर्तयेदि'ति उपनिषदध्ययनविधानसम्भवात्। तथाच संन्यासविधिना नित्यकर्मत्यागसम्भवेन कर्मसु व्यासक्त्यसम्भवात् सावकाशतया आत्मविचारे निश्शङ्कप्रवृत्तिरुपपन्नेति भावः।

ननु अलौकिकपुरुषार्थविचारे कथं मम स्वत एव प्रवृत्तिस्स्यात् तज्ज्ञानाभावादित्याशङ्क्य अत एव तज्ज्ञानाभावेन स्वतः प्रवृत्त्यसामर्थ्येऽपि गुरूपदेशमाहात्म्यात्प्रवृत्तिसम्भवात्त्वया गुरुरुपसरणीय इत्याह—**सद्विद्वानुपसेव्यतामिति**। सन् यो विद्वान्सः उपसृप्यताम् = प्राप्यतामिति यावत्। तदुपसर्पणञ्च सोपहारं कार्यम्। "रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्" इति स्मृतेः, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठमि''ति श्रुतेश्च।

ननु मया गुरुरुपगतोऽपि किमर्थं ममोपदिशति। तस्य मदुपदेशेन प्रयोजनाभावात्। न च त्वया सोपहारत्वैव गतत्वात् त्वदुपहारं दृष्ट्वा तुष्टस्तव उपदेक्ष्यति इति वाच्यम्। विरक्तस्य तस्य त्वदुपहारेणापि प्रयोजनाभावात्।

न च कृपासागरस्य त्वद्दर्शनमात्रेणोपदेशः सम्भवतीति न त्वया विचारः कार्य इति वाच्यम्। कृपाया अपि सहेतुकत्वाद्दर्शनमात्रस्याप्यप्रयोजकत्वाच्चेत्यत आह—**अनुदिनं तत्पादुका सेव्यतामिति**।

कारिका:

देशेनानवच्छिन्नं यत् तद्व्यापकमिति स्मरेत् । शब्दादेवापरोक्षं तु भवेदिति विनिश्चयः ॥ २१ ॥
परोक्षत्वं तु शाब्दे यद्विषयव्यवधानतः । तस्यापि च परोक्षत्वाद्घटते तत्र चात्र तु ॥ २२ ॥
यत्साक्षादिति हि प्राह श्रुतिर्ब्रह्मैव सन्निति । शब्दादेवेत्ति कृष्णश्च सूत्रमाहापरोक्षकम् ॥ २३ ॥
तन्महावाक्यतो भूयाच्छान्दोग्योपनिषद्भवात् । वाक्यं तदेव गृह्णीयादन्यान्यपि विचारयेत् ॥ २४ ॥
त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्या विधीयते यस्मात्तत्यागी पतितो भवेत् ॥ २५ ॥
एवं वाक्यश्रुतेः पश्चाद्वाक्यार्थं हि विचारयेत् । तं तु पद्ये तृतीयेऽस्मिन्संक्षेपेण वदामि वः ॥ २६ ॥

श्रीमद्रामेन्द्रशिष्येण शिवेन परमादरात् ।
कारिकाः पञ्चरत्नस्य कृताः स्वज्ञानसिद्धये ॥ २ ॥

॥ इति द्वितीयः श्लोकः ॥

किरणावली

तस्य = गुरोः, पादुका = पादारविन्दं पादुकाशब्देन पादाधारवस्तुवाचिना पादारविन्दस्य लक्ष्यमाणत्वात् । अनुदिनं = प्रतिदिनं । तथाच स्वपादुकासेवनेन गुरोः कृपासम्भवः । त्वां दीनं उपदेक्ष्यतीति भावः ।

ननु अर्थिनां खलूपदिशति गुरुः, मया च किमर्थ्यमित्यत आह—**ब्रह्मैकाक्षरमर्थ्यतामिति ।** एकं = मुख्यं–मुख्यार्थप्रतिपादकत्वात् । अक्षरं = ब्रह्म इत्येवं रूपं यस्य तत् एकाक्षरं ब्रह्म । ब्रह्मेतिपदस्य अर्थः, अर्थ्यतां = प्रार्थ्यतामिति, तथाच सार्थब्रह्मपदोपदेशे तदर्थस्य ज्ञातत्वेन तद्विषयकविचारसम्भवादिति भावः ।

यद्वा ब्रह्मणस्तदेकमक्षरं वर्णात्मकमोङ्काररूपं तत्पदार्थमर्थ्यतामिति । अत्राप्यभिप्रायः पूर्ववदेवोन्नेयः ।

अथवा एकं च, तदक्षरं चेति विशेषणसमासः । एकं = सजातीयविजातीयस्वगतभेदरहितं न क्षरति = न नश्यतीति अक्षरं यद्ब्रह्म तदर्थ्यतामिति ।

नन्वेतद्ब्रह्म मया अर्थितं तद्गुरुः कथं ममोपदेक्ष्यति । तस्योपदेशायोग्यत्वादिति पृष्टवन्तं शिष्यं प्रति तत्प्रतिपादकं वाक्यमुपदिशति—**श्रुतिशिरोवाक्यं समाकर्ण्यतामिति** । श्रुतेःशिरः अन्तदेशः पर्यवसानदेशः वेदान्तः वेदमात्रस्य ब्रह्मण्येव पर्यवसन्नत्वेन तत्प्रतिपादकत्वेन वेदान्तस्य वेदपर्यवसानदेशत्वमुपपद्यते ।

यद्वा श्रुतेः शिरः उत्तमप्रदेशः वेदान्तः तस्य सर्वोत्तमब्रह्मप्रतिपादकत्वेनोत्तमत्वात् । तस्य यद्वाक्यं तत्त्वमसीत्यादिरूपं स्वस्वोपनिषदुक्तं तत्, समाकर्ण्यतां सम्यक् = सावधानेन आकर्ण्यतां = श्रूयतामिति यावत् । ततश्च व्युत्पन्नस्य तव वाक्यश्रवणमात्रेण तदर्थनिश्चयो भवेदिति भावः ।

ननु वाक्यस्य योऽयमर्थः तत्त्वमसीत्येवंरूपः स न सम्भवति त्वंशब्दस्य जीववाचित्वात्तस्य च कर्तृत्वभोक्तृत्वकिञ्चिज्ज्ञत्वादिविशिष्टत्वात्तच्छब्दस्य चेश्वरवाचकत्वात्तस्य च कर्तृत्वभोक्तृत्वादिरहितत्वात्सर्वज्ञत्वजगत्कारणत्वादिविशिष्टत्वाच्च । न च तयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोः कथमप्यसिपदेनाभेदो बोधयितुं शक्यः, विरुद्धस्वभावत्वात्, विरुद्धस्वभावयोश्च तेजस्तमसोरभेदादर्शनात् ॥ २ ॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् ।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादस्समुत्सृज्यताम् ॥ ३ ॥

कारिकाः

विना पदार्थबोधं हि वाक्यार्थो नैव लभ्यते । अतस्तु तत्त्वंपदयोरर्थं शृणुत वत्सकाः ॥ १ ॥
तत्पदार्थः परोक्षो हि परमात्मा नियामकः । सर्वज्ञः सर्वकर्ता च स तु वाच्यार्थं उच्यते ॥ २ ॥
इदमत्र तात्पर्यम्—
उपाधिरहितः शुद्धो नित्यमुक्तः परेश्वरः । स तु तत्पदलक्ष्यार्थोऽपरोक्षत्वेन सम्मतः ॥ ३ ॥
एकत्वमेव वाक्यार्थस्तृतीयपदनिश्चितः । अखण्डैकरसत्वेन सोऽयमित्यादिवन्मतः ॥ ४ ॥
लक्षणाद्वयमप्यत्र नास्त्येवात्र विरोधतः । भागत्यागा तृतीया तु सम्भवेल्लक्ष्ययोर्द्वयोः ॥ ५ ॥
सामानाधिकरण्यं च विशेषणविशेष्यता । अनुकूलतया सर्वाण्यपि वेद्यानि कुत्रचित् ॥ ६ ॥
ऐक्येन तु परोक्षत्वं तत्पदार्थस्य बाध्यते । त्वमर्थस्यापि दुःखित्वपरिच्छिन्नत्वबाधतः ॥ ७ ॥
अद्वयानन्दरूपं यत्तदेवाहमिति स्फुरेत् । मुख्यस्याधिकृतः पक्वकषायस्य विपश्चितः ॥ ८ ॥

किरणावली

न च जीवे किञ्चिज्ज्ञत्वादेरीशे सर्वज्ञत्वादेश्च बाधे चैतन्यस्वरूपमात्रयोरभेदोऽविरुद्ध इति वाच्यम् । प्रमाणसिद्धधर्माणां बाधायोगात् । अन्यथा घटपटत्वादिधर्माणां बाधे स्वरूपस्यैकत्वसम्भवेन तयोर्भेदो दत्तजलाञ्जलिस्स्यात् । यदि च प्रमाणसिद्धस्य भेदस्य परित्यागः तर्हि नाहमीश्वर इति प्रमाणसिद्धस्य जीवभेदस्य परित्यागायोग इति चेन्नेत्याह—**वाक्यार्थश्च विचार्यतामिति ।**

असम्भावनानिवृत्तिपर्यन्तमिति शेषः । वाक्यस्य=तत्त्वमसीत्यादिरूपस्य योऽर्थः जीवपराभेदरूपः सः विचार्यः । तदर्थोऽप्येवंरूप इति निश्चेय इति द्योत्यते । अयं भावः—तत्त्वंपदवाच्यार्थयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोः भेदसम्भवेऽपि लक्ष्यार्थयोरभेदः सम्भवत्येव । यथा तद्देशतत्कालैतद्देशैतत्कालविशिष्टदेवदत्तस्वरूपयोरभेदासम्भवेऽपि सोऽयं देवदत्त इति देवदत्तस्वरूपमात्रस्य लक्ष्यस्यैकत्वबोधः तद्वत् । न हि घटपटयोरभेदबोधकं प्रमाणमस्ति । येन लक्षणयाऽभेदबोधस्स्यात् । न च सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविशिष्टजीवेशस्वरूपव्यतिरेकेण जीवेशस्वरूपं नास्त्येव येन तल्लक्ष्यं स्यादिति वाच्यम् । दृश्यमानजीवेशरूपस्य कल्पितत्वेन तदधिष्ठानस्य पारमार्थिकस्यावश्यमङ्गीकरणीयत्वात् । तथा हि—न देहो जीवः, उत्पत्तिविनाशवतः तस्य जीवत्वे कृतहानाकृताभ्यागमप्रसङ्गात् । इन्द्रियाणां परस्परविलक्षणकार्यकर्तॄणां तेषां योऽहं रूपमद्राक्षं स एवेदानीं स्पृशामीत्येकत्वेन प्रत्यभिज्ञानविषयत्वायोगात् । न मनः । मम मनः इति भिन्नत्वेनानुभवात् । नाहङ्कारः, जाग्रत्स्वप्नसुषुप्तिषूत्पत्तिविनाशानुभवेन कालत्रयावस्थायिजीवस्वरूपत्वायोगाच्छून्यत्वे स्वस्यैवासत्त्वप्रसङ्गात् । अतः परिशिष्टं किञ्चिद्रूपमङ्गीकरणीयम् । तदेव पारमार्थिकं रूपं जीवस्य । एवं प्रपञ्चस्य दृश्यत्वादसच्चेन्न प्रतीयेत शशशृङ्गवत् । सच्चेन्न नश्येद्ब्रह्मवत् सत्वमसत्वं चैकस्य विरुद्धमित्यतः अनिर्वचनीयत्वाच्छुक्तिरजतवत्कल्पितत्वमेव । तत्कारणत्वं च कल्पितमेव सर्वज्ञत्वादिकं तु दूरत एव । अतस्त-

कारिका:

महावाक्यं द्वितीयं तु याजुषं हीदमेव तत् । अर्थमाहाखण्डरसमद्वयानन्दलक्षणम् ॥ ९ ॥
बह्वृचामपि वाक्येन ब्रह्मता वृत्तिसाक्षिणी । बोध्यतेऽथर्वशिरसि अयमात्मेति हि श्रुतेः ॥ १० ॥
अवान्तरपदानां तु महातात्पर्यमिष्यते । तदर्थे च त्वमर्थे च लक्ष्यार्थं इति निश्चयः ॥ ११ ॥
श्रुतिस्तत्त्वमसीत्याह प्रज्ञानं ब्रह्म इत्यपि । अयमात्मेति च परमहं ब्रह्मास्मि तत्त्वतः ॥ १२ ॥
श्रौतस्सुपक्ष एवायं स एवाश्रीयतां बुधैः । ब्रह्मादिस्थावरान्ताश्च परे विप्रतिपत्तयः ॥ १३ ॥
पुत्रादिशून्यपर्यन्ता जीवे विप्रतिपत्तयः । ताः सर्वा विनिवार्या वै याभिः सन्दिह्यते मनः ॥ १४ ॥
देहभेदादेव भेदो जीवानां प्रायशो मतः । ईश्वरस्यापि सार्वज्ञ्यं मायोपाधिकमञ्जसा ॥ १५ ॥
एवमेव श्रुतेः पक्षो भेदस्त्वौपाधिकस्तयोः । सन्देहो नात्र कर्तव्यो मुमुक्षुभिरतन्द्रितैः ॥ १६ ॥
तमेवैकं जानथेति अन्या वाचो विमुञ्चथ । श्रुतिराह स्मृतिरपि पलालमिति चाब्रवीत् ॥ १७ ॥
अत्र दुस्तर्कसञ्चारो बहुधा वादिभिः कृतः । वेदबाह्यैर्वैदिकैश्च स नाङ्गीकार्यः एव नः ॥ १८ ॥

किरणावली

त्कल्पनाधिष्ठानं तु किञ्चिद्रूपं अङ्गीकरणीयम् । निरधिष्ठानभ्रान्तेरभावात् तदेव पारमार्थिकं रूपमीशस्य । नह्युक्ते जीवेश्वरस्वरूपे पारमार्थिके किञ्चिज्ज्ञत्वसर्वज्ञत्वादीनां सम्भवः । सोपाधिकधर्मत्वात् । न हि सोपाधिकधर्मस्य निरुपाधिके सम्भवः। न हि जपाकुसुमयुक्ते स्फटिके प्रतीयमानस्य लोहितस्य तद्वियुक्ते संभवः । तद्वदत्रापि अन्तःकरणमायोपाध्यवच्छिन्नयोस्तत्सम्भवेऽप्युपाधिविनिर्मुक्तयोः तदसम्भवात् । श्रुतिश्च—"यत्र वा अन्यदिव स्या"दित्यादिना इवशब्देन द्वैतस्य प्रातीतिकत्वं प्रदर्श्य परमार्थतः तदपि निषेधति "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्यादिना । अतः कथं जीवेशभेदसम्भवः ।

किञ्च भेदस्य पारमार्थिकत्वे "उदरमन्तरं कुरुते, अथ तस्य भयं भवती"ति भेदज्ञानवतोऽनर्थप्रदर्शनं न स्यात् । विद्यमानस्य भेदस्य यथावत् ज्ञातत्वेनानर्थानुपपत्तिः । विपरीतज्ञानिन एवानर्थ इत्यस्य रज्जुसर्पज्ञानिनि दृष्टत्वात् । तथा अभेदस्यापारमार्थिकत्वे तज्ज्ञानिनः "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य" इति तस्य पुरुषार्थप्राप्तिश्रवणं न स्यात् । तस्य विपरीतज्ञानित्वात् । नाहमीश्वर इति प्रत्यक्षस्य तत्त्वमसीत्यभेदबोधकवाक्येन प्रत्यक्षसिद्धचन्द्रप्रादेशिकत्वस्याष्टाशीतिसहस्राणि विस्तीर्ण इति शब्देनेव बाधसम्भवात् । स एष नेति नेतीत्यादिना आत्मस्वरूपव्यतिरिक्तस्य असत्वप्रतिपादनेन किञ्चिज्ज्ञत्वसर्वज्ञत्वादीनामपारमार्थिकत्वस्य स्वतः एव सिद्धत्वात् । एवं च त्वंशब्दस्य सोपाधिककिञ्चिज्ज्ञत्वादिविशिष्टे शक्तावप्युपाधिविनिर्मुक्ते लक्षणासम्भवात्, तच्छब्दस्य च सोपाधिकसर्वज्ञत्वादिविशिष्टे शक्तावपि तादृशोपाधिविनिर्मुक्ते लक्षणासम्भवात्तयोश्च लक्षितस्वरूपयोः असिपदेनाभेदबोधसम्भवात्पूर्वोक्तासम्भावनां उक्तप्रकारेण विचारेण निवार्य पदार्थवाक्यार्थसम्भावनां निश्चिन्वन्ति ।

ननु अनेकैर्महर्षिभिः अनेकधाऽऽत्मस्वरूपस्य पुरुषार्थस्वरूपस्य च प्रतिपादितत्वात् त्वदुक्तप्रकार एव कथं ग्राह्य इत्यत आह—**श्रुतिशिरःपक्षस्समाश्रीयतामिति** । श्रुतिशिर इत्यस्य पूर्वमेवार्थो वर्णितः । तस्य योऽयं पक्षः तात्पर्यविषयीभूतार्थरूपः । समाश्रीयतां सम्यगाश्रीयताम् । तस्य सम्यगाश्रयणं च तदुक्तार्थस्यैव ग्रहणम् । अयं भावः—

कारिकाः

नैषा तर्केणेति पुनः श्रौतमाहानुशासनम् । मृत्योः स मृत्युमाप्नोति मह‌द्भयमिति श्रुतिः ॥ १९ ॥
यदा ह्यस्मिन्निति तदा भयङ्करमिदं जगौ । भीषास्मादिति सर्वेषां भेदभाननिवारिणी ॥ २० ॥
एवं दुस्तर्कविरमे श्रौतस्तर्कः स कीदृशः । चिन्तनीयः सदैवायं वेदवादिभिरादरात् ॥ २१ ॥
यथा घटशरावादि मृन्मयं भासतेऽखिलम् । तथैव विश्वं सकलं ब्रह्मैवास्ति न चेतरत् ॥ २२ ॥
सुवर्णज्जायमानस्य सुवर्णत्वं हि शाश्वतम् । ब्रह्मणो जायमानस्य ब्रह्मत्वमिति निश्चयः ॥ २३ ॥
तस्य त्वमिति केचित्तु दुस्तर्कं तर्कयन्ति हि । अन्ये तस्मिंस्त्वमिति च साहश्यमथ केचन ॥ २४ ॥
मध्वरामानुजाद्यास्तु अतत्त्वमसिवादिनः । अन्यथा कुर्वते तर्कं तर्हि तैर्विवदेत्सुधीः ॥ २५ ॥
प्रमाणे वा प्रमेये वाऽसम्भवं भावयन्ति हि । विपरीतां भावनां वा न तां कुर्वीत साधकः ॥ २६ ॥
दाढर्येन श्रवणादीनां भावनात्रयनाशनम् । भवत्येव ततो ब्रह्मास्मीति नित्यं विभावयेत् ॥ २७ ॥
प्रतिमादिषु विष्ण्वादिबुद्धिवन्नैव भावयेत् । यतो ह्यारोपिता बुद्धिः स्वतः सिद्धस्य नास्ति सा ॥ २८ ॥

किरणावली

"श्रुतिस्मृतिविरोधे च श्रुतिरेव बलीयसी" इति न्यायेन श्रुतेः बलवत्प्रमाणत्वेन तदुक्तार्थस्यैव ग्राह्यत्वात् । महर्षिप्रणीतस्य स्मृतिरूपत्वेन दुर्बलत्वात्तदुक्तार्थस्य अग्राह्यत्वात् । तथाच दुर्बलस्मृत्युक्तं पक्षं परित्यज्य श्रुतिशिरःसम्मतं मदुक्तार्थमेव गृहाणेति ।

ननु महर्षिप्रणीतमपि युक्तियुक्तत्वाद्ग्राह्यमेव । तथाहि—आत्मा प्रतिशरीरं भिन्नः सुखदुःखवैचित्र्यदर्शनेन आत्मैकत्वे तदनुपपत्तेः आत्मा कर्ता, अचेतनस्य कर्तृत्वादर्शनात् । तथासति तृणादीनामपि कर्तृत्वापत्तेः । अत एव तस्य भोक्तृत्वं, अन्यस्य भोक्तृत्वेऽतिप्रसङ्गापत्तेः । दुःखाभाव एव पुरुषार्थः । सुखस्य दुःखसम्पृक्तत्वेन परित्याज्यत्वेनापुरुषार्थत्वात् विषसम्पृक्तमधुवदित्यादियुक्तियुक्तमुपादेयम् । "युक्तियुक्तमुपादेयं वचनं बालकादपि" इति न्यायात् । तथाच तदुक्तार्थस्य श्रुत्यपेक्षया दुर्बलत्वेऽपि ग्राह्यत्वमेवेत्यत आह—**दुस्तर्कात्सुविरम्यतामिति** । दुष्टः आभासः श्रुतिविरुद्धः इति वा, तर्कः=युक्तिरूपः, यस्य महर्षिप्रणीतस्य तस्मात्=दुस्तर्कात् । सुविरम्यतां=सुष्ठु विरम्यताम् ।

सर्वदा इच्छाभाव एव विरामस्य सुष्ठुत्वं बोध्यम् । अयंभावः । उक्तयुक्तिश्च आभास एव, तथाहि—"कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति कामादीनां मनोधर्मत्वप्रतिपादनेन सुखदुःखयोरपि तद्वृत्तिरूपत्वेन तद्धर्मत्वात्तद्वैचित्र्यस्य प्रतिशरीरं मनोभेदापादकत्वेऽप्यात्मभेदानापादकत्वादचेतनस्य शरीरादेरेव कर्तृत्वदर्शनात् । तृणादीनां च चेतनसन्निधानविशेषाभावेनाकर्तृत्वोपपत्तेः आत्मसन्निधानविशेषस्यैव कर्तृत्वप्रयोजकत्वात् । अकर्तृत्वादेवाभोक्तृत्वात् । वैषयिकसुखस्य दुःखसङ्कलितत्वेऽपि नित्यसुखस्य तदभावात् । नित्यसुखस्य "विज्ञानमानन्दं ब्रह्मे"ति श्रुतिसिद्धस्य निरसितुमशक्यत्वादाभासत्वमुक्तयुक्तिनिचयस्य बोध्यम् । श्रुतिविरुद्धता च "द्वितीयाद्वै भयं भवती"ति भेदमात्रनिषेधेनात्मभेदस्य सुतरामनुपपत्तेः । आत्मनो ब्रह्मभेदप्रतिपादने कर्तृत्वादेः श्रुतिविरुद्धत्वाद्ब्रह्मविदाप्नोति पर इति ब्रह्माप्तेरेव पुरुषार्थश्रवणाच्चेति द्रष्टव्यम् । तथाच श्रुतिविरुद्धं आभासयुक्तिसङ्कलितं तद्वाक्यमनादेयमेवेति । एवं दुस्तर्कसङ्कलितवाद्युक्तिविरामोक्त्या त्वयापि दुस्तर्कानुसन्धानं न कार्यमिति द्योतितम् ।

कारिका:

अविद्याव्यवधानात्तु नास्मीति प्रत्ययो भवेत् । तद्बाधे त्वहमेवास्मीत्येवमेव विनिश्चयः ॥ २९ ॥
ब्रह्मैव सन्निति तथा आत्मैवेदमिति श्रुतिः । ब्रह्म वा इदमित्यादौ स्वतःसिद्धत्वमाह हि ॥ ३० ॥
परं त्वहरहर्गर्वं त्यजेत्पण्डित आत्मवान् । दीनस्य राज्यलाभादौ न तथात्र तु सिद्धता ॥ ३१ ॥
विजातीये शरीरादौ नाहमस्मीति चिन्तनात् । मुमुक्षोर्न भवेद्गर्वः क्षणमात्रमपीह सः ॥ ३२ ॥
एवं स्वरूपावस्थित्या बुधैर्वादं न कारयेत् । इति ज्ञाते परे तत्त्वे प्रश्नस्य वचनस्य च ॥ ३३ ॥
ज्ञानस्य च मुमुक्षूणां विषयो नैव विद्यते । ज्ञानमात्रमहं विद्यात्स्वप्रकाशं निरञ्जनम् ॥ ३४ ॥
प्रमातृत्वाद्यसंस्पृष्टं परानन्दात्मविग्रहम् । अहमेव हि सर्वेषामात्मा सर्वशरीरिणाम् ॥ ३५ ॥
देहातीतो देहसाक्षी देही वा भामि देहिनाम् । स एव परमात्माऽहं दृष्टो वै वेदवादिभिः ॥ ३६ ॥
एवं सति सुखेनैव विचरामि महीमिमाम् । केन वाऽथ कथं वाऽपि किमर्थं विवदाम्यहम् ॥ ३७ ॥

किरणावली

ननु यदि दुस्तर्काद्विरामः तर्हि किं तर्कत्वाद्यविशेषात्सुतर्केऽपि विरमः कार्यं इत्यत आह—**श्रुतिमतस्तर्कोऽनुसन्धीयतामिति** । श्रुतिमतः = सम्मतः श्रुतितात्पर्यार्थानुगुण इति यावत् । तर्कः = अनुमानम् । अनुसन्धीयताम् = अनुस्मर्यतामिति । अयंभावः—श्रोतव्यो मन्तव्य इति श्रवणानन्तरं मननविधानेन मननस्य युक्त्यनुचिन्तनरूपत्वेन श्रुतार्थदार्ढ्यार्थतया आवश्यकत्वेन श्रुत्यादयो अनुभवादयश्च यथासम्भवमिह प्रमाणं इति भाष्येण श्रुत्यतिरिक्तप्रमाणस्वीकारेण तस्य आवश्यकत्वेन दुस्तर्कस्य श्रुत्यर्थविरोधित्वेन परिहार्यत्वेऽपि सत्तर्कस्त्वया अवश्यमिह अनुसन्धेय एवेति ।

ननु उक्तविचारेण असम्भावनाया निवृत्तत्वेनाहं ब्रह्मास्मीति निश्चये जातेऽपि देहादावहमभिमानेन तत्र च आत्मनिश्चयसत्वेन स्वस्य ब्रह्मत्वनिश्चयस्यानेनाभिभूतस्य च कार्यजननासामर्थ्ये-नोत्पन्नोऽपि ब्रह्मत्वनिश्चयः निष्फलस्स्यात् । तथाच तदर्थविचारोऽपि निरर्थक एव स्यादित्यत आह—**ब्रह्मास्मीति विभाव्यतामिति** । अनुदिनमित्यध्याहार्यम् । ब्रह्म निरस्तनिखिलोपाधिकं चैतन्यं सकलरूपं सत्तात्मकं, तदहमस्मीति विभाव्यताम् । विशेषेण भावना क्रियतामिति यावत् । भावनाया विशेषस्य वा सार्वकालिकत्वं बोध्यम् । एवं च सार्वकालं श्रुत्युक्तब्रह्मध्यानेन तद्विषय-निश्चयस्य रूढत्वसम्भवादिति भावः ।

ननु त्वदुक्तप्रकारेण वाक्यं सार्थकं श्रुतवतः तदर्थविचारेणासम्भावनां निवर्तितवतः तदर्थ-ध्यानेन तदर्थनिश्चयदार्ढ्यवतो मम को वा समान इत्यभिमानिनं अन्तेवासिनं प्रति ज्ञानित्वादीनां निर्धर्मके आत्मन्यसम्भवादन्तःकरणनिष्ठत्वेन तव तद्धर्माभिमाने सत्यज्ञत्वमेव प्रसज्येत । तथाच अज्ञाननिवृत्त्यर्थो विचारादिप्रयासो निष्फलः स्यात्, अतस्त्वया तत्त्यागः कार्यं इत्याह—**अहरहर्गर्वः परित्यज्यतामिति** । गर्वः = ज्ञानित्वाभिमानः, अहरहः = प्रतिदिनं, जायमान इति शेषः । तथाच अभिमाननिवृत्तौ अज्ञानाद्यप्रसक्तेर्विचारादिः सार्थक एव स्यादिति भावः ।

ननु पूर्वोक्तपरिपन्थिभूतदेहात्मज्ञाने सति त्वदुक्तब्रह्मध्यानेन कथं निश्चयः वृथा भवेदित्या-शङ्क्य तत्त्यागपूर्वकमेव त्वया ध्यानं कार्यम् । अन्यथा ध्यानत्वव्याहतेरित्यभिप्रेत्याह—**देहेऽहंमति-रुज्झ्यतामिति** । देहे = स्थूले सूक्ष्मे च, अहंमतिः = अहमिति मतिः, उज्झ्यतां = परित्यज्यतामिति, तथाच तत्त्यागपूर्वकमेवात्मध्यानेन देहात्मज्ञानप्रच्यवादात्मज्ञानमेव दृढं भवतीति भावः ।

क्षुद्व्याधिश्च चिकित्स्यतामनुदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं नतु यत्यतां विधिवशात्प्राप्तेन सन्तुष्यताम् ।
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां
शीतोष्णादि विषह्यतां नतु वृथा वाक्यं समुच्चार्यताम् ॥ ४ ॥

कारिकाः

अहमेको न मे कश्चिद्यस्य मे नास्ति कश्चन । तं न पश्यामि यस्याहं तं न पश्यामि यो मम ॥ ३८ ॥
यत्र त्वस्य सर्वमिति दृश्यापेतत्वमाह हि । श्रुतिर्द्वैतादिबाधेन ततो वादं समुत्सृजेत् ॥ ३९ ॥
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किं । आत्मना पूरितं सर्वं महाकल्पाम्बुना यथा ॥ ४० ॥
स्वरूपावस्थितौ मोक्षे जाते सति विचक्षणः । प्रारब्धक्षपणं कुर्वन्न स लिप्यति कर्हिचित् ॥ ४१ ॥
एवं तृतीयश्लोकार्थः समाप्तिमगमद् ध्रुवम् । वाक्यार्थनिश्चयेनासौ सर्वबन्धविमोकतः ॥ ४२ ॥

श्रीमद्रामेन्द्रशिष्येण शिवेन रचिता मया ।
कारिकाः पञ्चरत्नानां ताभिस्तुष्यतु शङ्करः ॥ ३ ॥

॥ इति तृतीयः श्लोकः ॥

अथैवं सति शारीरयात्रापि न भवेद्यतः । ब्रह्मानन्दैकमग्नस्य द्वैताभावाद्विपश्चितः ॥ १ ॥
इदमत्राकूतम्—
पूर्वसंस्कारवशतः कथंचिल्लौकिकादिकम् । ज्ञानिनोपि भवेत्कर्म न भवेद्वा समाधिना ॥ २ ॥
तत्रोत्थानदशायां तु क्षुद्व्याध्यपनये यतेत् । भिक्षौषधं चिकित्सा तु कार्या मस्करिभिः सदा ॥ ३ ॥

किरणावली

ननु आत्मस्वरूपस्य सम्यक्परिज्ञातत्वेन ये हि आत्मस्वरूपविपरीतवादिनः ते मया जेतव्या इत्युक्तवन्तं शिष्यं प्रति तैस्साकं वादस्यापि जयपराजयहेतुभूतस्य जयपराजयजन्यसुखदुःखद्वारा जितोऽस्मि मत्समानः कोऽपि न विद्यया; पराजितोऽस्मि तुच्छा मदीया विद्या इतः परं दृढमभ्यस्यामीत्याद्यभिमानापादकत्वात्सोऽपि त्याज्य एवेत्याह—**बुधजनैर्वादः परित्यज्यतामिति ।** वदति वादः विवादः = कलहः इति यावत् । तथाच त्यागे न तवाभिमानप्रसक्तिरिति भावः ॥ ३ ॥

ननु अस्तूक्तरीत्या विचारसाचिव्यम् । तथाऽपि कथमात्मविचारे मनोनैश्चल्यं सिध्यति । क्षुद्व्याधिभ्यां परिपीडितस्य पुरुषस्य तदाक्रुष्टमानसत्वादन्याक्रुष्टमनसः अन्यत्र मनोनैश्चल्यायोगादित्यत आह—**क्षुद्व्याधिश्च चिकित्स्यतामिति ।** क्षुद्व्याधिश्चेति भेदः चकारस्वारस्याच्चिकित्स्यतामित्येतदावृत्या योज्यम् । क्षुच्च चिकित्स्यतां व्याधिश्च चिकित्स्यतामिति ।

ननु काभ्यां तौ निवार्यौ निवारितावपि पुनरुत्पन्नौ कथं निवारितौ भवत इत्याशङ्क्याह—**अनुदिनं भिक्षौषधं भुज्यतामिति ।** अनुदिनं = प्रतिदिनं, व्याधिनिवृत्तौ तन्निवृत्तिपर्यन्तमिति शेषः । क्षुन्निवृत्तौ तु यावज्जीवं बोध्यम् । भिक्षा च औषधं चेति द्वन्द्वैकवद्भावः, भिक्षाच—

माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम् ।
तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम् ॥

कारिका:

उपजीव्याद्यलाभे तु स्वानन्दानुभवः कुतः । भवेद्धृत्या ततः कुर्याद्भिक्षां प्रतिदिनं यतिः ॥ ४ ॥
अथ भिक्षाचर्यमिति श्रुतौ संन्यासिनः श्रुतम् । गोमुखं करपात्रं वा माधूकरमथापि वा ॥ ५ ॥
भिक्षायाः संग्रहो नैव कर्तव्यो भिक्षुणा सदा । पाणिपात्रः पिबेदापो भिक्षां तूदरपात्रतः ॥ ६ ॥
भिक्षार्थं प्रविशेद्ग्राममिति स्मृत्यनुरोधतः । ग्रामप्रवेशो भिक्षोस्तु न मुख्यः सोऽपि कुत्रचित् ॥ ७ ॥
एकरात्रो वसेद्ग्रामे नगरे पञ्चरात्रकम् । इत्यपि ब्रह्मनिष्ठस्य यतेर्गौणं न संशयः ॥ ८ ॥
वृक्षमूले निवासो हि शून्यागारेऽपि कुत्रचित् । निवसेत्परमो हंसो मठस्वामी न वै भवेत् ॥ ९ ॥
मिष्टान्नादौ तु या प्रीतिः किमर्थं हि यतेर्भवेत् । यथाकथञ्चिच्छारीरो निर्वाहोऽपेक्षितः किल ॥ १० ॥
देहवैकल्यनाशाय भिक्षयेदनिषिद्धकम् । तत्राप्युपेक्षको भूयादतियत्नं न कारयेत् ॥ ११ ॥
त्रीन्वा पञ्च गृहान्वाञ्छेच्छ्रोत्रियाणां कुटुम्बिनाम् । तदभावे यथालाभे साधारण्यं भवेद्यतेः ॥ १२ ॥
चातुर्वर्ण्यं तु भिक्षाया यत्प्रोक्तं स्मृतिषु क्वचित् । तत्तु ब्राह्मणधर्मेषु ह्यापद्धर्मानुसारतः ॥ १३ ॥
न तु शुद्रादिभवने भिक्षां लिप्सेत कर्हिचित् । यतेर्धर्मविलोपः स्यादिति शास्त्रविदो विदुः ॥ १४ ॥

किरणावली

इति स्मृत्युक्ता पञ्चविधापि ग्राह्या । सा च यावत् क्षुन्निवृत्ति भोक्तव्यैव । तदनिवृत्या पूर्वोक्तमनोनैश्चल्यासिद्धेः तदवस्थत्वात् ।

न च अष्टौ ग्रासा इति स्मृतिविरोधः । तस्य विचारानधिकारिविषयत्वात् । औषधं भैषज्यम् । तन्निषेधस्मृतिरपि विचारानधिकारिविषयैव । न तु विचाराधिकारिविषया तदधिकारिणस्तन्निषेधे रोगानिवृत्या विचाराप्रसक्तौ पुरुषार्थप्रच्युतिप्रसङ्गात् । तथा चानुदिनं भिक्षौषधभोजनाभ्यां क्षुद्व्याधिनिवृत्तिसम्भवाद्विचारे मनोनैश्चल्यं सिद्ध्येदिति भावः ।

यद्वा नन्वात्मविचारप्रतिबन्धककर्मादित्यागे भिक्षाशनस्यापि त्याग एव । तस्यापि तत्प्रतिबन्धकत्वादित्याशङ्क्याह—**क्षुद्व्याधिश्च चिकित्स्यतामिति** । व्यधिरिव क्षुत् क्षुद्व्याधिः । यथा व्याधिः शरीरपातपर्यन्तः एवं क्षुदिति क्षुद्व्याधिरित्युच्यते । चकारश्च अवधारणार्थः । चिकित्स्यतामित्यत्र सम्बन्धः । चिकित्सया निवार्यमेवेत्यर्थः । चिकित्सा च क्षुन्निवर्तकभक्षणमेव । अयंभावः—भिक्षाशनाभावे शरीरपातप्रसङ्गेन विचारस्य मूलतो हानिप्रसङ्गेन तस्यावश्यकर्तव्यत्वाद्विधिपूर्वककर्मत्यागे च तादृशदोषाभावादिति । केन निवार्यत इत्यत आह—**अनुदिनं भिक्षौषधं भुज्यतामिति** । औषधमिव भिक्षेति भिक्षौषधम् । यथा औषधं रुचिमनपेक्ष्य तिक्तं कटु वा भुज्यते एवं भिक्षा रुचिमनपेक्ष्यैव भुज्यतामिति यावत् । तथाच भिक्षाशनेनैव तन्निवृत्तिर्भवतीति भावः ।

नन्वस्तु भिक्षाशनेन तन्निवृत्तिः । तथाऽपि औषधवत्तस्याशनमित्ययुक्तम् । तथा हि—औषधं कटु तिक्तं वा यद्रोगनिवर्तकं तदेव भोक्तव्यम् । इतरप्रकारस्यानिवर्तकत्वात् । प्रत्युत व्याध्याद्यभिवृद्धिकरत्वाच्च । भिक्षा तु रुचिभूता क्षुन्निवर्तिका । तथाच तन्निवृत्तिसम्भवे किमर्थमौषधवद्भिक्षा भोज्येति स्वादुभूतैव सम्पाद्येत्यत आह—**स्वाद्वन्नं न तु यत्यतामिति** । तुशब्दः शङ्काव्यावृत्यर्थः । स्वादु = रुचिभूतमन्नं = भक्ष्यभोज्यचोष्यलेह्यरूपं चतुर्विधमुद्दिश्येति शेषः । न यत्यतां = यत्नो न कार्यः । तद्विषयकयत्ने तस्य सुलभतोऽलभ्यत्वेन कथमिदं साध्यमिति विचारे सति आत्मविचारे नैश्चल्यं न सिध्यतीति भावः ।

कारिकाः

अजवद्भोजयेद्भिक्षां गजवत्स्नानमाचरेत् । राजत्प्रविशेद्ग्रामं चोरवन्निर्गमेद्बहिः ॥ १५ ॥
मिष्टान्नं तु त्यजेद्भिक्षुरिन्द्रियग्रामदूषकम् । अयत्नतस्तु प्राप्तं चेद्गृह्णीयादधिकं न तु ॥ १६ ॥
स्मृतिष्वपि तथा प्रोक्तं परहंसस्य लक्षणम् । शालयश्च कदन्नं च समं यस्य स वै मुनिः ॥ १७ ॥
प्राणानां धारणा तुल्या मिष्टान्नाद्वा कदन्नतः । अतः कथं भवेद्भिक्षोर्मिष्टान्नप्रीतिरादरात् ॥ १८ ॥
किं च सर्वत्र निस्सङ्गो ह्युदासोनतया मुनिः । विचरेद्देहयात्रादावपि नो यत्नवान्भवेत् ॥ १९ ॥
एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् । त्रयो ग्रामः समाख्यातः ऊर्ध्वं तु नगरायते ॥ २० ॥
त्रिभिस्तु राजवार्तास्याद्भिक्षावार्ता परस्परम् । शिष्यस्य भिक्षाचिन्ता स्यात्तस्मात्तांस्तु परित्यजेत् ॥ २१ ॥
तत्र किं वा दयालुत्वं निष्ठुरत्वं च किं पुनः । यतः कृपा सात्त्विकी वा नैष्ठुर्यं तामसं न वा ॥ २२ ॥
एकमेवाद्वितीयं तत्पश्यतो हि यतेः सदा । अहं वाऽपि द्वितीयो वा मम नैव हि कुत्रचित् ॥ २३ ॥
नैष्ठुर्यात्तामसो भावः कृपया ममता भवेत् । उभावपि परित्याज्यौ भिक्षुणा समदर्शिना ॥ २४ ॥
न मे द्वेष्योऽस्तीति वचो भिक्षुरेव हरिः स्वयम् । न करोति दयां क्वापि सम्प्रदायस्तथा कथम् ॥ २५ ॥
भवेल्लोकानुग्रहो वा ज्ञानमार्गस्य हानितः । अतः क्वचित्कथञ्चिद्वा विशिष्टाधिकृतं नरम् ॥ २६ ॥

किरणावली

ननु यत्नाभावेन न किञ्चिदपि सिध्येत् । सर्वस्यापि यत्नसाध्यत्वादित्यत आह—**विधिवशात्प्राप्तेन सन्तुष्यतामिति ।** विधेः = कर्मणः जन्मान्तरकृतस्य शरीरारम्भकस्य सुकृतस्य दुष्कृतस्य वा वशात्परिपाकवशात्प्राप्तेन अन्नादिना, सन्तुष्यताम् । सम्यक्तोषश्च लब्धस्य समीचीनत्वे तदभावे वा समताबुद्धिरेव । अयं भावः—शरीरारम्भकस्य कर्मणो यावच्छरीरं स्थायित्वेन तद्वशादेव लाभसम्भवे यत्नो निष्फलः । न च कर्मबलाद्यत्किञ्चिदनिष्टप्रसक्तौ तन्निवारणार्थं यत्न आवश्यक इति वाच्यम् । कर्मबलेन प्राप्यमाणस्य यत्नेन निवारयितुमशक्यत्वात् । तदुक्तम्—

"यदभावि न तद्भावि भावि चेन्न तदन्यथा" इति । तथाचाभाविनो यत्नेनापि लाभासम्भवाद्भाविनश्च यत्नेन निवारयितुमशक्यत्वाच्च यत्नो निष्फल इति । यद्वा नन्वस्तु कर्मबलादेव अन्नादिप्राप्तिःयत्नश्च माऽस्तु तथापि कर्मबलेन प्राप्यमाणादिषु स्वाद्वन्नादिषु प्रीतिः स्यादित्याशङ्क्य तथा सति तद्भोगासक्तमनसः आत्मविचारे नैश्चल्यं न सिध्येदतःप्रीतिं मुक्त्वा क्षुन्निवृत्तिमात्रं कार्यमित्याह—**विधिवशात्प्राप्ते न सन्तुष्यतामिति ।** विधेः = सुकृतकर्मणो वशात्प्राप्ते स्वाद्वन्नादौ न सन्तुष्यतामिति । तथाच न नैश्चल्याभावप्रसक्तिरिति भावः । एवं व्याख्याने च सन्तोषशब्दस्य मुख्योऽर्थो भवतीति ध्येयम् ।

ननु प्रियलाभालाभयोः सुखदुःखदर्शनात् तथा अप्रियलाभालाभयोः सुखदुःखादर्शनाच्च कथमुभयत्र मम समता स्यादित्याशङ्क्याह—**औदासीन्यमभीप्स्यतामिति ।** उदासीनस्य भावः औदासीन्यं सुखदुःखहेतावुभये च हर्षविषादराहित्यम् अभीप्स्यतां = आप्तुमिष्यताम् । तदनन्तरमभ्यस्यताञ्चेत्यर्थः । तथाऽभ्यासपाके उभयत्र लाभालाभयोः समता भवतीति भावः ।

ननु मदीयसुखदुःखलाभालाभनिवृत्त्यर्थं मम प्रवृत्त्यभावेऽपि दीनदर्शनेन तदीयदैन्यनिवृत्त्यर्थं कृपया प्रवृत्तिसम्भवेन, तथा कस्यचिद्घातकं कञ्चिद्दृष्ट्वा तद्धननिवृत्त्यर्थं नैष्ठुर्येण प्रवृत्तिसम्भवेन ताभ्यां व्यासक्तचित्तस्य मम कुत आत्मविचारे नैश्चल्यं सिध्येदित्याशङ्क्य ते न कार्ये याभ्यां तव

कारिका:

दृष्ट्वा कुर्याद्दयां भिक्षुस्तदभावे न कारयेत् । दयया भरतो जज्ञे नैष्ठुर्यान्नहुषोऽपतत् ॥ २७ ॥

दयानिष्ठुरताभ्यां तु संसारोऽतीव दारुणः । तस्मात्ते नैव कुर्वीत समदृङ् मुनिसत्तमः ॥ २८ ॥

एकत्र चतुरो मासानष्टौ मासांस्तु तीर्थकृत् । तत्राप्येकत्र नो वासः कर्तव्यो भिक्षुणा सदा ॥ २९ ॥

भिक्षुभिः सह सम्वासं स्वशिष्येणाथ वा पुनः । न कुर्याद्भिक्षुको योगी निःसङ्गो विचरेन्महीम् ॥ ३० ॥

अपि द्वन्द्वसहिष्णुः स्यात्कन्थां शीतनिवारिणीम् । अशक्तश्चेत्प्रगृह्णीयाच्छक्तश्चेत्तामपि त्यजेत् ॥ ३१ ॥

स्नानं त्रिषवणं कुर्यात्तत्र शीतादिकं सहेत् । अशनायां पिपासायां सुखं वा दुःखमेव वा ॥ ३२ ॥

दुःखे बहुतरे भिक्षुर्नैव प्राणात्ययं चरेत् । आत्महत्या भवेत्तस्य स जीवन्नेव मुक्तिभाक् ॥ ३३ ॥

वृथा वाक्यं हि न वदेद्यतिर्वाचः श्रमावहम् । नानुध्यादिति तथा श्रुतिर्वक्ति ह्यरुन्मुखान् ॥ ३४ ॥

शालावृकेभ्यस्तान्प्रादात्तस्माद्वाचं न विग्लपेत् । तमेवैकं जानथेति अन्या वाचो विमुञ्चथ ।
श्रुतिर्वक्ति हितं युष्मांस्तस्मान्मौनं समाचरेत् ॥ ३५ ॥

एवं स्थितो ब्रह्मणि यः सत्यं शृणुत वत्सकाः । अतः परं तु यत्कृत्यं तद्वक्ष्याम्यहमादरात् ॥ ३६ ॥

तुरीयश्लोकरत्ने तु तुर्यावस्थैव बोधिता । लक्षणं परहंसानामधुना स्थितिरुच्यते ॥ ३७ ॥

भगवच्छङ्करकृते तुरीये रत्नके परः ।
तुरीयः शङ्करस्तेन तुष्यतां मयि सर्वदा ॥ ४ ॥

॥ इति चतुर्थः श्लोकः ॥

किरणावली

व्याक्षेपःस्यादित्याह—**जनकृपानैष्ठुर्यमुत्सृज्यतामिति**। जनेषु कृपा च नैष्ठुर्यं चेति द्वन्द्वेकवद्भावः। उत्सृज्यतां = परित्यज्यतामिति यावत्। एवञ्च तयोस्त्यागे निश्चलता भवेदिति भावः।

नन्वस्तु दैवादागतान्नपानादिलाभालाभनिमित्तहर्षविषादाभावः। शीतोष्णादिजन्यविषादो दुर्वार इत्याशङ्क्याह—**शीतोष्णादि विषह्यतामिति**। शीतं च उष्णं च शीतोष्णे शीतं = हिमादिः। उष्णं = सौरादिकं तेजः ते आदो यस्य मानावमानादेस्तत्तथोक्तम्। मानं पूजा। अवमानं = अपूजा तत् शीतोष्णादि विषह्यताम्। विशेषेण सह्यताम्। सहने विशेषश्च तज्जन्यदुःखे प्रिये इव स्थितिः। तत्सहनं च दैववशसम्पन्नशीतोष्णादिसहनमेव न तु स्वयमेव गत्वा शीते उष्णे वा स्थित्वा तत्सहनम्। तथा सति तन्निमित्तशरीराहितप्राप्त्या आत्मविचारानुकूलशरीराभावेन आत्मविचाराभावात् पुरुषार्थो न सिध्येत्। प्रत्युत आत्महननदोषेणानर्थंच प्राप्नुयात्। एवं च दैववशसम्पन्नशीतोष्णादेर्यत्नेनाप्यनिवार्यतया तन्निमित्तविषादेन क्लेशमात्रलाभात्तत्रापि विषादो न कार्य इति भावः।

ननु जयपराजयहेतुभूतवादाभावेऽपि लौकिकवार्ताऽपि स्यादित्याशङ्क्य लौकिकवार्तादिप्रसङ्गेन तदाकृष्टमनसस्तवोत्पन्नेऽप्यात्मनिश्चये दाढर्यं न सिध्येत् उत्पन्नमात्रस्याकार्यकत्वात्। अतस्त्वया सोऽपि त्याज्य इत्याह—**न तु वृथावाक्यं समुच्चार्यतामिति**। वृथा = व्यर्थं। वाक्यं = पदसमूहः। तुशब्दाच्चकारार्थात् वर्णसमूहात्मकं पदमपि गृह्यते। उभयमपि न समुच्चार्यताम्। अत्र पदवाक्ययोः निष्फलत्वं पुरुषार्थानुपयोगित्वं न तु निष्फलत्वमात्रम्। ततो मनःप्रीतिरूपफलसत्वेन निष्फलत्वाभावात्। एवं च व्यर्थवाक्यासमुच्चारणोक्त्या न केवलं ज्ञानदाढर्यमात्रं सिध्येत् अपितु तादृशवार्तया औचित्यानौचित्यप्रयुक्तहर्षविषादाभावोऽपि सिध्येदिति सूचितमिति ध्येयम् ॥ ४ ॥

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५ ॥

कारिकाः

अयमुपसंहारः—

बहिर्मुखजनैः सङ्गं त्यक्त्वैकान्ते वसेन्मुनिः । व्यावृत्तेन्द्रियसञ्चारस्तत्र ब्रह्मानुचिन्तयेत् ॥ १ ॥
विश्ववैश्वानरादिभ्यः परं परतरं भवेत् । मायाऽथ वा परा प्रोक्ता तस्याः पारेऽथ वा भवेत् ॥ २॥
जाग्रदादित्रयापेक्ष्य परं वा ब्रह्म उच्यते । परत्वं चेन्द्रियादिभ्यः पुरुषान्तं विदुर्बुधाः ॥ ३ ॥
तस्मात्परतरं नास्ति सा काष्ठा सा परागतिः । तत्र चित्तं समाधाय तदेवास्मीति चिन्तयेत् ॥ ४ ॥
न तस्य प्रतिमास्तोति दृष्टान्तार्हं न तद्भवेत् । मनोवाचामगम्यं तत्पदं विष्णोस्तु केवलम् ॥ ५ ॥
यस्मान्न पुनरावृत्तिः कल्पकोटिशतैरपि । मुमुक्षूणामेव गम्यं न चान्येषां कथञ्चन ॥ ६ ॥
विक्षिप्तं हि पुननं स्यात्तादृक् सम्यग्विधारयेत् । एवं धारणया भिक्षुर्ब्रह्मान्यन्न समीक्षते ॥ ७ ॥
ब्रह्मैवेदमिति ज्ञात्वा पूर्णात्मा जायते स्वयम् । रुचकादि यथा कार्यं सुवर्णान्नातिरिच्यते ॥ ८ ॥
तथा जगद्ब्रह्मरूपं बाधाधिकरणत्वतः । ततो भिन्नं जगत्सर्वं जीवेशादि पुरेरितम् ॥ ९ ॥
स्वप्नमायोपमं तत्तु जानीयादेव निश्चितम् । तथेदं ब्रह्मणो भिन्नं जगन्नानात्वलक्षणम् ॥ १० ॥
यथा महाम्भसो भिन्नं तरङ्गादि न वस्तुतः । सर्वं खल्विति च प्राह तज्जलानिति चापरा ॥ ११ ॥
वाचारम्भणशास्त्रात्तु नामरूपक्रियात्मकम् । जगत्सर्वं तु मिथ्यैव बाधितं चावलोकयेत् ॥ १२ ॥
मिथ्या तु द्विविधं दृष्टं शशशृङ्गादिकं यथा । द्वितीयं भयदं रज्जुसर्पादिकमथापि वा ॥ १३ ॥
मायायास्त्रिविधं सत्वं पारमार्थिकसत्तथा । द्वितीयं व्यवहारस्थं तृतीयं प्रातिभासिकम् ॥ १४ ॥

किरणावली

ननु व्यर्थवाक्यासमुच्चारणं च मम कदा भवेदित्यत आह—**एकान्ते सुखमास्यतामिति** । एकः अन्तः = पर्यवसानभूतः यस्मिन् तस्मिन् । स्वव्यतिरिक्तपुरुषरहिते देशे । सुखं = निर्व्याक्षेपं यथा भवति तथा । आस्यतां = गम्यतामिति । ततश्च वृथावाक्योच्चारणं न भवतीति भावः ।

ननु एकान्तवासेऽपि मनसो विषयलोलुपतया विषयगमने सति ज्ञानदार्ढ्यं पूर्ववदेव न सिध्यतीत्याशङ्क्य ब्रह्मास्मीति विभाव्यतामित्यत्रैव प्रयत्नपुरस्सरमितरविषयकध्याननिरासेन ब्रह्मविषयकध्यानाभ्यासस्योक्तत्वान्न विस्मर्तव्यमित्यभिप्रेत्याह—**परतरे चेतस्समाधीयतामिति** । परतरे = उत्कृष्टतरे ब्रह्मणि, चेतः = मनः, समाधीयतां = सम्यगाधीयतां–तद्विषयध्यानमेव सदा कार्यमित्यर्थः । एवं च बालस्य मातरमेव स्मरतः इतराभ्यासेन मातृविस्मरणेनेतरविषयचित्तवदत्रापि विषयासक्तमनसोऽपि ब्रह्मविषयकध्यानेन विषयविस्मरणसम्भवान्नोक्तदोषावकाश इति भावः ।

ननु ब्रह्मविषयज्ञानाभावे तत्स्वरूपापरिज्ञानात्तद्ध्यानमपि न सिध्येदित्याशङ्क्याह—**पूर्णात्मा सुसमीक्ष्यतामिति** । पूर्णः = व्यापकः स चासावात्मा चेति तथोक्तः । सुसमीक्ष्यताम् = सुष्ठु

कारिकाः

वेदान्तश्रवणेनैव प्रथमं नश्यति क्षणात् । अपरोक्षान्नश्यति तत्सत्वं तु व्यावहारिकम् ॥ १५ ॥
प्रारब्धस्य क्षयान्नश्येत्प्रातिभासिकमप्युत । एवं मायासतत्वानां नाशाद्ब्रह्मविदुत्तमाम् ॥ १६ ॥
शान्तिमाप्नोति स यथा त्वङ्निर्मुक्तः पदोदरः । यथा पादोदर इति भाष्यकृद्भिरुदाहृतम् ॥ १७ ॥
प्रश्नोपनिषदि स्पष्टं जीवन्मुक्तस्य लक्षणात् । अथान्यत्पुनराहेदमहिनिर्ल्वयिनीति च ॥ १८ ॥
एवं ह वै सर्वं इति श्रुत्यन्तरमथाब्रवीत् । एष नित्य इति प्राह महिमानं तु योगिनः ॥ १९ ॥
नैनं कृताकृत इति श्रुतिर्वक्ति च सादरम् । एवं सिद्धमपि ब्रह्म न जानन्ति कुबुद्धयः ॥ २० ॥
सुरेश्वरोऽपि प्राहेदं वचः सार्थकमञ्जसा । अध्यात्मादिपदार्थेभ्यो विविक्तं स्वात्मनि स्थितम् ॥ २१ ॥
तं न पश्यन्त्यहो कष्टं दौर्भाग्यं दुष्टचेतसाम् । प्रत्यक्षगोचरं देवं लोकं चातिप्रमादिनम् ।
दृष्ट्वा श्रुतिः शिरस्ताडमनुक्रोशति दुःखिता ॥ २२ ॥
प्रत्यक्षतममप्येनं विरजस्कं स्वयं स्थितम् । अहो कष्टं न पश्यन्ति कं यामः शरणं वयम् ॥ २३ ॥
आयासस्तावदत्यल्पः फलं मुक्तिरिहैव तु । तथापि परमाद्वैतं नैव वाञ्छन्ति मानवाः ॥ २४ ॥

किरणावली

समीक्ष्यताम् । सुष्ठु समीक्षणं च यथावज्ज्ञानमेव । तथाच आत्मनो यथावज्ज्ञातत्वेन ध्यानं सम्भवतीति भावः ।

ननु आत्मनो व्यापकत्वं नाम सजातीयविजातीयस्वगतभेदरहितत्वमित्यभिमतम् । तदयुक्तम् । विजातीयस्य जगतः सत्वेन तद्भेदराहत्यायोगात् । सतः स्वरूपतोऽभेदे प्रमाणाभावाच्चेत्याशङ्कयाह—**जगदिदं तद्बाधितं दृश्यतामिति ।** इदं = परिदृश्यमानं, जायते पुनर्लयं गच्छतीति जगत् । स्थावरजङ्गमात्मकं सर्वं तद्बाधितं तेन परमात्मविषयेक्षणेन बाधितं नास्तितयाऽपोदितं दृश्यतां = प्रेक्ष्यताम्, जगतः तदज्ञानविजृम्भितत्वेन तज्ज्ञानेन बाधसम्भवाच्छुक्त्यज्ञानकल्पितस्य रजतस्य शुक्तित्वज्ञानेनेव । एवं च विजातीयस्य जगतः आत्मज्ञानबाधितत्वसम्भवेन "सदेव सोम्येदमग्र आसीत्" इति श्रुत्या सद्व्यतिरिक्तसर्वनिषेधेन च सद्सदिति प्रतीत्या सत एकत्वेन चोक्तं व्यापकत्वं सुदृढमिति भावः ।

ननु स्वात्मविचारात्संसारनिवर्तकं ज्ञानं भवतु तथापि न विदेहकैवल्यसिद्धिः । शरीरारम्भकानेककर्मणां सत्त्वात् । न चेदानीं कर्मसन्यासादेव कर्माप्रसक्तेः न शरीरादिप्रसङ्ग इति वाच्यम् । इदानीन्तनकर्माभावेऽपि पूर्वजन्मकृतानेककर्मसत्वात्तेष्वेव जन्मसु फलदानमित्यत्र नियामकाभावात् । अन्यथा अस्मिन् जन्मनि कृतयज्ञादेः अस्मिन्नेव जन्मनि फलप्रसङ्गात् । तथाच पूर्वजन्ममि कृतकर्मणां फलमदत्वा नाशे अनियतफलत्वापत्त्या तेष्वप्रवृत्तिप्रसङ्गेन तेषां नियतफलत्वं अवश्यं वाच्यम् । न च शरीरादिकं विना तत्फलं भवतीति शरीरादिकमपि भवत्येवेत्यत आह—**प्राक्कर्म प्रविलाप्यतामिति ।** चितिबलादिति, काकाक्षिन्यायेन पूर्वत्रापरत्र च योज्यम् । चितिः = ज्ञानं आत्मविषयं, तस्य बलात् । प्राक् = पूर्वजन्मसु कृतकर्म सुकृतं च प्रविलाप्यताम् = प्रदह्यतामिति । अयं भावः—न हि बीजं नियताङ्कुरमित्येतावता दग्धमप्यङ्कुरमापद्यते । एवं कर्म विज्ञानाग्निदग्धं कथं फलाय भवेत् ।

कारिकाः

परीक्ष्य यो न गृह्णाति गृह्णाति च विपर्ययात् । दृढं पूर्वाश्रुतत्वाच्च प्रमादात्त्वपि लैकिकात् ॥ २५ ॥
चतुर्भिःकारणैरेतैर्याथातथ्यं न विन्दन्ति । मुमुक्षुमेवं दिशति श्रुतिः साक्षान्महार्थवत् ॥ २६ ॥
तस्मादिदं वचो ग्राह्यं श्रद्धापूर्वं मुमुक्षुभिः । अशेषजन्मनां मूलं सबीजं कर्म नश्यति ॥ २७ ॥
अकर्तृत्वावबोधेन ब्राह्मणस्य विजानतः । क्रियमाणं हि यत्कर्म जन्मारम्भेन तत्क्षयम् ॥ २८ ॥
यतः कर्तृत्वविरहाज्ज्ञानिनः कर्हिचित्क्वचित् । प्रारब्धं सुखदुःखादिभोगेनापक्षयं व्रजेत् ॥ २९ ॥
तत्तु नाशं व्रजति ज्ञानमात्रात्प्रसिद्धितः । ज्ञानप्रारब्धयोर्भिन्नो विषयो नैव नाशकम् ॥ ३० ॥
प्रारब्धस्य यतो ज्ञानमज्ञानस्यैव नाशकम् । आरब्धसुखदुःखादिभोगो यस्तत्र साक्षिता ॥ ३१ ॥
तदेव ज्ञानमित्युक्तं तत्तु तन्नाशकं न हि । केचिद्योगबलेनैव विनाशं कल्पयन्ति हि ॥ ३२ ॥
न तैः सह बुधो वादं कुर्यान्मतिमतां वरः । नात्यन्तिको विनाशः स्याद्योगेनान्येन वा पुनः ॥ ३३ ॥
अज्ञाननाशाद्यो बाधः स एवात्र सतां मतः । दुःखादिविनिवृत्तिर्या योगेनैव यदा भवेत् ॥ ३४ ॥
तदा सुषुप्तेर्योगस्य किमाधिक्यं भवेदिह । दुःखाभावोऽपि तत्रैव लक्ष्यते निद्रितैः सदा ॥ ३५ ॥
तस्माद्भोगेनैव नाशः प्रारब्धस्य न संशयः । अपान्तरतमादीनां प्रारब्धं यद्द्विजन्मकम् ॥ ३६ ॥
वेगेनैव तदारब्धं तत्र नो विवदेत्सुधीः । वसिष्ठस्यापि यज्जन्म भावि हैरण्यगर्भकम् ॥ ३७ ॥
तत्रापि तादृशं ज्ञेयं वेगवत्कर्म नान्यथा । वामदेवस्य चोष्ट्रत्वं पार्वतीशापतः किल ॥ ३८ ॥
बभूव तच्च प्रारब्धं वेगवत्परिकीर्तितम् । यथाचेषुधिगो बाणो संवेगाद्बाहुनिः सृतः ॥ ३९ ॥
यावद्वेगं पतेदेव नान्तरे वर्तते हि सः । यथाकुलालचक्रं हि घटं निर्माय चासकृत् ॥ ४० ॥

किरणावली

न चैतावता नियतफलत्वं । तर्हि बीजादावपि तुल्यत्वेन तत्राङ्कुरार्थिनः प्रवृत्तिप्रसङ्गात्, श्रुतिश्च कर्मणो ज्ञानाग्निदग्धत्वं दर्शयति—तद्यथा इषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति । स्मृतिश्च—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति । तथाच नियतफलत्वेऽपि न शरीराद्यावश्यकतेति । ननु मास्तु नाम प्राक्कृतकर्मणा शरीरादि । ज्ञानानन्तरं कृतेन कर्मणा तद्भवत्येव, तेषां ज्ञानसमकालत्वेनाविरोधित्वेन ज्ञानेन दाहायोगादित्याशङ्क्याह—**चितिबलान्नाप्युत्तरैः श्लिष्यताम्**। चितिबलादिति गतव्याख्यानम्। उत्तरैः ज्ञानानन्तरं कृतैरपि कर्मभिः न श्लिष्यताम् = न श्लेषो अवाप्यतामिति ।

अयं भावः—कर्तुः फलं भवति । न चात्मा कर्ता ईश्वराभिन्नस्य तस्य कर्तृत्वानुपपत्तेः । न च तर्हि ज्ञानात्पूर्वमप्यात्मनः फलभागिता न स्यात्तदाप्यकर्तृत्वस्य तुल्यत्वादिति वाच्यम् । नहि तदानीं स्वतोऽकर्तृत्वेऽपि कर्तृत्वाभिमानेन फलभागितोपपत्तावपि ज्ञानानन्तरं तदभिमानाभावेन फलभागित्वाभावात् । एवं चात्मनः कथं कर्मफलेन संश्लेषः । न चैवं कर्मणां वैफल्यमिति वाच्यम् । "तस्य पुत्रा दायमुपयान्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यां" इति श्रुत्यैव कर्मफलविनियोगस्य दर्शितत्वाच्छ्रुत्यैव ज्ञानिनः कर्मफलासंश्लेषस्य कण्ठरवेण प्रतिपादितत्वात् । "तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत" इति । तथाच कर्मणो निष्फलत्वाभावेऽपि तत्फलेनात्मनः संश्लेषाभावान्न तेनापि शरीरादिप्रसक्तिरिति ।

कारिकाः

भ्रमते तत्र दण्डादिवेग एव हि कारणम् । तस्य तावदेव चिरं स्मृतिर्ज्ञानाग्निरित्यपि ॥ ४१ ॥
अनुभूतिरपीहास्ति मम प्रारब्धमस्ति हि । स्वामिदर्शनजं सप्तजन्मारम्भकमस्ति यत् ॥ ४२ ॥
तदार्थवादिकं ज्ञेयमन्यथा ज्ञानदूषणम् । यत्तु सर्वान्तरत्वादि शुके दृष्टं हि योगजम् ॥ ४३ ॥
न तज्ज्ञानफलं क्वापि ज्ञानं तत्त्वज्ञाननाशकम् । पूर्वसिद्धं हि कर्तृत्वं भोक्तृत्वमपि नास्ति तत् ॥ ४४ ॥
अकर्तृ च तथाऽभोक्तृ परं ब्रह्मास्मीति नेतरत् । कालत्रयेऽपि कर्ता वा भोक्ता वा न भवाम्यहम् ॥ ४५ ॥
इति ज्ञानाग्निना दग्धकर्मासौ ब्राह्मणोत्तमः । अस्मिन् जन्मनि बोधाद्यत्पूर्वमेव कृतं भवेत् ॥ ४६ ॥
जन्मान्तरे च यद्वृत्तं तत्सव नश्यति ध्रुवम् । संस्कारलेशतो मिथ्याप्यनुवर्त्तेत चक्रवत् ॥ ४७ ॥
प्रारब्धस्यापि नाशश्चेत्स्थितिर्ब्रह्मविदः कथम् । सम्प्रदायस्य चोच्छित्तिर्भवेदिति विनिश्चयः ॥ ४८ ॥
यस्तु संस्कारलेशोऽयं यावत्सम्पातमस्ति चेत् । पश्चात्स न भवेत्किं वा न निमित्ताद्यभावतः ॥ ४९ ॥
कर्माशयेनापरेण नैव जन्मादिकं भवेत् । तस्य ज्ञानाग्निदग्धत्वात्सबीजस्य तदैव हि ॥ ५० ॥
यदश्लेषवचः श्रौतं तत्पापविषयं भवेत् । धर्मस्य त्वविरोधित्वान्नाशो नास्तीति चेन्मतं ॥ ५१ ॥
उभे ह्येवेति च श्रुत्या तरति ब्रह्मवित्क्षणात् । पापशब्दस्तु धर्मेऽपि क्वचिदस्ति श्रुतौ मतः ॥ ५२ ॥

किरणावली

ननु तर्हि ज्ञानसमकाल एव विदेहकैवल्यापत्तिः । ज्ञानपूर्वकृतकर्मणां विनाशेन शरीरारम्भकस्यापि विनाशात् स्वारम्भककर्माभावे तस्य स्थित्यनुपपत्तेः ।

न चारब्धफलस्य ज्ञानेन विनाशो न सम्भवतीति वाच्यम् । तत्रैव नियामकाभावादित्याशङ्क्याह—**प्रारब्धं त्विह भुज्यतामिति** । इह अस्मिन् शरीरे हेतुभूतमिति शेषः । अत एव प्रारब्धं = प्रकर्षेण आरब्धं-आरब्धफलमिति यावत् । कर्म भुज्यतां—तत्फलं सुखं दुःखं वानुभूयतामिति यावत् ।

अयं भावः—पूर्वकृतकर्मणः अनारब्धफलस्य ज्ञानेन नाशेऽपि आरब्धफलस्य तेन नाशो न हि सम्भवत्येव । यथा धानुष्कः स्वतूणीरनिक्षिप्तबाणग्रहणे पुनस्तत्रैव निक्षिपेत् । तथा धनुष्यारोपे पुनर्धनुषो ग्रहणे च सामर्थ्यसद्भावेऽपि मुक्तेषुनिवर्तने सामर्थ्याभावः । तद्वत् स चेषुर्यथा यावद्वेगं गत्वैव पतति तद्वत्कर्मापि यावत्स्वफलं तिष्ठति, तदनन्तरं नश्यति ।

न च वेगतो गच्छतः इषोः यावद्वेगमगत्वैव दण्डादिप्रतिघातेनान्तरा पतनदर्शनात् तद्वदेव प्रारब्धं कर्मापि ज्ञानप्रतिहतं सत् यावत्फलमस्थित्वैव नश्यतीति वाच्यम् । दण्डप्रतिहतस्येषुपतनहेतुत्वस्य प्रत्यक्षसिद्धत्वेनेषुवेगविरोधित्वेऽपि ज्ञानस्य तज्जन्यत्वेन तदविरोधित्वात् । नहि कार्यं कारणविरोधि कुत्रचिद्दृष्टम् । नहि भेरीशब्दस्थले शब्दान्तरोत्पत्तिंरस्ति । येन प्रथमादिशब्दान्प्रति द्वितीयादिशब्दानां नाशकत्वं स्यात् ।

न च द्वितीयादिशब्दानुत्पत्तौ शब्दस्य श्रोत्रेण ग्रहणं न स्यात् शब्दस्य भेरीदेशस्थत्वात् श्रोत्रस्य पुरुषदेशस्थत्वात् तदसम्बन्धस्य श्रोत्रस्य तदग्राहकत्वादिति वाच्यम् । अस्मन्मते श्रोत्रस्य कर्णशष्कुल्यवच्छिन्ननभोदेशातिरिक्तत्वेन तस्य शब्ददेशे गमनसम्भवात् ।

कारिकाः

नैनं सेतुमहोरात्रे तरतो ब्रह्मविद्वरम् । इत्युपक्रम्य सर्वे हि पाप्मानोऽतो महात्मनः ॥ ५३ ॥
निवर्तन्ते विशेषेण पुण्यपापे तरत्ययम् । विद्याबलाद्ब्रह्मविदो मुक्तिरात्यन्तिकी भवेत् ॥ ५४ ॥
अत्र गन्तव्यता नास्ति ब्रह्मनिष्ठस्य कुत्रचित् । भूमिस्थः कश्चिदेवात्र यथान्यं देशमाव्रजेत् ॥ ५५ ॥
तत्रान्यस्यानुगमनमन्यद्भूम्यन्तरं प्रति । अनन्यत्वेऽपि बालस्य कालान्तरभवे भवेत् ॥ ५६ ॥
वार्द्धके गमनं तद्वद्ब्रह्मनिष्ठस्य नास्ति तत् । भूप्रदेशो वयोवस्थाविशिष्टानां गतिर्भवेत् ॥ ५७ ॥
तत्र सावयवत्वाद्धि वर्ततेऽत्र तु निष्कलम् । निष्क्रियं शान्तमित्यादि न तस्येत्यवदच्छ्रुतिः ॥ ५८ ॥
सम्यग्विध्वस्ततमसामनावृत्तिः परा मता । इमं मानवमित्यादावुपासनपरं विदुः ॥ ५९ ॥
न स पुनरावर्तत इति श्रौतं वचोऽब्रवीत् । मामुपेत्येति भगवानर्जुनायाह सादरम् ॥ ६० ॥
भवदृष्ट्या तु गर्भेऽहं वामदेवो यदब्रवीत् । अहं मनुस्तथा सूर्यं इति व्याप्तिविदो भवेत् ॥ ६१ ॥
तस्माद्ब्रह्मविदो नास्ति गमनं कुत्रचित्क्वचित् । गीतास्वपि तथा चोक्तं विशते तदनन्तरम् ॥ ६२ ॥

किरणावली

न चैवमपि मथनद्वारा स्वोत्पादककाष्ठं प्रति वह्नेर्दाहकत्वं दृष्टम्, तन्न स्यादिति वाच्यम् । काष्ठस्य मथनद्वारा वह्न्यभिभवनिवृत्तिमात्रोपयुक्ततया तदकारणत्वात् । अत्र च बहु वक्तव्यमस्ति । तथापि विस्तरभयादुपरम्यते । श्रुतिश्च ज्ञानानन्तरमपि प्रारब्धकर्मफलस्यावस्थानं दर्शयति । तन्निवृत्त्यनन्तरं विदेहकैवल्यं दर्शयति । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य" इति, ततो न ज्ञानानन्तरमेव विदेहकैवल्यावकाश इति ।

नन्वस्तु कर्मनिवृत्त्यसम्पादकं ज्ञानं तथापि तस्माज्ज्ञानान्न त्वदभिमतमुक्तिसिद्धिः । तथा हि नित्यनिरतिशयसुखावस्थितिः किं मुक्तिः किंवा अविद्यानिवृत्तिः । नाद्यः तस्य ज्ञानासाध्यत्वात् । अन्यथा नित्यत्वभङ्गापत्तेः । ब्रह्मण एव नित्यनिरतिशयसुखरूपत्वेन तस्य च त्वदभिमतात्मत्वेन स्वरूपत्वात् स्वरूपस्य च स्वतः सिद्धत्वेन तल्लाभार्थं ज्ञानाद्ययोगाच्च । न द्वितीयः अविद्यानिवृत्त्या सद्वितीयत्वेनाद्वितीयत्वसिद्धान्तविरोधात् ।

नहि भावाभावयोरेकत्वं सम्भवतीत्यत आह—**अथ परब्रह्मात्मना स्थीयतामिति** । अथ = प्रारब्धकर्मक्षयानन्तरं, परब्रह्मात्मना = परब्रह्मस्वरूपेणैव, स्थीयतामिति। अयं भावः—मुक्तिर्द्विविधा, अनर्थनिवृत्तिः, आनन्दावाप्तिश्चेति, अत्र अनर्थनिवृत्तिः ज्ञानादुत्पन्नायाः विद्यायाः अविद्याविरोधित्वेन तन्निवर्तनक्षमत्वेन स्वहेतुभूताविद्यानिवृत्तौ अनर्थस्य कर्तृत्वादेर्निवृत्त्युपपत्तेः ।

न च तया अनर्थनिवृत्त्या सद्वितीयत्वापत्तिः । अनर्थस्य कल्पितत्वेन यन्निवृत्तेरपि सुतरां कल्पितत्वात्काल्पनिकस्य परमार्थवस्तुना साकं द्वितीयत्वानापादकत्वात् । नहि मैत्रीपुत्रेण वन्ध्यापुत्रः कल्पितः द्वितीयतामापद्यते । वस्तुतस्तु कल्पितवस्तुस्वभावस्य अधिष्ठानातिरिक्तत्वाभावेन सकार्याविद्यायाः कल्पितत्वेन तन्निवृत्तेरपि तदधिष्ठानातिरिक्तत्वाभावात् ।

न च तन्निवृत्तेरधिष्ठानानतिरेके अधिष्ठानस्य नित्यत्वेन ज्ञानजन्यत्वं न स्यादिति वाच्यम् । अधिष्ठानस्य स्वरूपाकारेणाजन्यत्वेऽपि तन्निवृत्तित्वाकारेण तज्जन्यतोपपत्तिः, नाशकाभावाच्च नाशाभावात् ।

कारिका:

विदेहमुक्तौ बह्वृचो हि श्रुतयः स्मृतयस्तथा । जीवन्मुक्तिस्तु सिद्धैव शरीरस्थितिधारिणी ॥ ६३ ॥
इति प्रोक्तं मुमुक्षूणामुपदेशनमादरात् । आचार्यः पञ्चरत्नाख्यं श्लोकपञ्चकमुत्तमम् ॥ ६४ ॥
देहावसानसमये प्रार्थितस्त्वधिकारिभिः । सूत्रभाष्यादिकं श्रोतुमशक्तानां कथं भवेत् ॥ ६५ ॥
ज्ञानं यद्भगवत्प्रोक्तं स्थूलबुद्धिमतां हि नः । तदा स भगवान्शर्वः साक्षाच्छङ्कररूपधृक् ॥ ६६ ॥
प्राहान्ते पञ्चरत्नाख्यं स्तोत्रं ज्ञानप्रदायकम् । पञ्चरत्नमयीं मालां यः कण्ठे धारयेन्नरः ॥ ६७ ॥
तस्यान्यद्भूषणं तुच्छं भवेन्निश्चितमेव हि । अनेन पञ्चरत्नस्य व्याख्यानेन सदाशिवः ।
शुद्धां वाणीं तथा बुद्धिमकरोन्मुक्तिसिद्धये ॥ ६८ ॥

श्रीमद्रामेन्द्रकृपया शिवस्तुलसिवंशजः ।
कारिकाः पञ्चरत्नानामकरोद्धरितुष्टये ॥ ५ ॥

॥ इति पञ्चमः श्लोकः ॥

किरणावली

न हि ज्ञानानन्तरं कस्यचिन्नाशकस्य सम्भवः । स्वाकारेणैव नित्यत्वस्य श्रुतिसिद्धान्तत्वात् । न चाभावस्य भावरूपत्वमनुपपन्नमिति वाच्यम् । घटाभावाभावस्य घटत्वदर्शनेन तादृशनियमाभावात् । तथाच ज्ञानादनर्थनिवृत्तिरिति सुष्ठूक्तम् । आनन्दावाप्तिश्च औपचारिकी, पूर्वमप्राप्तस्यानन्दस्येदानीं प्राप्त्यभावात् ।

न चानन्दस्य स्वतस्सिद्धरूपत्वेन प्रारब्धस्य क्षयानन्तरं ब्रह्मानन्दात्मनाऽवस्थितिप्रतिपादकमूलकारवाक्यविरोध इति वाच्यम् । स्वत एव पूर्वं ब्रह्मात्मना स्थितस्यापि जीवस्याविद्यामहिम्ना भिन्नावस्थितस्य अज्ञानकार्यतन्निवृत्तौ "अथ परब्रह्मात्मना स्थीयतामि"ति वक्तुं शक्यत एव, पूर्वं तदवस्थाया एव शुक्तेः स्वाज्ञानमहिम्ना अतथाभूतवत् स्थितायाः तन्निवृत्तौ स्वरूपापत्तिरेवेति न कोऽपि दोष इति संक्षेपः ।

अज्ञातं ब्रह्मतत्वं ये ज्ञातुमिच्छन्ति ते नराः ।
समाश्रयन्तु सततं किरणावलिमादरात् ॥
मदीयकृतिमध्ये यो भूषणं दूषणं जनः ।
विचार्यैव वदेत्तस्मै महते निधये नमः ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याद्वैतविद्याचार्यवर्यश्रीमत्सच्चिदानन्दयोगीन्द्रचरणकमलभृङ्गायमाणमानसबालश्रीकृष्णानन्दसरस्वतीविरचितोपदेशपञ्चरत्नकिरणावली सम्पूर्णा ॥

श्रीशङ्करभगवत्पादाचार्यविरचितं

स्वरूपनिरूपणम्

श्रीआनन्दगिर्याचार्यविरचितटीकोपेतम्

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचितं

स्वरूपनिरूपणम्

श्रीआनन्दगिर्याचार्यविरचितटीकोपेतम्

अनात्मभूते देहादावात्मबुद्धिस्तु देहिनाम् ।
साऽविद्या तत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते ॥ १ ॥

पृथिव्यप्तेजोवाय्वाकाशमादित्यो द्यौश्चेत्येतत्स्थूलशरीरम् शुक्रशोणितसम्भूतम् । त्रीणिमातृतस्त्रीणि पितृतः । अस्थिस्नायुमज्जा पितृतः । त्वङ्मांसशोणितमिति मातृतः इत्येतत् षाट्कौशिकं शरीरम् ॥ २ ॥

विधूतविविधोपाधिव्याधिबोधैकमूर्त्तये ।
प्रतीचे परमानन्दवपुषे ब्रह्मणे नमः ॥

स्वरूपाख्यं स्वरूपविषयं प्रकरणं चिकीर्षुरधिकारिणे हेयोपादेयविवेकार्थं अनर्थमनर्थहेतुं पुरुषार्थं पुरुषार्थहेतुं च प्रथमं संगृह्णाति—**अनात्मभूत इति । साऽविद्येति ।** अनाद्यविद्याकार्यत्वाद्देहादावनात्मन्यभिमानोऽविद्येत्युच्यते—**तत्कृत इति ।** तयाऽविद्यया कार्यकारणरूपया निमित्तोपादानभूतया जन्यत्वं संसारस्य निरुच्यते । तन्नाशो बन्धस्य दुःखात्मनः सनिदानस्यात्यन्तिकी दुःखनिवृत्तिर्मोक्षः । अयं च तत्वज्ञानाद्भवति, अविद्यातत्कार्यध्वंसस्य लोके तत्त्वज्ञानजन्यत्वदर्शनात् । ननु बन्धो नाविद्यया जन्यते किन्तु शरीरद्वयसम्बन्धात् । स च कर्मवशात्, तच्च चेतनस्य स्वारस्येन क्रियाशक्तिमत्त्वादित्याशङ्क्य, क्रियाशक्तिमत्त्वस्य स्वाभाविकत्वे शक्तेः शक्यसापेक्षतया मोक्षाद्यवस्थायामपि क्रियाप्रङ्गात् तदीयस्वाभाविकत्वासम्भवादविद्याकृतं कर्त्तृत्वं कर्मशरीरद्वयसम्बन्धश्च । एतदभिसन्धाय प्रतिपत्तिसौकर्यं प्रतीत्य प्रथमं वैराजरूपमात्मनः स्थूलशरीरं दर्शयति—**पृथिवीति ।** पञ्चीकृतानि पञ्चमहाभूतानि तत्कार्यं ब्रह्माण्डं च सर्वमेतद्विराडित्युक्तम् । आत्मनः स्थूलशरीरमित्यर्थः । "चक्षुषी चन्द्रसूर्यावि"ति श्रुतेरादित्यशब्देन चन्द्रोऽपि गृह्यते । द्यौश्चेति लोकत्रयमग्निश्चोपलक्ष्यते । किं बहुना आदित्यो द्यौश्चेत्यनेन ब्रह्माण्डं तदन्तर्वर्त्ति च सर्वं संगृह्णाति । तदेवं स्थूलं समष्टिशरीरं शिष्ट्वा तदेव व्यष्टिरूपं कारणद्वारा निर्दिशति—**शुक्रेति ।** शुक्रकार्यं शोणितकार्यं च विविच्य व्यपदिशति—**त्रीणीत्यादिना ।** पितृशब्दो मातृशब्दश्च प्रकरणानुसारेण शुक्लशोणितविषयौ । अस्थिपरिवेष्टनं सूक्ष्मं चर्म स्नायुशब्दार्थः । अस्थिस्नाय्वोरन्तरवर्त्ति स्वच्छं जलं मज्जेति भेदः । अथवा स्नायुशब्देन नाडीभेदाः सिरा निरुच्यन्ते । अस्थ्यन्तर्गतो धातुर्मज्जेति वक्तव्यम् । मांसान्तरगतं स्थूलं रुधिरकार्यं शोणितमुच्यते । अस्थ्यादयश्चैते षडवयवाः । तैर्विनिर्मितं कोशशब्दितं सर्वप्राणभृतामायतनभूतं स्थूलशरीरमित्युपसंहरति—**इत्येतदिति** ॥ १-२ ॥

पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम् ।
स सप्तधातुं त्रिमलं द्वियोनिं चतुर्विधाहारमयं शरीरम् ॥ ३ ॥

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमिति पञ्च बुद्धीन्द्रियाणि । वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । प्राणापानव्यानोदानसमाना इति पञ्च वायवः । मनोबुद्धिरहंकारश्चित्तमिति अन्तःकरणचतुष्टयं इत्येतत्सूक्ष्मशरीरं लिङ्गमित्युच्यते । तदुभयशरीरान्तर्गतो विज्ञानात्मा स यावत्सर्ववेदशाखोपनिषत्सु तत्त्वभूतं परमात्मानं न जानाति तावत् संसरति । विदितसतत्त्वस्तु सर्वैषणाविनिर्मुक्तो निःस्पृहो निरीहः सर्वकामैरनागन्धितः मुच्यते ॥ ४ ॥

पौर्वापर्येण वेदान्ता यद्वदन्ति परं पदम् ।
तदहं ब्रह्म निर्भेदं सत्यादिपदलक्षणम् ॥ ५ ॥
अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥ ६ ॥

सम्प्रति सूक्ष्मं शरीरमाचक्षाणो बुद्धीन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं वायुपञ्चकमन्तःकरणचतुष्टयं चाचष्टे—**श्रोत्रेत्यादिना**। बुद्धयर्थानीन्द्रियाणि बुद्धीन्द्रियाणि कर्मार्थानीन्द्रियाणि कर्मेन्द्रियाणि इति द्रष्टव्यम् । अपञ्चीकृतानि पञ्चमहाभूतानि तत्कार्यं च पूर्वोक्तं बुद्धीन्द्रियादि सर्वमात्मनः सूक्ष्मशरीरमिति विवक्षन्नाह—**इत्येतदिति**। एतदेव पूर्वोक्तं पञ्चदशकं मनोबुद्धिभ्यां सह सप्तदशकं लिङ्गं हैरण्यगर्भरूपमिति मन्वानो ब्रूते—**लिङ्गमित्युच्यत इति**। कथमिदमात्मनः शरीरद्वयमभिधीयते तदतिरिक्ताभावादित्याशङ्क्य दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाद्यन्तवत्त्वाच्च शरीरद्वयस्य घटादिवदात्मत्वायोगात् तदन्तर्वर्ती द्रष्टा घटादिद्रष्टेवात्मा विद्यत इत्याह—**तदुभयेति**। तस्य प्रकृतशरीरद्वयसम्बन्धद्वारा कर्तृत्वभोक्तृत्वप्रमातृत्वलक्षणसंसारित्वमविद्याकृतमिति कथयति—**यावदिति**। स्वयंप्रकाशस्य प्रत्यगात्मभूतस्य परमात्मनोऽपरिज्ञानं दुर्घटमित्याशङ्क्य वाक्यस्थपदानां वाक्यानां च शक्तितात्पर्यापरिज्ञाननिवर्तकज्ञानानुदयात्तदुपपत्तिरिति मत्वा विशिनष्टि—**सर्वेति**। सर्वासु तत्तद्वेदगतासु शाखासु व्यवस्थितोपनिषत्सु तत्वभूतेनावस्थितं तात्पर्याधिगम्यमिति यावत् । एवमनर्थं तद्धेतुं च दर्शयित्वा पुरुषार्थं तद्धेतुं च प्रपञ्चयति—**विदितेति**।

सर्वेषामेव तर्हि पदवाक्यशक्तितात्पर्यज्ञानद्वारा तत्त्वज्ञानपूर्विका मुक्तिः शक्या इत्याशङ्क्याधिकारिणं विशिनष्टि—**सर्वैषणेति**। पुत्रैषणा लोकैषणा वित्तैषणेत्येवमेषणात्रयविनिर्मोकाय तत्कस्मै स्पृहयतीत्याशङ्क्याह—**निःस्पृह इति**। तथा च श्रुतिस्मृतिविहितंसर्वकर्मसंन्यासरूपं पारिव्राज्यमधिकारिविशेषणं लब्धुमित्याह—**निरीह इति**। तथा कर्मफलापेक्षाप्रतिबद्धबुद्धिः सन्मोक्षाय नार्हतीत्याशङ्क्याह **सर्वकामैरिति** ॥ ४ ॥

उक्तमर्थचतुष्टयं श्लोकैर्विवृण्वन्नैक्यज्ञानान्मुक्तिस्तदज्ञानादनर्थः स्यादित्याह—**अहमेवेति**। अहं परमेव ब्रह्मेति सम्बन्धः। तस्येतिहासपुराणादिषु प्रसिद्धिं सूचयति—**वासुदेवाख्यमिति**।

विज्ञप्तिमात्रो हि सदा विशुद्धो बुद्धश्च यस्मात्सततं विमुक्तः ।
अहं न हेयादिरिति प्रतर्क्य तिष्ठेत्सदा ब्रह्ममयो विशोकः ॥ ७ ॥

अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
एवं सम्यगुपासीत ब्राह्मणो [ज्ञानतत्परः] ॥ ८ ॥

[यदा] चित्तमसंसक्तं त्वदीयं सर्वकर्मसु ।
भवसीह तदा वत्स त्वमेव परमं पदम् ॥ ६ ॥

कूटस्थत्वं दर्शयति—**अव्ययमिति** । इतिशब्देनानुभवोऽभिधीयते तस्य निश्चितत्वमसम्भावनाविपरीतभावनाप्रतिबन्धविधुरत्वम् । यद्येवमनुभवः स्यात्तदा जीवन्नेव मुक्तो भवतीत्यर्थः । यथोक्तानुभवाभावप्रत्ययाय प्राप्तिमाह—**बद्ध एवेति** । इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति हि श्रूयते ॥ ६ ॥

नन्वात्मनो जडत्वात्पुण्यपापसम्बन्धेनाशुद्धत्वादज्ञानतया च बद्धत्वात् हेयोपादेयत्वसम्भवात् ब्रह्मणश्चानेवंरूपत्वात्तयोरैक्यज्ञानस्य प्रामाणिकत्वायोगात् कुतस्तत्प्रयुक्ता मुक्तिरित्याशङ्क्य परिहरति—**विज्ञप्तिमात्रो हीति** । विज्ञेयत्वेन जडस्य घटवदनात्मत्वमितिशब्दार्थः । यदात्मनो द्रव्य[जड]बोधरूपत्वं कैश्चिदुच्यते तदेकस्यानेकरूपत्वानुपपत्त्या निराकर्त्तुं **मात्रपदम्** ।

न च तस्मिन्कर्मादिसम्बन्धादशुचिराशङ्कितुमुचिता । कर्माध्यक्षः साक्षीत्यादिश्रुतिविरोधादित्याह—**विशुद्ध इति** । अवस्थात्रयस्यापि साक्षितया साक्षिणो वस्तुतो न सम्बन्धोऽस्तीति वक्तुं सदेत्युक्तम् । पूर्वोक्तं विज्ञप्तिमात्रत्वं विशुद्धत्वं च हेतुत्वेनानूद्य ज्ञप्तिरूपत्वमाह—**बुद्धश्चेति** । हिशब्देनात्मन्यसङ्गोदासीने संसारतद्धेतुसम्बन्धासम्भवः सूच्यते । उपादेयत्ववद्धेयत्वमात्मनो नास्तीत्यत्रात्मत्वं हेतुमाह—**अहमिति** । एवं त्वपदार्थपरिशोधनपूर्वकं वाक्यार्थं प्रतिपद्यत इत्याह—**इति प्रतर्क्य ब्रह्ममयस्तिष्ठेदिति** । इत्थं वाक्यार्थज्ञाने तत्फलस्य शोकादिनिवृत्तिरूपमोक्षस्यावश्यंभाविताम‍ाह—**सदा विशोक इति** ॥ ७ ॥

ब्रह्मात्मनोरैक्यज्ञाने पुरुषार्थहेतावपि कथमुद्देश्यविधेयभावः स्यादित्याशङ्क्य व्यतिहारस्य विवक्षितत्वादुद्देश्यत्वादि यथेष्टमेष्टव्यमित्याह—**अहमेवेति** । कथं पुनरैक्यज्ञानमुत्पद्येतेत्यपेक्षायां शमदमादिमतो यथोक्तेऽर्थे श्रवणाद्यभ्यासादित्याह—**एवमिति** । स च श्रवणादिजनितब्रह्मज्ञानात् ब्रह्मण्येवावस्थितो मुख्यो ब्राह्मणो भवति "स ब्राह्मणः" । "ब्रह्मसंस्थोऽमृतत्वमेती"ति श्रुतेरित्याह—**ब्राह्मण इति** ॥ ८ ॥

श्रवणाद्यभ्यासाद्विषयेषु मनसो वैमुख्यमपि सम्यग्ज्ञानद्वारा मुक्तिहेतुरित्याह—**यदेति** । कर्मशब्दो विषयविषयः । [तदेत्य]वस्थोक्तिः—**वत्सेति** सम्बोधयन्योग्ये शिष्ये प्रीतेन करुणावता गुरुणा भवितव्यमिति सूचयति—**इहवेत्येव**कारः सम्बध्यते । परमं पदमेव भवसीति परमपदभावस्यात्मनि सदा विद्यमानता द्योत्यते ॥ ९ ॥

योऽसौ [सर्वेषु वेदेष्वजन्मा श्रुत] ईश्वरः ।
अकायो निर्गुणो ह्यात्मा सोऽहमस्मि न संशयः ॥ १० ॥

सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥ ११ ॥

देशजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान् ।
भावानेतान्परित्यज्य स्वं भावं भावयेद् बुधः ॥ १२ ॥

यदा स्वचित्तात्प्रभवं विचित्रं, विश्वस्य तत्रास्तमयं च विद्वान् ।
प्रत्यक्षतः पश्यति शुद्धचक्षुरादर्शमध्यस्थमिवात्मरूपम् ॥ १३ ॥

तदाऽऽगमान्संपरिवर्ज्य सर्वान् श्रद्धागृहीतांश्च समाधियोगान् ।
तास्ताश्च युक्तीरनुमानगर्भाः सूक्ष्मार्थसंदर्शनदीपभूताः ॥ १४ ॥

पदार्थद्वयपरिशोधनमपि वाक्यार्थज्ञानहेतुरिति मन्वानस्तत्पदार्थं परिशुद्धं दर्शयति—**योऽसाविति**। सर्वेषु वेदेषु सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु अजन्मा जन्मादिषड्भावविक्रियाविहीनः कूटस्थ इति यावत्। हिशब्देन तत्रोपपत्तिः सूच्यते। न हि निरवयवं ब्रह्म कार्त्स्न्येन एकदेशेन वा परिणमते। न च जन्मादय[स्तत्र]स्वतो वा परतो वा सम्भाव्यन्ते। ईश्वरशब्देन स्वातन्त्र्यमुच्यते। संप्रति परिशुद्धत्वंपदार्थं कथयति—**अकाय इति**। स्थूलसूक्ष्मशरीरद्वयसम्बन्धाभावो विशेषणाभ्यामभिहितः। तत्रासङ्गत्वं हेतूकर्तुं हिशब्दः। सोऽहमस्मीति वाक्यार्थोक्तिः। तत्र प्रतिबन्धकवैधुर्यमाह—**न संशय इति** ॥ १० ॥

कथं पुनर्वर्णाश्रमाभिमानवतो जीवस्य परिच्छिन्नदृष्टिविशिष्टस्य ब्रह्मत्वमित्याशङ्क्य तत्त्वज्ञानात्प्रागूर्ध्वं वा तादृगभिनिवेशित्वं इति विकल्प्य द्वितीयं प्रत्याह—**सर्वोपाधीति**। तच्च ब्रह्माहमिति चकारो योजनीयः। तत्त्वज्ञानविरोधादुत्तरकाले न वर्णाश्रमादिपरिच्छेदाभिमान इत्यर्थः ॥११॥

प्रथमं प्रत्यादिशति—**देशेति**। जात्यादीत्यादिशब्देन वयोऽवस्थादयो गृह्यन्ते। भावपदेन अभिमानभेदा वक्ष्यन्ते तेषां परित्यागे विवेकसम्पत्तिकारणमाह—**स्वं भावमिति**। स्वं भावं सच्चिदानन्दात्मकमद्वितीयं रूपं तद्भावनं नाम तदेकनिष्ठत्वम् ॥ १२ ॥

ननु द्वैतप्रपञ्चे पृथगेव प्रथमाने कथं यथोक्तमद्वितीयं तत्त्वं प्रतिपत्तुं शक्यते प्रत्यक्षादिविरोधात् न च तेषां कल्पितविषयत्वं रजतादिप्रतीतिवत् अप्रमाणत्वप्रसङ्गादिति तत्राह—**यदेति**। यस्यां विवेकावस्थायां विश्वस्य चराचरात्मनः सुरासुरनरादिरूपेण विचित्रं प्रभवमेष पुरुषः स्वचित्तादेव प्रवृत्तं विद्वान् भवति तत्रैव स्वचित्ते तस्यास्तमयं विद्वानवतिष्ठते तदा शुद्धचक्षुरात्मानं दर्पणस्थं यथा पश्यति तथा विद्वानपि स्वानुभववशात् तदद्वयमात्मानमनुभवति। द्वैतप्रपञ्चस्य मनःस्पन्दितमात्रत्वेन कल्पितत्वात्तद्विषयप्रत्यक्षादिविरोधाभावात्कल्पितविषयत्वेन प्रत्यक्षादीनां व्यवहारादिसम्वादेन व्यावहारिकप्रामाण्याभ्युपगमादिति भावः ॥ १३ ॥

अथोत्पन्नेऽपि तत्त्वज्ञाने श्रवणादिपरायणस्य नैव तन्निष्ठा प्रतिष्ठां प्रतिपद्यते, न चात्मज्ञानप्रतिष्ठामन्तरेण पुरुषार्थप्राप्तिरिति तत्राह—**तदेति**। तत्वज्ञानावस्थायां सूक्ष्मस्यार्थस्य सम्प्रदायाति-

देहस्य च स्वस्य मृजा हिरण्यं जरादिमर्त्यत्वमशेषतस्तत् ।
प्रदीप्तसूर्यानलरश्मियोगात् घृतस्य काठिन्यमिवापनेयम् ॥ १५ ॥

आमस्तकं पादतलावसानं सान्तर्बहिश्चर्मपटावनद्धम् ।
तत्कृत्स्नमेवामृतराशिरूपममन्यतात्मानममर्त्यमित्थम् ॥ १६ ॥

यत्तत्पदं ब्रह्मविदो वदन्ति, तपस्विनो ज्ञानसमाधियुक्ताः ।
अनादिविज्ञानमजं पुराणं गुहाशयं निष्कलमप्रपञ्चम् ॥ १७ ॥

रेकेणाधिगन्तुमशक्यस्य सम्यग्दर्शने दीपवत्स्थितं श्रवणध्यानमननात्मकमङ्गाङ्गिभूतं साधनचतुष्टयम् । साध्ये सिद्धे क्लृप्तान् भावान् परित्यज्य यस्तिष्ठति सोऽमृततामुपैतीत्युत्तरत्र सम्बध्यते । तथा च तद्वस्तुज्ञाननिष्ठस्य मुक्तिरवश्यम्भाविनोत्यर्थः ॥ १४ ॥

नन्वात्मनो जन्ममरणाद्यनेकधर्मवत्तःतद्विपरोतब्रह्मतानुपपत्तिरित्याशङ्क्याह—**देहस्येति** । यदेतदुपाधिभूतस्य देहस्य जरादिपूर्वकं मर्त्यत्वमात्मनि देहाध्यासद्वारा प्रतीयते । तदशेषतोऽस्यात्मनो मृजा शुद्धया विवेकबुद्धया देहाध्यासपरिहरणद्वारेण हिरण्यं हरणीयं त्यागयोग्यत्वादपनेयमित्युत्तरत्र सम्बन्धः । आत्मनि भावे जरादेर्विवेकबुद्धया त्याज्यत्वे दृष्टान्तमाह—**प्रदीप्तेति** । तथा च मिथो विरोधाभावादुपपन्नमात्मनो ब्रह्मत्वमिति शेषः ॥ १५ ॥

किं च समस्तस्यैवास्य शरीरस्य सर्वतश्चर्मपरिवेष्टितस्य नित्यसिद्धात्मरूपातिरेकेण सत्तास्फुरणयोरभावादात्मैव तस्य रज्जुरिव भुजङ्गमस्य तत्त्वमिति मन्वानो विद्वानात्मनः स्वतोऽन्यतश्चासत्वाभावादात्मानममर्त्यं कूटस्थमेव प्रतिपन्नवानित्यास्थिते युक्तमेवात्मनो ब्रह्मत्वमित्याह—**आमस्तकमिति** ॥ १६ ॥

ननु लोके तद्ब्रह्मैवाऽप्रसिद्धं कथमात्मनस्तदैक्यमित्याशङ्क्याह—**यत्तदिति** । पद्यते गम्यते वेदान्तैरिति पदमित्यनेन ब्रह्मणो वेदान्तप्रमाणकत्वमुक्तम् । तत्रैव विद्वत्प्रसिद्धिमाह—**ब्रह्मविदो वदन्तीति** । ब्रह्मवित्त्वे हेतुत्वेन मनोबुद्धीन्द्रियाणामैकाग्र्यरूपं तपोऽप्युपदिशति—**तपस्विन इति** । तत्रैव विवेकपूर्वकं समाधियोगमुपायान्तरमाह—**ज्ञानेति** । ननु तज्ज्ञानं मुक्त्यवस्थायां जायते चेत्तद्ज्ञानहेतुदेहादिसम्बन्धाद्बन्धावस्थातो विशेषो न स्यान्न चेज्जायते तर्हि गृहगुहानिहितानधिगतनिधिवदपुमर्थतेत्याशङ्क्याह—**अनादीति** । नित्यदृष्टिरूपमुद्दिष्टं कूटस्थं ब्रह्मानूद्य तस्यैव हृदयगुहायां निहितत्वेन प्रसङ्गादात्मत्वं दर्शयति—**अजमित्यादिना** । केचिदात्मानं सावयवं सङ्गिरन्ते स्वशरीरपरिमाणत्वात् तन्मात्रत्वाद्वा सावयवत्वसम्भवात्तत्प्रत्युक्तं-**निष्कलमिति** । न खल्वात्मनो देहपरिमाणत्वं तन्मात्रत्वं वा युज्यते । मध्यमपरिमाणस्य घटवदात्मत्वानुपपत्तेः । न चानन्तपरिमाणत्वेऽपि गगनवदनात्मत्वं गगनस्य कार्यत्वेनानन्त्यायोगात् । अतो "निष्कलं निष्क्रियमि"ति श्रुतेर्निरवयवं प्रत्यग्ब्रह्मैवेत्यर्थः । केचिद् "सर्वगन्धादि" श्रुतिमाश्रित्य ब्रह्मणः सप्रपञ्चतां प्रतिजानते, तान्प्रत्याह—**अप्रपञ्चमिति** । नो खल्वस्थूलादिश्रुतिदर्शितं निर्विशेषमात्मतत्त्वं ध्यानार्थं प्रपञ्चमारोप्य प्रवृत्तया श्रुत्या सप्रपञ्चं इति वक्तुं शक्यम् । तत्परातत्परश्रुत्योः तत्परश्रुतेरेव बलवत्त्वादित्यर्थः ॥ १७ ॥

निरञ्जनं निष्प्रतिमं निरीहमदृश्यमग्राह्यमचिन्त्यरूपम् ।
सनातनं ब्रह्म निरन्तरं यत्तदेवाहमिति प्रबुद्धः ॥ १८ ॥

यो भावितस्तिष्ठति निष्प्रकम्पः स ब्रह्मभूतोऽमृततामुपैति ।
पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामाः ॥ १९ ॥

सोऽहं परब्रह्म जगत्समस्तमुदेति मत्तो मयि चास्तमेति ।
ईशोऽहमेवास्य चराचरस्य पिता च माता च पितामहश्च ॥ २० ॥

ध्यानं समास्थाय पदं चतुर्थं ध्यायन्ति मामेव विमुक्तकामाः ।
ब्रह्मादयो देवमनुष्यनागा गन्धर्वयक्षाप्सरसो गणाश्च ॥ २१ ॥

किं च तस्य न स्वतः सप्रपञ्चत्वं कूटस्थतया निर्विशेषतानिवेदकश्रुतिस्मृतिविरोधात् । नापि परतस्तस्य सप्रपञ्चत्वं प्रकल्प्यते परेण तस्यासङ्गतेरसङ्गत्वादित्याह—**निरञ्जनमिति** । अथ यथोक्तवस्तुनि सुखप्रतिपत्त्यर्थं किञ्चिदुदाहरणं वक्तव्यमित्याशङ्क्य "न संदृशे तिष्ठति रूपमस्ये"ति श्रुतिमाश्रित्याह—**निष्प्रतिममिति** । आकाशवत्सर्वगतश्चेत्यादिश्रुतेराकाशश्चास्य दृष्टान्तः स्यादित्याशङ्क्य लोकप्रसिद्धया हि तस्याः श्रुतेरुत्थानात् । वस्तुवृत्त्या चाकाशस्य जन्मादिचेष्टावैशेष्यात् ब्रह्मणोऽदृष्टिगोचरेणैवंभूतेन न तदुदाहरणमित्याह—**निरीहमिति** । किमिति तर्हि यथोक्तं वस्तु लोके न दृश्यते घटादिवदित्याशङ्क्य ज्ञानकर्मेन्द्रियबुद्धिभिर्ग्रहीतुमयोग्यत्वादित्याह—**अदृश्यमित्यादिना** । किमित्यन्तर्बहिरिन्द्रियैर्ग्रहणायोग्यं ब्रह्मेत्याशङ्क्य तेषां कार्यविशेषत्वाद्ब्रह्मणश्चाकार्यत्वादित्याह—**सनातनमिति** । न चानात्मभूतं किञ्चिदस्ति नित्यत्वेनोभयसम्प्रतिपन्नं "अतोऽन्यदार्त्तमि"ति श्रुतेरित्यर्थः । किञ्च परिच्छिन्नमिन्द्रियाणि गोचरयन्ति ब्रह्म चापरिच्छिन्नमित्याह—**निरन्तरमिति** । इदानीं वाक्यार्थज्ञानमनूद्य तत्फलं कैवल्यं कथयति—**यदेतदुक्तं ब्रह्म तदेवाहमिति बुद्धः** सन् ॥ १८ ॥

यस्तेन प्रबोधेन भावितस्तत्प्रधानस्तन्मयो भूत्वा निखिलविष[यनिवृत्तः]निश्चलो नित्यमवतिष्ठते स पुनरभिव्यक्तपूर्णभावात्सनिदानसंसाररहितो निर्वाणं यातीत्यर्थः । ब्रह्मरूपं गतस्यामृतस्यापि परमानन्दप्रेप्साऽस्तीत्याशङ्क्य ब्रह्म प्राप्तस्य परमानन्दप्राप्तेरभिव्यक्तत्वात्तस्य कृतकृत्यस्य जीवदवस्थायामेव सर्वकामप्रविलयो भवतीति श्रुतिमुदाहरति—**पर्याप्तकामस्येति** । इहैवेति ज्ञानप्राप्त्यवस्था परामृश्यते ॥ १९ ॥

ननु ब्रह्मणो जगदुत्पत्तिस्थितिलयहेतुत्वं सर्वेश्वरत्वं वेदान्तेषु श्रूयते न च जीवस्य तथा च सति तत्कथमेकत्वमित्याशङ्क्य वाक्यार्थप्रतिज्ञापूर्वकं ब्रह्मलक्षणस्यात्मनि परिपूर्णत्वं दर्शयति—**सोऽहमिति** ॥ २० ॥

मुमुक्षवो मोक्षौपयिकज्ञानसिद्धये ध्यानमभ्युपेत्य तन्निष्ठाः सन्तश्चतुर्थं पदमेव ध्यायन्तीति सम्बन्धः । ज्ञानमार्गे मनुष्याधिकारनियममपवदितुं ब्रह्मादय इति ज्ञानविशेषणम् । काल्पनिको भेदो ध्यानोपयोगी न वास्तवो वाक्यान्तरविरोधादिति भावः ॥ २१ ॥

मखैरनेकैरहमेव चेज्यो मामेव सर्वे प्रवदन्ति वेदाः ।
तपोभिरुग्रैर्विविधैश्च दानैर्मामेव सर्वे प्रतिपूजयन्ति ॥ २२ ॥

भूतानि चाहं स्थिरजङ्गमानि यावन्ति भूतान्यहमेव तानि ।
एवं विधेष्वप्यपृथक्स्थितोऽहं मृदादिवन्मृन्मयभाजनेषु ॥ २३ ॥

अहममृतमयो न मर्त्यमूर्तिरिति कथमिव नरः स्मरेत्स्वरूपम् ।
निहितमुपनिषत्सु यत्सतत्वं कथितमविस्तरशस्तदेव सर्वम् ॥ २४ ॥

अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं तं न पश्यामि यो मम ॥ २५ ॥

तथा कर्मभिरिज्यमानानां भूयसीनां भावात् कथं ऐकरस्यमित्याशङ्कया "त्मैव देवताः सर्वा" इति स्मृतिमनुसृत्य परिहरति—**मखैरिति**। नन्ववेमपि वेदवेद्यस्यात्मातिरेकादात्मनश्च वेदितृत्वादैकरस्यानुपपत्तिस्तदवस्थैवेत्याशङ्क्य "सर्वे वेदा यत्पदमामनन्ती"ति श्रुतिमाश्रित्याह—**मामेवेति**। तथापि तपोदानादिभिरीश्वरमाराध्य तव मुक्तिः स्यादिति कथमैकरस्यमित्याशङ्क्याह—**तपोभिरिति** ॥ २२ ॥

चेतनभेदाभावेऽपि भूतभौतिकविजातीयप्रपञ्चभेदादैकरस्यासिद्धिरित्याशङ्क्याह—**भूतानि चेति**। यावन्ति भूतान्याकाशादीनि पृथिवीपर्यन्तानि तानि "योऽयं पुरुषः स स्थाणुरि"तिवदहमेव यावन्ति च स्थिरजङ्गमानि भौतिकानि च सर्वाण्यहमेव "इदं सर्वं यदयमात्मे"ति श्रुतेरित्यर्थः। भिन्नैर्भूतभौतिकैरभेदे तवापि भिन्नत्वं स्यादित्याशङ्क्य कल्पिततद्भेदेऽपि तदधिष्ठाननिष्ठावान्तरभेदाभावान्मैवमित्याह—**एवंविधेष्विति**। मृद्विकारेषु घटशरावादिषु मिथो भिन्नत्वेन भासमानेष्वपि मृन्मात्रस्य तत्रैकत्वं दृष्टं तथा कल्पितेषु परस्परं भिन्नेष्वपि प्रत्यगात्मा तदधिष्ठानभूतोऽद्वितीयः सन्कूटस्थो भवतीत्यर्थः ॥ २३ ॥

ननु विद्यमानेषु ग्रन्थान्तरेषु अध्यात्मविषयेषु किमर्थमिदं प्रकरणं प्रणीतमित्याशङ्क्याह—**अहमिति**। अधिकृतपुरुषो यथोक्तया रीत्या कथमिव स्वरूपं स्मरेदिति हृदि निधायास्मिन् प्रकरणे स्वरूपं व्याख्यातं ग्रन्थान्तराणि पुनरस्वरूपगोचराणि इति स्वरूपं प्रतिपित्समानस्य भवत्येतत् प्रकरणमर्थवदित्यर्थः। ननूपनिषद्भिरेव स्वरूपानुस्मरणद्वारेण तत्त्वसाक्षात्कारसिद्धया मोक्षसिद्धौ कृतं प्रकरणेनेत्याशङ्क्याह—**निहितमिति**। यस्य स्वरूपस्य सतत्वं याथात्म्यमुपनिषत्सु तत्र तत्र निक्षिप्तं ज्ञातुमशक्यमवस्थितं तदेव स्वरूपाख्यं तत्वमविस्तारात् संक्षिप्यात्र प्रकरणे प्रतिपत्तिसौकर्यार्थं कथितम्। तथा चोपनिषत्सु विस्मृतस्य स्वरूपस्यास्मिन्प्रकरणे संक्षेपतोऽभिधानादस्यार्थवत्त्वमित्यर्थः। सर्वमित्यपेक्षितपदार्थपरिशोधनादिपूर्वकत्वोक्तिः ॥ २४ ॥

ननु स्वरूपस्याव्यवहितत्वेनापरोक्षत्वान्नानुस्मरणमवकल्पते स्वव्यवहितस्य परोक्षस्यानुभूतपूर्वस्यानुस्मरणदर्शनादित्याशङ्क्यानुस्मरणीयस्वरूपं निरूपयति—**अहमेक इति**। आत्मनोऽद्वितीयत्वसमर्थनार्थं सम्बन्ध्यभावमुक्तं सम्बन्धिनि प्रमाणाभावेन साधयति—**न तमिति** ॥ २५ ॥

स्थूलं जागरितं प्रभिन्नरचितं प्रत्यक्षतो दृश्यते
स्वाप्नं फेनतरङ्गबुद्बुदनिभं मायोपमं चञ्चलम् ।
सौषुप्तं तिमिरान्धकारगहनमव्यक्तमव्याकृतं
तुर्यं पातुसकृद्विभातममलं सर्वत्र सर्वानुगम् ॥ २६ ॥

बुद्धिपूर्वं तु यज्ज्ञानं बहिर्विषयसेवितम् ।
प्रत्यक्षमविरुद्धं च तज्जागरितमुच्यते ॥ २७ ॥

अर्थाभावे तु यज्ज्ञानं प्रत्यक्षमिव दृश्यते ।
गन्धर्वनगराकारं स्वप्नं तदुपलक्षयेत् ॥ २८ ॥

आत्मनोऽवस्थात्रयमस्ति सम्बन्धीत्याशङ्क्य जागरितं लक्षयति—**स्थूलमिति** । प्रभिन्नं नानाविधं रचितं रचनाविषयभूतं घटशकटादि यथा स्थूले वस्तुजातेऽस्ति तत्प्रत्यक्षतश्चक्षुरादिभिरुपलभ्यमानं जागरितमित्यर्थः । अथवा यदिदं प्रभिन्नं रचितं रचनाया विषयभूतं स्थूलं जगत्प्रत्यक्षादिभिरुपलभ्यते तद्विषयमिन्द्रियादिहेतुकं ज्ञानं जागरितमित्यर्थः । सम्प्रति स्वप्नस्थानं लक्षयति—**स्वप्नमिति** । फेनवत्तरङ्गबुद्बुदवच्चात्यन्तचञ्चलं करणेषूपसंहृतेषु जागरितवासनाजनितमात्रास्वरूपं ज्ञानं स्वप्नमित्यर्थः । अवस्थाद्वयस्य मायाकार्यत्वेनेन्द्रजालतुल्यत्वमाह—**मायोपमं इति** । इदानीं सुषुप्तिस्थानं लक्षयति—**सौषुप्तमिति** । लौकिकप्रसिद्धतिमिरवदन्धकाररूपं यदज्ञानं तन्मात्रत्वेन बुद्ध्यादेरवस्थानादतिगहनं स्थानं दुरधिगमं सुषुप्तिरूपमित्यर्थः । अज्ञानस्य साङ्ख्यस्मृतिसिद्धत्वं सूचयत्यव्यक्तमिति । "आसोदिदं तमोभूतमि"त्यादिस्मृतिप्रसिद्धिप्रदर्शनार्थस्तुशब्दः । "तद्धेदन्तर्ह्यव्याकृतमासीदि"त्यादिश्रुतिप्रसिद्धं विवक्षति—**अव्याकृतमिति** । तदेतदवस्थात्रयं कार्यकारणरूपं यस्मिन्वस्तुनि वस्तुतो नास्ति तदुपन्यस्यति—**तुर्यमिति** । तदेतदज्ञानमविद्यातत्कार्यनिराकरणेन मोक्षमपेक्षमाणेनापेक्षितं मोक्षस्य ब्रह्मभावस्य प्रदानेन पालनादित्याह—**पात्विति** । ननु तुरीयस्य चतुर्थपर्यायत्वाद्वस्तुनश्चतुर्थत्वेनास्य त्रयापेक्षत्वात् त्रयमपि वस्तु स्यादित्याशङ्क्य तुरीयशब्दार्थमाह—**सकृदिति** । तदेवं स्वप्रकाशचिन्मात्रमागन्तुकनैसर्गिकदोषाभावेन साधयति—**अमलमिति** । तस्यावस्थात्रये सत्तास्फूर्त्तिप्रदत्वेन सन्निधिं सूचयति—**सर्वत्रेति** । अधिष्ठानान्तरं निवारयति—**सर्वानुगमिति** । सर्वमनात्मजातमधिष्ठानत्वेनानुगच्छतीति तथोक्तः ॥ २६ ॥

संक्षिप्तं जागरितं विवृणोति—**बुद्धिपूर्वन्त्विति** । बुद्धिपरिणामरूपमिति यावत् । तस्य निरालम्बनत्वं व्यावर्तयति—**विषयसेवितमिति** । सुषुप्तव्यावृत्त्यर्थं **बहि**रित्युक्तम् । तस्य बाह्येन्द्रियजन्यत्वं कथयति—**प्रत्यक्षमिति** । अवस्थात्रयेऽपि विसम्वादाभावमदिधाभित—**अविरुद्धमिति** । इदमपि विशेषणद्वयं स्वप्नव्यावर्त्तकम् ॥ २७ ॥

स्वप्नलक्षणं प्रपञ्चयति—**अर्थाभावे त्विति** । तस्य कथं प्रत्यक्षविधत्वमित्याशङ्क्य तदाभासत्वं सिद्धवत्कृत्याह—**प्रत्यक्षमिवेति** । स्वप्नस्य प्रत्यक्षाभासत्वे दृष्टान्तमाह—**गन्धर्वेति** ॥ २८ ॥

जाग्रत्स्वप्नावुभावेतौ यस्मिन्नित्यं प्रतिष्ठितौ ।
उत्पत्तिः प्रलयश्चैव सुषुप्तमुपलक्षयेत् ॥ २९ ॥

बीजभावश्च निद्रा च द्वयं यत्र न विद्यते ।
तत्तुरीयमिति ज्ञेयमुत्पत्तिलयवर्जितम् ॥ ३० ॥

यस्य जाग्रति लीयन्ते सर्वे भावाः सुषुप्तवत् ।
अवाप्तं तेन विज्ञानं त्रिपथं तेन लङ्घितम् ॥ ३१ ॥

यावदज्ञानभावः स्यात्तावत्संसारभावना ।
उदेति चेत्परं ज्ञानं ब्रह्मैवेदं समन्ततः ॥ ३२ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यशङ्करभगवतः कृतौ स्वरूपनिरूपणं नाम प्रकरणं समाप्तम् ॥

सम्प्रति सुषुप्तं व्यनक्ति—**जाग्रदिति** । अवस्थाद्वयस्य जन्मस्थितिलयाः यतो भवन्ति तत्सुषुप्तमित्यर्थः ॥ २९ ॥

अथ तुरीयं विवृणोति—**बीजभावश्चेति** । निद्रा चेत्यज्ञानकार्यमवस्थाद्वयं संगृहीतम् । यत्रावस्थात्रयं नास्ति तत्तुरीयमित्युक्तं साधयत्युपत्तीति ॥ ३० ॥

[अवस्थात्रयं] प्रक्रम्य प्रतिपादितमुपसंहरति—**यावदिति** । ज्ञानस्य दुर्लभत्वं सूचयितुं चेदित्युक्तं । ज्ञानस्य परमात्माकारत्वेन निरतिशयपुरुषार्थनिदानत्वम् । इदं प्रत्यग्भूतं ब्रह्मात्मैव सच्चिदानन्दात्मकं सर्वतो व्याप्तमखण्डं परिपूर्णं तिष्ठतीति ज्ञानफलमुपसंह्रियते । तदेवमनर्थतद्धेतू जिहासता पुरुषार्थतद्धेतुं जिघृक्षता प्रकरणमिदं श्रोतव्यमिति भावः ॥ ३२ ॥

हेयादेयभिदावादो यस्मिन्नर्थो न गाहते ।
तं प्रत्यञ्चं परानन्दं पुरुषोत्तममाश्रये ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितं स्वरूपनिरूपणं समाप्तम् ॥

श्रीशङ्करभगवत्पादाचार्यविरचिता

वाक्यवृत्तिः

श्रीआनन्दगिर्याचार्यविरचितविवरणटीकोपेता

ॐ

तत्सत्परमात्मने नमः

श्रीशङ्करभगवत्पादाचार्यविरचिता

वाक्यवृत्तिः

आनन्दगिर्याचार्यविरचितविवरणटीकोपेता

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥ १ ॥

तात्पर्येण वेदान्ता यद्वदन्ति परं पदम् ।
तदहं ब्रह्म निर्भेदं सत्यादिपदलक्षितम् ॥

मुमुक्षुजनानुजिघृक्षया वाक्यवृत्तिसंज्ञितं प्रकरणं प्रारभमाणो भगवान् भाष्यकारो विघ्नोपप्लवोपशमनादिप्रयोजनसंसिद्धये परदेवताप्रणामरूपं मङ्गलाचरणं मुखतः सम्पादयन् प्रकरणप्रारम्भायापेक्षितमनुबन्धत्रयं च विषयसम्बन्धप्रयोजनलक्षणं संक्षिप्य प्रतिपत्तिसौकर्यार्थं कथयति—**सर्गस्थितीति** । तत्र श्रीवल्लभं नमामीति सम्बध्यते । श्रियो विद्याशक्तेर्वल्लभस्तदाकारः परमात्मा तं परमात्मानं प्रति वाङ्मनःकायप्रणिधानेन प्रह्वीभूतोऽस्मीत्यर्थः । तस्य तटस्थलक्षणमाह—**सर्गस्थितिप्रलयहेतुमिति** । विश्वेश्वरमित्यादिवाक्यशेषाद्विश्वस्येति विवक्षितम् । ननु कुतो जगतो निमित्तत्वमुपादानत्वं च परस्य कूटस्थस्याऽऽस्थातुं शक्यमित्याशङ्क्यानाद्यनिर्वाच्याविद्याशक्तिवशादित्याशयवानाह—**अचिन्त्यशक्तिमिति** । न च तन्नियमनासमर्थस्य तदीयस्थितिहेतुत्वमिति विवक्षितत्वात् सर्वनियन्तृत्वं समञ्जसम् । **विश्वेश्वरमिति** । न च तत्परिज्ञानमन्तरेण तं नियन्तुं स्रष्टुं वा शक्नोतीत्यभिप्रायेणोक्तं—**विदितविश्वमिति** । सर्वोपादानत्वप्रयुक्तं सर्वात्मत्वमाह—**अनन्तमूर्त्तिमिति** । अथवा तटस्थलक्षणमुक्त्वा स्वरूपलक्षणमाह—**अनन्तेत्यादिना** । तत्र देशतः कालतो वस्तुतश्चानन्ता परिच्छेदरहिता मूर्त्तिः, स्वभावोऽस्येति व्युत्पत्तिमाश्रित्य अखण्डैकरसघनमुक्तम् । **निर्मुक्तबन्धन**मित्यनेन निष्प्रपञ्चत्वं प्रदर्शितम् । **अपारसुखाम्बुराशि**मित्यनेन परमानन्दतोक्ता **विमलबोधघन**मित्यनेन कूटस्थदृष्टिस्वभावतोपदिष्टा । सर्गस्थितिप्रलयहेतुमित्यारभ्य अनन्तमूर्त्तिमित्यन्तेनाऽज्ञातः परमात्मा शास्त्रप्रतिपाद्यस्तदीयप्रकरणस्यापि विषयः सूचितः । तेन सम्बन्धोऽपि परमात्मप्रकरणयोर्विषयविषयिभावो ध्वनितः । निर्मुक्तबन्धनमित्यादिविशेषणद्वयेन सर्वानर्थबन्धननिवृत्तिरनतिशयानन्दावाप्तिश्च प्रयोजनमुक्तम् । **विमले**त्यादिविशेषणेन तु प्रयोजनस्याप्रतिपन्नत्वं प्रत्युक्तमिति विवेक्तव्यम् ॥ १ ॥

यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥ २ ॥

तापत्रयार्कसन्तप्तः कश्चिदुद्विग्नमानसः ।
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३ ॥

अनायासेन येनास्मान्मुच्येयं भवबन्धनात् ।
तन्मे संक्षिप्य भगवन्केवलं कृपया वद ॥ ४ ॥

साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ।
इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५ ॥

तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥ ६ ॥

को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ।
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति श्रुतेः इष्टदेवताभक्तिवत् गुरुभक्तेरपि विद्याप्राप्तावन्तरङ्गसाधनत्वमस्तीति शिष्यशिक्षार्थं विशेषणसङ्कीर्तनपूर्वकं गुरुचरणसरोजं प्रणमति—**यस्येति** । नित्यमिति भक्तिश्रद्धयोरतिरेकोपवर्णनम् ॥ २ ॥

इदानीं सुखप्रतिपत्तये शिष्याचार्योक्तिप्रत्युक्तिव्याजेन प्रकरणमवतारयन्नधिकारिणं साधनचतुष्टयविशिष्टमनूद्य तदीयप्रश्नमुत्थापयति—**तापत्रयार्केति** । आध्यात्मिकं ज्वरादिकृतं आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं चाऽतिवातादिप्रसूतं तापत्रयमुच्यते, कश्चिदित्यधिकारिदुर्लभताऽभिधीयते शमादीत्यत्र आदिशब्देन दमोपरतितितिक्षासमाधानश्रद्धा गृह्यन्ते । उक्तानामनुक्तोपलक्षकत्वात् ॥३॥

अधिकारिणि साधनचतुष्टयवति प्रष्टरि सिद्धे तदीयप्रश्नं प्रकटयति—**अनायासेनेति** । येन साधनेनानायासेनायत्नलभ्येनाऽनुभवसिद्धादनर्थराशेर्मम विश्लेषो भवति तन्मुक्तिसाधनं मदर्थं कथनीयमित्यर्थः । अङ्गैरुपाङ्गैश्चोपबृंहितं मुक्तिसाधनमन्यत्र प्रपञ्चितमित्याशङ्क्याह—**संक्षिप्येति** । आचार्यं पूजयन्निष्टकथने तस्य शक्तिं व्यनक्ति—**भगवन्निति** । प्रत्युपकारनिरपेक्षतया दीनजनानुजिघृक्षा कृपाऽभिलप्यते । शिष्यं शिक्षयतो गुरोरनुग्रहातिरेकादतिरिक्तं नास्ति फलमिति विवक्षित्वोक्तं—**केवलमिति** ॥ ४ ॥

वक्ष्यमाणे समाधाने श्रोतृबुद्धेः सुखप्रवृत्त्यर्थं प्रकृतं प्रश्नं स्तौति—**साध्वीति** । प्रलोभनमात्रमेतदिति माभूत् बुद्धिरित्यभिप्रेत्याह—**वदामीति** । न च मुक्तिसाधनं परोक्षत्वेनोच्यते किन्तु तज्जिज्ञासितमिदमित्यपरोक्षं वदामीत्याह—**इदमिति** । एकाग्रचेतसा श्रुतमेतत् ज्ञातुं शक्यमन्येन तु श्रुतमपि दुर्ज्ञानमित्याह—**सावधानेति** ॥ ५ ॥

एवं पातनिकां कृत्वा मुक्तिसाधनं सप्रमाणं सविषयमुपन्यस्यति—**तत्त्वमस्यादीति** । तत्र प्रश्नचतुष्टयमुत्थापयति—**को जीव इति** । जीवो देहादीनामन्यतमो वा तदतिरिक्तो वा परश्चात्मा

अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि ।
यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवासि न संशयः ॥ ८ ॥

पदार्थमेव जानामि नाद्यापि भगवन्स्फुटम् ।
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥

सत्यमाह भवानत्र विगानं नैव विद्यते ।
हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥

अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ।
आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे ॥ ११ ॥

सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहम् ।
चिन्तयाऽऽत्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥

रूपादिमान्यतः पिण्डस्ततो नात्मा घटादिवत् ।
पृथिव्यादिमहाभूतविकारत्वाच्च कुम्भवत् ॥ १३ ॥

सप्रपञ्चो वा निष्प्रपञ्चो वा अनयोश्च तादात्म्यं तथैवावस्थितयोरन्यथास्थितयोर्वा वाक्यं च तत्तादात्म्यं पदयोर्मुख्यया वा लक्षणया वा वृत्त्या कथं प्रतिपादयतीति प्रष्टुरभिप्रायः । प्रश्नचतुष्टयस्योत्तरमाह—**अत्र ब्रूम इति**। को जीव इति प्रश्नस्य प्रतिवचनं दर्शयति–जीवो नाम देहादिव्यतिरिक्तस्तत्साक्षी त्वंपदार्थः । योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः सिद्धः न तु कश्चित्त्वत्तोऽन्यो देहादिर्जीवः तस्य दृश्यस्य द्रष्टृत्वानुपपत्तेर्वक्ष्यमाणत्वादित्यर्थः। योऽहं जीवशब्दार्थः सोऽहं ब्रह्मणो भिन्नोऽभिन्नो वेति पृच्छन्तं प्रत्याह—**यस्त्वमिति**। मां प्रति यस्त्वमहं कः स्यामिति पृच्छसि त्वं ब्रह्मैवासि न त्वस्मिन्नेव वाक्यार्थे कश्चित्प्रतिबन्धोऽस्तीत्यर्थः । पदार्थज्ञानस्य वाक्यार्थज्ञानहेतुत्वात्पदार्थस्य च स्पष्टमज्ञातत्वात् न वाक्यार्थप्रतिपत्तिर्मम सम्भवतीति शङ्कते—**पदार्थमेवेति**। आपाततः पदार्थप्रतिपत्तावपि यथावत् प्रतिपत्त्यभावे न वाक्यार्थधीरित्यभिप्रेत्योक्तं **स्फुटमिति** ॥८-९॥

पदार्थज्ञानस्य वाक्यार्थज्ञानहेतुत्वमुक्तमङ्गीकरोति—**सत्यमाहेति** । अविगीतमङ्गीकृतमर्थमनुवदति—**हेतुरिति** ॥ १० ॥

तर्हि पदार्थव्याख्यानं कृत्वा वाक्यार्थो व्याख्यायतामित्याशङ्क्याह—**अन्तःकरणेति** । साक्षादीक्षण प्रति कर्तृत्वं साक्षित्वमिति शङ्कां व्युदस्यति—**चैतन्येति**। तस्यैव पुरुषार्थरूपत्वेन जिज्ञासितत्वमाह—**आनन्देति**। अनृतविरोधित्वं दर्शयति—**सत्य इति**। यथोक्तस्य त्वमर्थस्याऽप्रतिपत्तौ नास्ति कारणमित्याह—**सन्निति** ॥ ११ ॥

ननु देहादिष्वात्मबुद्ध्या शुद्धात्मबुद्धिप्रतिबन्धाद्यथोक्तात्मप्रतिपतिरशक्येत्याशङ्क्य पूर्वश्लोकोक्तमात्मस्वरूपमनूद्योत्तरमाह—**सत्यानन्देति** ॥ १२ ॥

कथं पुनर्देहादिषु गताऽऽत्मबुद्धिः शक्या त्यक्तुमित्याशङ्क्य देहस्यानात्मत्वं साधयति—

अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः ।
करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४ ॥

घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा ।
देहद्रष्टा तथा देहो नाहमित्यवधारय ॥ १५ ॥

एवमिन्द्रियदृङ् नाहमिन्द्रियाणीति निश्चिनु ।
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥

सङ्घातोऽपि तथा नाहमिति दृश्यविलक्षणम् ।
द्रष्टारमनुमानेन निपुणं सम्प्रधारय ॥ १७ ॥

देहेन्द्रियादयो भावा हानादिव्यापृतिक्षमाः ।
यस्य सन्निधिमात्रेण सोऽहमित्यवधारय ॥ १८ ॥

अनापन्नविकारः सन्नयस्कान्तवदेव यः ।
बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽहमित्यवधारय ॥ १९ ॥

रूपादिमान् यतः पिण्डस्ततो नात्मा घटादिवत् । देहो नात्मा भौतिकत्वात्कुम्भवत् । देहो नात्मा, रूपादिमत्त्वात् घटादिवदित्यनुमानान्तरमाह—**पृथिव्यादीति** ॥ १३ ॥

देहस्यानात्मत्वं तद्व्यतिरिक्तात्मप्रतिपत्तिमन्तरेण न स्फुटीभवितुमुत्सहते नैरात्म्यप्रसक्तिभयादिति मन्वानः बोधयति—**अनात्मा यदीति** ॥ १४ ॥

यो यद् द्रष्टा स तस्माद्भिद्यते यथा घटद्रष्टुर्घटादीति व्याप्तिमाह—**घटेति** । देहस्य तदतिरिक्तस्य चात्मत्वेपि घटतद्द्रष्ट्रोर्भेदस्य व्याप्तिरतिव्यक्तेत्याह—**सर्वथेति** । अहमपि द्रष्टृत्वाद्देहाद्भिन्नो घटादिवत् घटद्रष्टेत्यनुमानमाह—**देहद्रष्टेति** ॥ १५ ॥

इन्द्रियद्रष्टृत्वात् नाहमिन्द्रियाणि किन्तु तेभ्यो भिन्नो देहद्रष्टुर्देहवदित्यनुमानादिन्द्रियाणामनात्मत्वमाह—**एवमिति** । उक्तन्यायं मनोबुद्ध्यादिष्वतिदिशति—**मन इति** । देहः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात् घटादिरूपो यो दृश्यः स स्वव्यतिरिक्तद्रष्टृको यथा घटः । तथा चायं देहो दृश्यस्तस्मात् स्वव्यतिरिक्तद्रष्टृक एवेति ॥ १६ ॥

देहादिसमूहस्याऽत्मत्वं वारयति—**सङ्घातोऽपीति** । तत्रात्मनो द्रष्टृत्वे फलितमाह—इति **दृश्येति** ॥ १७ ॥

